आचार्यप्रवरश्रीदेवेन्द्रसूरिनिर्मिता श्रावकषडावश्यकसूत्रविवरणमयी—

# श्रीवन्दारुवृत्तिः ( श्रावकविधिः )

प्रकाशिका—रतलाम श्रीऋषभदेवजी केशरीमलजी इत्याख्या श्वेतांबर संस्था.

मुद्रयिता—इन्दौरनगरे श्री जैनबन्धुमुद्रणालयाधिपः श्रेष्ठि जुहारमल मिश्रीलाल पालरेचा.

प्रतयः ५०० वीर संवत् २४५५ विक्रम संवत् १९८५ क्राइस्ट सन् १९२८ पण्यं १-४-०

# वन्दारुवृत्तेरपक्रमः

शेमुषीमद्भ्य उपदाक्रियते ग्रन्थोऽयं श्रीश्रावकानुष्ठानविध्याख्यः आदाननाम्ना वन्दारुवृत्त्याख्यः प्राधान्येन श्रावकप्रतिक्रमणवृत्तिनामा रचयितारश्चास्य श्रीमत्तपोगणनभोमणयःश्रीमन्तो देवेन्द्रसूरयः, न च श्रीमतां तपोगणवर्तित्वं श्रीमद्भिर्मुनिसुन्दरसूर्यादिभिर्गुर्वावल्यादौ कल्पितामिति, यतः श्रीमद्भिर्धर्मरत्नबृहद्वृत्तौ स्वस्य चैत्रवालगच्छीयता स्पष्टमाटङ्कितेतिवाच्यं, यतः श्रीमद्भिर्यदा श्राद्धदिनकरवृत्तिधर्मरत्नवृत्त्यादयः कृतास्तदा नावाप्तं तपोबिरुदं ततो नोल्लेखस्तस्य तयोः, परं श्रीमाद्भिरेव विहितायां स्वोपज्ञकर्मग्रन्थविवृत्तौ 'क्रमेणाप्ततपाभिख्ये'ति प्रशस्तिवाक्यं दृष्ट्वा को दृष्टिमान् न श्रद्दधीत श्रीमतां तपोगणवर्त्तितां,न चैवमलीकालापेन खरतराणामसद्भूतां श्रीजिनेश्वरसूरेरुत्पत्तिमनुमन्येत कोऽपि तपोगणीयोऽन्योऽपि नेति तदाग्रहरसिकैरालोच्यं, यतो विहाय जिनवल्लभीयान् न कोऽपि श्रीजिनेश्वरसूरिपरम्परागतः श्रीजिनेश्वरसूरीणां खरतरतामाख्याति, किंतु संवेगरंगशालानवांगीवृत्तिसुरसुन्दरीचरित्रश्रीमहावीरचरित्रादौ तेषां स्पष्टं चान्द्रकुलीनतैवाख्याता, अलमुत्सूत्रानुगतैरातिचसूर्या, श्रीमद्भिरत्र पौषधविधावरतिदेशतयोद्दिष्टः पौषधविधिप्रकरणग्रन्थो जिनवल्लभीयः चक्रेश्वरसूरिकृतो वेत्यत्र तु त एव प्रमाणं। श्रीमतामितिवृत्तं तु तथाविधसाधनाभावान्न लिख्यते, संक्षेपतस्तु गुर्वावलीपट्टावल्यादौ, अत्र नमस्कारादिक्रमेण सूत्राणां व्याख्याकरणादेवास्य श्रावकानुष्ठानविधिरित्याख्या यथार्थेति ज्ञायते। प्राक्चास्य मुद्रणं श्रेष्ठि-देवचंदलालभाइपुस्तकोद्धारसंस्थयाऽकारि तथाप्यसुलभत्वात् तत्प्रतीनान्मुद्रणमारब्धं श्रीरत्नपुरीय-श्रीऋषभदेवजी केशरीमलजीत्याख्यया श्वेतांबरसंस्थया, अत एव विशेषोऽप्यस्य तदुपक्रमाद् बोध्यः इति निवेदयति आनन्दसागरः राजनगरे १९८५ मृगशीर्षशुक्ला २

# वन्दारुवृत्त्यपराभिधानश्रावकानुष्ठानविधेरनुक्रमणिका.


| विषयः | पृष्ठं यावत् |
| --- | --- |
| चैत्यवन्दनसंख्या स्थापनानियमश्च | १ |
| नमस्कारव्याख्या | ३ |
| नमस्कारफले राजसिंहचरित्रं | २४ |
| चैत्यवन्दनभेदाः | २४ |
| ईर्यापथिकीव्याख्या | २६ |
| मिथ्यादुष्कृते मृगावतीदृष्टान्तः | २६ |
| तस्सउत्तरीव्याख्या | २७ |
| अन्नत्थव्याख्या कायोत्सर्गदोषाश्च | २९ |
| शक्रस्तवव्याख्या | ३६ |
| मेघकुमारदृष्टान्तः | ३४ |
| द्रव्यार्हद्वन्दने भरतदृष्टान्तः | ३६ |
| अर्हच्चैत्यस्तवः दशार्णभद्रदृष्टान्तः | ३९ |
| चतुर्विंशतिस्तवव्याख्या | ४५ |
| भावसमाधौ जिनदत्ताख्यानकं | ४४ |
| श्रुतस्तवव्याख्या | ४८ |
| प्रमादाप्रमादेऽशकटापितृकथा | ४८ |
| श्रीसिद्धस्तवव्याख्या | ५३ |
| श्रीगौतमवृत्तम् | ५३ |
| वैयावृत्त्यकरसूत्रव्याख्या | ५३ |
| जयवीतरागसूत्रव्याख्या | ५४ |
| वन्दनकविधिः (१९८ स्थानानि) | ६१ |
| पार्श्वस्थादि स्वरूपं | ५६ |
| वन्दने दृष्टान्तपंचकम् | ६१ |
| वन्दने दोषाः (३२) कारणानि (८) | ६३ |
| वन्दनकव्याख्या आशातनाः (३३) | ६७ |
| आलोचनासूत्रव्याख्या | ६८ |
| क्षामणासूत्रव्याख्या | ६९ |
| प्रत्याख्यानानां भेदाः (१०) तद्भंगाः (४९) | |
| तदाकाराः तत्सूत्रव्याख्या | ६९ |


॥ २ ॥

| विषयः | पृष्ठं यावत् |
|---|---|
| पौरुष्यादिच्छायामानं विकृतिगतभेदाः | |
| तच्छुद्धयः तत्फलम् (धम्मिलदृष्टांतसूचा | ७८ |
| दामन्नकदृष्टान्तः | ८० |
| प्रतिक्रमणविधिः | ८५ |
| सामायिकव्याख्या | ८६ |
| प्रतिक्रमणसूत्रव्याख्यायां महारम्भपरिग्रह-- | |
| निवृत्त्यनिवृत्त्योः धर्मनन्दलोभनन्दाख्यानकं | ८९ |
| सम्यक्त्वे नरवर्मकथा | ९५ |

| विषयः | पृष्ठं यावत् |
|---|---|
| प्राणातिपाते विरतौ यज्ञदेवकथा | ९९ |
| मृषावादे सागराग्निशिखकथा | १०३ |
| अदत्तादानविरतौ परशुरामकथा | १०७ |
| परस्त्रीवर्जने सुरप्रियकथा | १११ |
| परिग्रहपरिमाणे क्षेमादित्यधरणयोःकथा | |
| दिक्प्रमाणव्रते शिवभूतिस्कन्दकथा | |
| भोगोपभोगमाने मेघसुप्रभयोः कथा | |
| अनर्थदण्डविरतौ चित्रगुप्तकथा | |

| विषयः | पृष्ठं यावत् |
|---|---|
| सामायिके मेघरथकथा | |
| देशावकाशिके पवनंजयकथा | १३८ |
| पौषधौपवासे ब्रह्मसेनज्ञातम् | १४२ |
| अतिथिसंविभागे नरदेवकथा | १४७ |
| संलेखनायां धर्मघोषधर्मयशसोर्ज्ञातं | १५२ |
| मंत्राक्षरश्रवणगुणे स्थाविरादृष्टान्तः | १५४ |
| प्रतिक्रमणशेषगाथाव्याख्या | १५८ |


—*—

॥ ३ ॥

॥ श्रीमद्देवेन्द्रसूरिवरनिर्मिता वन्दारुवृत्त्यपरनाम्नी—

# श्राद्धप्रतिक्रमणसूत्रवृत्तिः

वन्दारुवृन्दारकवृन्दवन्द्यं, प्रणम्य वीरं जितमारवीरम् । उपासकानामुपकारहेतोर्वक्ष्याम्यनुष्ठानविधिं सुबोधम् ॥ १ ॥

इह हि तावत् श्रावकेणापि प्रत्यहं त्रीन् पञ्च सप्त वा वारान् दर्शनविशुद्ध्यर्थं चैत्यवन्दना विधेया, यदाहुः—"साहूण सत्त वारा होइ अहोरत्तमज्झयारंमि । गिहिणो पुण चिइवंदण तिय पंच य सत्त वा वारा ॥ १ ॥" तथा वन्दनकं चाष्टौ ( पडिकमणे सज्झाए काउस्सग्गावराह पाहुणए । आलोयण संवरणे उत्तमट्ठे य वंदणयं ॥ १ ॥) कारणान्याश्रित्य गुणवत्प्रतिपत्तये गुरूणां दातव्यं, तथा सर्वाचारविशुद्ध्यर्थं प्रतिक्रमणं चोभयकालमवश्यमनुष्ठेयमिति । तत्र चैतत्सर्वमप्यनुष्ठानं साक्षाद्देवगुर्वभावे स्थापनाचार्यस्थापनापूर्वकमेव विधेयं, यदाहुः दुष्षमान्धकारसम्भारनिमग्नजिनप्रवचनप्रदीपप्रतिमाः **श्रीजिनभद्रगणिक्षमाश्रमणपादाः**- "गुरुविरहंमि य ठवणा गुरूवएसोवदंसणत्थं च । जिणविरहंमि य जिणबिंबसेवणामंतणं सहलं ॥ १ ॥ रन्नो व परुक्खस्सवि जं सेवा मंतदेवयाए वा । तह चेव परुक्खस्सवि गुरुणो सेवा विणयहेउ ॥२॥" त्ति, सा च नमस्कारपूर्विकेत्यतः स एवादौ व्याख्यायत इति, सूत्रं चेदम्—

**नमो अरिहंताणं १, नमो सिद्धाणं २, नमो आयरियाणं ३, नमो उवज्झायाणं ४, नमो लोए सव्वसाहूणं ५ ॥**
**एसो पंचनमुक्कारो ६, सव्वपावप्पणासणो ७ । मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं ८ ॥ १ ॥**

नमो-नमस्कारोऽर्हद्भ्यः-शक्रादिकृतां पूजां सिद्धिगतिं वाऽर्हन्तीत्यर्हन्तस्तेभ्यः, यथा—"अरहंति वंदणनमंसणाणि अरिहंति पूयसक्कारं । सिद्धिगमणं च अरिहा अरिहंता तेण वुच्चंति ॥१॥" नमः सिद्धेभ्यः, सितं-प्रभूतकालेन बद्धमष्टप्रकारं कर्म्म शुक्लध्यानाग्निना ध्मातं-भस्मीकृतं यैस्ते निरुक्तिवशात्सिद्धास्तेभ्यः, यथा-"दीहकालरयं जं तु, कम्मं से सियमट्ठहा । सियं धंतंति सिद्धस्स, सिद्धत्तमुवजायई ॥ १ ॥" नमः आचार्येभ्यः, स्वयं पञ्चविधाचारवन्तोऽन्येषामपि तत्प्रकाशकत्वात् आचारे साधव आचार्यास्तेभ्यः, यथा-"पञ्चविहं आयारं आयरमाणा तहा पयासंता । आयारं दंसंता आयरिया तेण वुच्चंति ॥ १ ॥" नमः उपाध्यायेभ्यः, उपेत्य-समीपमागत्य येभ्यः सकाशादधीयत इत्युपाध्यायास्तेभ्यः, यथा-"बारसंगो जिणक्खाओ, सज्झाओ कहिओ बुहेहिं । तं उवइसंति जम्हा, उज्झाया तेण वुच्चंति ॥ १ ॥" नमो लोके सर्वसाधुभ्यः, लोके- मनुष्यलोके, सम्यग्ज्ञानादिभिर्मोक्षसाधकाः सर्वसत्त्वेषु समाश्चेति साधवः सर्वे च ते स्थविरकल्पिकादिभेदभिन्नाः साधवश्चेति सर्वसाधवस्तेभ्यः, यथा—"निव्वाणसाहए जोए, जम्हा साहंति साहुणो । समा य सव्वभूएसु, तम्हा ते भावसाहुणो ॥ १ ॥" एष पञ्चनमस्कारः सर्वपापप्रणाशनः, मङ्गलानां च सर्वेषां, प्रथमं भवति मंगलम् ॥ अत्र चाष्टषष्टिरक्षराणि, नव पदानि, अष्टौ च सम्पदो- विश्रामस्थानानि, तत्र सप्त एकैकपदाः, अन्त्या तु द्विपदा, अधिकारिणस्तु पंचार्हदादयो मार्गाविप्रणाशादिभिः कारणैर्नमस्कारार्हाः, यथा—"मग्गे १ अविप्पणासो २ आयारे ३ विणयया ४ सहायत्तं ५ । पंचविहनमुक्कारं करेमि एएहिं हेऊहिं ॥ १ ॥" इति ॥ (सम्यक्त्वादिर्मोक्षमार्गोऽमीभिर्दर्शितः १ अविप्रणाशः-

वन्दारुवृत्तौ नमस्कारे

॥ ३ ॥

शाश्वतत्वं सिद्धानां २ आचारः ३ विनयः- सिद्धान्तविनयनं प्रापणं ४ साधुधर्मानुष्ठायिनां सहायकरणं साधूनां ) अस्य पाठे ऐहिकामुष्मिकफलं प्रदर्श्यते—इहलोगंमि तिदंडी सादिव्वं माउलिंगवणमेव । परलोए चंडपिंगल हुंडियजक्खो य दिट्ठंता ॥१॥" इहलोके-पाठकजनापेक्षया अत्रैव जन्मनि त्रिदण्डीति-त्रिदण्ड्युपलक्षितः श्रावकसुतो दृष्टांतः १ 'सादिव्वं'ति श्रावकसुताया देवतासान्निध्यम् २ 'माउलिंगवणमेवे' ति मातुलिंगवनं- बीजपूरारामः तेन सूचितः श्रावकश्चेति ३, एते इहलोकफलप्रतिपादका दृष्टान्ताः, तथा परलोके-अन्यभवे चण्डपिंगलः ४ हुण्डिकयक्षश्च ५ दृष्टान्ताविति गाथाक्षरार्थः, भावार्थस्तु सर्वोदाहरणानां पुलिन्द्र-मिथुनकथानकादवसेयः, तथाहि—

वसुन्धरावधूक्रीडापुष्करे पुष्करार्द्धके । समृद्धो भरते ग्रामः, सिद्धावट इति स्मृतः ॥ १ ॥ विश्वारामं कषायाग्निसन्तप्तं देशनाजलैः । तत्रायात् सुव्रताचार्यः, सिंचन्नब्द इवान्यदा ॥ २ ॥ वर्षारात्रस्तदा प्राप्तो, वियुक्तजनदुर्जनः । केतकीकुटजोच्चुम्बिरोलम्बनिकुरम्बकः ॥ ३ ॥ स्तनन्त्यो यत्र सर्वत्र, कृष्णाः पुष्टाः पयःप्रदाः । मेघमाला अटाट्यन्ते, खे महिष्यश्च भूतले ॥ ४ ॥ ततः पृथ्वीं पयःपूर्णां,नवाङ्कुरां त्रसाकुलाम् । दृष्ट्वा कृपापरः साधूनूचेऽनूचानपुंगवः॥५॥ विहर्तुं मुनिसिंहानां, साम्प्रतं नहि सांप्रतम् । इत्युक्त्वा सपरीवारस्तं ग्रामं प्राविशद् गुरुः ॥ ६ ॥ ग्रामणीरागमज्ञानां, गुरुर्ग्रामाग्रणीपुरः । उक्त्वा शय्याफलं शय्यां, याचित्वा तत्र तस्थिवान् ॥ ७ ॥ तस्थुर्महर्षयस्तत्र, केचिन्मासमुपोषिताः । द्विमासीं च त्रिमासीं च, चतुर्मासीं च केचन ॥ ८ ॥ दुर्दमान-

फले पुलिन्द्र-भवः

॥ ३ ॥

१ खम्-आकाशं स्तननं-शब्दनं पुष्टाः-पीवराः पयो-दुग्धं जलं च २ अनूचानः प्रवचने सांगेऽधीती गणिश्च सःइति वचनादाचार्यसिंहाः ३ सांप्रतं-योग्यं ४ ग्रामणीः-मुख्यः

वन्दारु-वृत्तौ नमस्कारे ॥ ४ ॥

ङ्गदमनो, दमसारो महामुनिः । तत्रैको गुरुमापृच्छ्य, समीपस्थं गिरिं ययौ ॥ ९ ॥ तद्गुहायामनाहारः, स्वाध्यायध्यानतत्परः ।
समग्रां स चतुर्मासीं, तस्थौ सुस्थिरमानसः ॥ १० ॥ पुलिन्द्रमिथुनं तत्राजगामेतस्ततो भ्रमत् । तस्यर्षेर्दर्शनेनास्य, नाशमापत्क्ष-
णादघम् ॥ ११ ॥ दमसारोऽपि तज् ज्ञात्वा, योग्यं योग्योपदेशवित् । दिदेश पठनं तस्य, परमेष्ठिनमस्कृतेः ॥ १२ ॥ पुलिन्द्र-
मिथुनं तां तु, पपाठाशठमानसम् । परोपकारप्रचिकीः, पुनः साधुस्तमादिशत् ॥ १३ ॥ असौ पंचनमस्कारमन्त्रः परममंगलम् ।
युवाभ्यामनिशं ध्येयस्त्रिकालं सर्वपापहृत् ॥ १४ ॥ चक्राते तत्तथैवैतौ, वर्षारात्रात्यये मुनिः । विहर्तुमन्यतोऽगच्छत्, स्वच्छात्मा
गच्छसंयुतः ॥ १५ ॥ तथाविधमकृत्वाऽघं, मिथुनं तत्प्रभृत्यपि । आससाद क्रमान्मृत्युमुपकारं मुनेः स्मरन् ॥ १६ ॥ अस्त्यत्र
भरतक्षेत्रे, नगरं मणिमन्दिरम् । अदभ्रैः[1] शरदभ्राभैः[2], सुंदरं जिनमंदिरैः ॥ १७ ॥ यत्रास्ति व्यसनी लोको, दाने लुब्धो यशोऽर्जने ।
अकृत्यकरणे भीरुरसंतुष्टो गुणग्रहे ॥ १८ ॥ परस्वहरणे पङ्गुः, परस्त्रीदर्शनेऽन्धकः । मूकश्च परदोषोक्तावज्ञश्च परयाचने ॥ १९ ॥
राजा राजमृगाङ्कोऽत्र, राजेवा[3]स्ति जनप्रियः । परमेष परेषू[4]च्चैः, कल्पांततपनोपमः ॥ २० ॥ विजयेति प्रिया तस्य, यां पश्यन्न-
तिसुंदराम् । मन्येऽनिमेष[5]दृग्भेजेऽनिर्मिषौ[6]कोऽनिमेषताम् ॥ २० ॥ गर्भेऽमुष्याः पुलिन्द्रोऽसौ, गुहायामिव केशरी । सिंहस्वप्नेन विख्यातो,
गुणव्यू[7]होऽवतीर्णवान् ॥ २२ ॥ जातस्य तस्य पुत्रस्य, पिता जन्मोत्सवं मुदा । स्वप्नतुल्यं तदा नाम, राजसिंह इति व्यधात् ॥२३॥
अक्लेशेन कलास्तेन, गृहीता गुरुसन्निधौ । द्वासप्ततिरतिप्रौ[8]ढप्रज्ञाप्रागल्भ्यशालिना ॥ २४ ॥ मतिमान् सुमतिर्नाम, मतिसारस्य
मन्त्रिणः । सुतस्तस्य सुहृज्जज्ञे, कलाकौशलपेशलः ॥ २५ ॥ कुमारः प्राप तारुण्यं, लावण्यकमलालयम् । ललनालोचनाऽलीनां,

पुलिन्द्रयुग्माराधना राजसिंह जन्म ॥ ४ ॥

१ अदभ्रैः-बहुभिः २ शरत्कालीनमेघसदृशैः ३ चन्द्रवत् ४ शत्रुषु ५ अनिमेषदृग्-देवः ६ स्वर्गः ७ समूहः ८ प्रकर्षः

वन्दारुवृत्तौ नमस्कारे



पान्थोक्तो रत्नवती संबन्धः

यत्सदाऽम्भोजखण्डवत् ॥ २६ ॥ प्रेक्षमाणाः स्त्रियो मार्गं, तद्दर्शनसमुत्सुकाः । नेत्रैः कुर्वन्ति नीलाब्जकल्पैर्दत्तोप[1]हारकम् ॥ २७ ॥
तद्दर्शनसतृष्णानां, तरुणीनां विनिर्गतैः । गवाक्षेषु मुखैर्व्योम, लक्ष्यते शशिलक्ष्ययुक् ॥ २८ ॥ नार्यः स्तुवन्ति गायन्ति, तं पश्यन्ति
तथाप्यसौ । मनागपि मनस्तासु, मुनीन्द्र इव न व्यधात् ॥ २९ ॥ कदाचिद्राजसिंहोऽथ, समित्रो निर्गतो बहिः । वाहयित्वा बहून्
वाहा[2]न् , विशश्राम तरोस्तले ॥३०॥ दृष्ट्वा च पथिकं कंचित्कुमारस्तमभाषत । कुतस्त्वमागा ? गन्ताऽसि,क्वापश्यः किंचिदद्भुतम्?
॥ ३१ ॥ पथिकोऽपि तमानम्योपविश्य पुरतोऽवदत् । विकिरन्निव हारौघं, प्रसरद्दश[3]नांशुभिः ॥ ३२ ॥शृणु कुमार ! सुकोविदरा-
जितं, जितहृ[4]षीकमुनिव्रज[5]पावितम् । वितरदद्भुतदानसुमानवं, नववयस्तरुणीगणसुन्दरम् ॥ ३३ ॥ दर[6]भरापगमाश्रितसंम[7]र्दं, मदजल-
क्षरणोत्तमवारणम् । रणशताजितसद्भटरक्षितं, क्षितरुजादिविवर्जितपूर्जनम् ॥ ३४ ॥ जनकृताऽर्हतसद्ममहामहं, महदिवास्ति हि
पद्मपुरं पुरम् । पुरवराच्च ततोऽहमिहागमं, गमनमिच्छुरथो शृणु यत्र तत् ॥३५॥ त्रिभिर्विशेषकम् ॥ युगादौ पु[8]ण्डरीकस्य, कषाय-
कारिखण्डने । गणभृत्पुण्डरीकस्य, निवृत्त्या यत्पवित्रितम् ॥ ३६ ॥ यच्चानेकजिनैः स्पृष्टं, यत्रासंख्यमहर्षयः । सिद्धिमीयुस्ततश्चै-
तत्सिद्धिक्षेत्रमिति स्मृतम् ॥ ३७ ॥ यदाद्यं सर्वतीर्थानां, तीर्थं शत्रुंजयाभिधम् । तन्नन्तुं चलितोऽस्मीति, साम्प्रतं त्वद्भुतं शृणु
॥३८॥ त्रिभिर्विशे० । तत्र श्रीपद्मपुरे बहुविबु[9]धनिषेव्यमाणपदपद्मः । अस्ति जयं[10]वाहिनीयुक् भूशक्रः शक्रवत्पद्मः ॥३९॥ यस्य प्रतापतप[11]न-
स्तथा कथंचिद्विजृंभितो भुवने । रिपुनारीमुखकमलश्रियमपि सेहे यथा नैव ॥ ४० ॥ तस्यास्ति राजहंसीव, हृत्कुशे[12]शयशायिनी ।

१ पूजा २ अश्वान् ३ दन्ताकिरणैः ४ इन्द्रियाणि ५ समूहः ६ भयसमूहः ७ हर्षः ८ सिंहः ९ देवाः पंडिताश्च १० जयकारिणी जयाख्या च सेना ११ सूर्यः १२ पद्मं

वन्दारुवृत्तौ नमस्कारे ॥ ६ ॥

पान्थोक्तो रत्नवती-संबन्धः

देवी हंसीति या शुद्धोभयपक्षविराजिनी ॥ ४१ ॥ तत्कुक्षौ रत्नवत्याख्या, स्त्रीरत्नं पुत्रिकाऽजनि । याऽत्रासीं[1] गुणयुक्[2] सद्वीर्मुक्तामा-लेव निर्मला ॥ ४२ ॥ अपि विश्वेऽभिरामाभी, रामाभिः पूरिते पुरम् । वामार्द्धं दक्षिणार्द्धस्य, तस्याः स्यादनुरूपभाक्[4] ॥ ४३ ॥ प्रज्ञाप्रकर्षतोऽध्यैष्ट, सा सुखं सकलाः कलाः । कामक्रीडावनं प्राप, पावनं यौवनं क्रमात् ॥ ४४ ॥ विवाहार्हेति सा मात्रा, प्रैषि राज्ञः सदस्यथ[5] । पितुः पादौ प्रणम्यैषा, निषसाद तदन्तिके ॥ ४५ ॥ दृष्ट्वाऽतिरतिरूपां ताम्, राजाऽमात्यमवोचत । रूपेणा-स्या वरो योग्यः, किं स्यान्न वेति संशये[6] ॥ ४६ ॥ मंत्र्यूचे सुकृतैरस्या, वरोऽप्यस्त्युचितो ननु । योजयिष्यन्ति तान्येव, कुतोऽ-प्यानीय तं स्वयम् ॥ ४७ ॥ इतश्च नृपतेरग्रे, चक्रे संगीतकं नटः । सा तं पुलिन्द्रवेषेण, नृत्यन्तं क्षणमैक्षत ॥ ४८ ॥ ततो मूर्छा-मगादेषा, पित्रा स्वस्थीकृताऽवदत् । जातिस्मृतिरभून्मेऽद्य, पुलिन्द्री प्राग्भवेऽभवम् ॥ ४९ ॥ प्रियश्च मे पुलिन्द्रोऽभूत्प्राणेभ्योऽपि प्रियः पतिः । सम्प्रत्यपि लभे तं चेत्, परिणेष्यामि नान्यथा ॥ ५० ॥ एवं पान्थवचः शृण्वन्, राजसिंहः शनैः शनैः । मूर्छन् जातिस्मृतिं प्राप, स्वस्थोऽभूच्छीतवाततः ॥ ५१ ॥ ततोऽसौ परमां प्रीतिं, प्रपन्नः प्राक्प्रियां प्रति । पथिकं स्माह किं तत्राग्रतो-ऽभूत्सोऽप्यदोऽवदत् ॥ ५२ ॥ श्रुत्वा गाढप्रतिज्ञां तां, स्वपुत्र्याः पद्मपार्थिवः । अस्याः पूर्वपतिर्ज्ञेयः, कथमित्यधृतिं दधौ ॥५३॥ एनं वृत्तान्तमाकर्ण्य, तत्रायान् राजसूनवः । दूरादेत्यात्मनः पूर्वभवे प्रोचुः पुलिन्द्रताम् ॥ ५४ ॥ सोचेऽभवन् भवन्तश्चेत्पुलिन्द्राः पूर्वजन्मनि । किं कृतं सुकृतं तत्र, यत्प्रापुः श्रियमीदृशीम् ? ॥ ५५ ॥ तदज्ञानवतां तेषां, मृषाभाषाजुषां व्यधात् । विनिश्चित्या-

१ निर्दोषा निर्भया च २ औदार्यादयो दवरकश्च ३ शोभना वाणी यस्याः ४ मनोज्ञाभिः स्त्रीभिः पूरिते विश्वे तस्य दाक्षिणार्धस्य अनुरूपभाक् पुरं वामार्धं स्यात् ५ सभायां ६ संशयं कुर्वे

पुलिन्द्रत्वमेषोपेक्षां पुलिन्द्रवत् ॥ ५६ ॥ ततोऽसत्यगिरो मर्त्त्या, विचिन्त्येति नृपात्मजा ! पुरुषद्वेषिणी जज्ञे, स्त्रीभिरेव वृता च सा ॥ ५७ ॥ नृरत्नमत्र धात्रा त्वं, स्त्रीरत्नं तत्र सा कृता । यदि स्याद्युवयोर्योगस्ततोऽस्य[1] स्यात्कृतार्थता ॥ ५८ ॥इत्यद्भुतं पान्थमुखान्निशम्य, विद्वत्तया[2]ऽभीष्टजनाख्यया[3] च । तुष्टो ददौ पार्थिवसूनुरुच्चैरलंकृतिं स्वांगगतां ततोऽस्मै ॥५९॥ उपजातिः॥पथिकं तं विसृज्यागाद्, राजसिंहो गृहं निजम् । उपायान् विविधान् ध्यायन्, द्रष्टुं रत्नवतीं सतीम् ॥ ६० ॥ पौरैरितश्च राज्ञोऽग्रे, रहस्येवं निवेदितम् । यत्र यत्र भ्रमत्येष, कुमारः क्रीडया पुरे ॥ ६१ ॥ मुक्त्वा महान्ति कार्याणि, त्यक्त्वा च रुदतः शिशून् । तत्र तत्रान्वधावन्त, तत्सौभाग्यात् पुरस्त्रियः ॥ ६२ ॥ ततोऽसौ वार्यतां नाथ !, कथंचिद्बंभ्रमन् पुरे । वेत्रिणा[4]ऽज्ञापयद्राजा, कृतलोककृपोघनम् ॥ ६३ ॥ कला अभ्यस्यता स्थेयमावासान्तः सदा त्वया । स्युर्बहिश्चारिणः पुंसो, विफलाः सकलाः कलाः ॥ ६४ ॥ श्रुत्वेत्यचिंतयत्सोऽपि, तातः किमिदमादिशत् ? । ज्ञातपूर्वां प्रवृत्तिं तां, ततोऽस्य सुमतिर्जगौ ॥ ६५ ॥ कुमारस्तमथोऽवादीन्नृपाज्ञा मेऽतिदुष्करा । तां पद्मनृपतेः पुत्रीं, वीक्षितुं चातिकौतुकम् ॥ ६६ ॥ पुण्यवत्त्वं[5] गुणस्फूर्तिर्न भाषादौ च कौशलम् । देशान्तरं विना मित्र !, यियासुस्त[6]दहं ततः ॥ ६७ ॥ मतिसारसुतः प्रोचे, सुमतिः सुमतिस्ततः । स्वामिन्नस्मि सहायोऽस्मिन्नर्थे कुर्यास्त्वमीप्सितम् ॥ ६८ ॥ मन्त्रयित्वाऽषडक्षीण[7]मिति मन्त्रिसुतान्वितः । निर्ययौ नगरादेष, निशित[8]तासिकरो निशि ॥ ६९ ॥ महीं क्रामन्नरण्येऽसौ, प्रसुप्तो देवतागृहे । शुश्रावार्त्तस्वरं रात्रौ, पुरुषस्याथ कस्यचित् ॥ ७० ॥ कृपाण[9]पाणिरेषोऽथ, कृपालुस्तं प्रति व्रजन् । साक्षाद्राक्षसमैक्षिष्ट, कक्षाप्रक्षिप्तपूरुषम् ॥ ७१ ॥ तमभाषिष्ट शिष्टात्मंस्तिष्ठामुं मुंच साधकम् । अनेनापकृतं किं ते ?, कथय श्लथय क्रुधम् ?

१ धातुः २ पान्थस्य विज्ञतया ३ पूर्वभवपत्नीनाम्ना ४ द्वाःस्थेन ५ प्रसिद्धिभाक्त्वं ६ देशान्तरं ७ गुप्तं ८ तीक्ष्णः ९ खड्गः

॥ ७२ ॥ बभाषे राक्षसोऽप्येष, चिकीर्षुर्मां वशेऽद्य तत् । सप्तरात्रक्षुधार्त्तेन, महामांसं मयाऽर्थितः ॥ ७३ ॥ दातुमेषोऽक्षमोऽहं तु, क्षामकुक्षिर्बुभुक्षया । नीतिमुख्य ! समाख्याहि, भक्ष्यं मुंचे कथं स्वकम् ? ॥ ७४ ॥ जगाद राजसिंहोऽपि, नृरक्षस्तं नृभक्षकम् । मुंचामुं ते प्रयच्छामि, महामांसं यदृच्छया ॥ ७५ ॥ राक्षसस्तं ततस्त्यक्त्वा, प्रोचे देहि त्वमेव तत् । सोऽप्यर्जुनोऽर्जुनैर्यो हि, लोके किल निवर्त्तयेत् ॥७६॥ कुमारः करवालेन, करालेन निजांगतः । छित्त्वा सत्त्वाम्बुधिर्यावत्, जांगलं दातुमुद्यतः ॥७७॥ पलादस्तावदानन्दाज्जगाद नृपनन्दनम् । त्वत्सत्त्वेनातितुष्टोऽस्मि, परप्राणप्रदेन ते ॥ ७८ ॥ वृणु वर्यं वरं वीर !, सोप्यूचेऽथ निशाचरम् । तुष्टस्त्वं मे स्फुटं चेत्तत्साधकस्येप्सितं कुरु ॥ ७९ ॥ करिष्ये त्वद्गिरा किन्तु, न मोघं देवदर्शनम् । इति चिंतामणिं दत्त्वा, रक्षोऽमुष्मै तिरोदधे ॥ ८० ॥ निवृत्त्य नृपपुत्रोऽपि, गत्वा मित्रान्तिकेऽब्रवीत् । तं वृत्तान्तं निशाशेषमतीत्य चलितोऽग्रतः ॥ ८१ ॥ चिन्तारत्नानुभावेन, सुखान्यनुभवन्नसौ । सवयस्योऽवनीं क्रामन्, प्राप रत्नपुरं पुरम् ॥ ८२ ॥ तच्च रत्नोच्चयाकीर्णं, रत्नप्रासादसुन्दरम् । यस्याग्रे रोहणः शैलो, मन्येऽवकरकूटवत् ॥ ८३ ॥ सोऽपश्यत्सर्वसौवर्णं, तत्रार्हच्चैत्यमुच्चकैः । मेरोः शृंगमिवोत्तुंगमागतं तद्दिदृक्षया ॥ ८४ ॥ तत्रार्हत्प्रतिमां रत्नमयीं नत्वा ततोऽस्तवीत् । प्रभूतभक्तिसम्भूतरोमांचप्रचयो यथा ॥८५॥ नेत्रे साम्यसुधारसैकसुभगे आस्यं प्रसन्नं सदा, यत्ते चाहितहेतिसंहतिलसत्संसर्गशून्यौ करौ । अंकश्च प्रतिबन्धबन्धुरवधूसम्बन्धवन्ध्योऽधिकं, तद्देवो भुवने त्वमेव भवसि श्रीवीतरागो ध्रुवम् ॥ ८६ ॥ तदेष सर्वतो वीक्ष्य, चैत्यं चित्ते चमत्कृतः। चैत्यार्च्चकमथापृच्छत्, को नामेदमचीकरत् ? ॥ ८७ ॥ स प्राह श्रूयतामस्मिन्निषद्य मणिपीठके। यशोभद्राभिधोऽत्राभूत्, श्रेष्ठीभ्यः श्रावकोत्तमः

---

१ गाः २ भयंकरेण ३ मांसं ४ राक्षसः ५ निष्फलं ६ समित्रः ७ समूहेन ८ कचवरसमूहवत् ९ मुखं १० पापहेतुः शस्त्रसमूहः

॥ ८८ ॥ शिवो नाम सुतस्तस्य, द्यूतादिव्यसनार्दितः । पित्राद्यैः शिक्षितोऽप्येष, धर्मं नेषदपि व्यधात् ॥ ८९ ॥ सोऽनुशिष्टोऽन्यदा पित्रा, यदा तेऽभ्येति दुस्तरा । विपत्तदा तदुच्छित्त्यै, स्मरेः पंचनमस्क्रियाम् ॥ ९० ॥ सोऽथ तस्योपरोधात्तत्तथेति प्रत्यपद्यत । सदाराधनया मृत्वा, पिताऽस्य स्वर्गमासदत् ॥ ९१ ॥ शिवोऽथ संयुतः पुम्भिर्विटाद्यैर्मधुपैरिव । वनं मत्त इव व्यालो, निनाय निधनं धनम् ॥ ९२ ॥ तद्विना क्वापि नाप्नोति, स्थानमानासनानि सः । तुषाणामकणानां हि, किं कस्याप्यादरो भवेत्? ॥ ९३ ॥ अथान्यदा तदासन्ने, त्रिदण्ड्येको निषेदिवान् । शिवं निरीक्ष्य निःश्रीकं, कृपालुरिव सोऽब्रवीत् ॥ ९४ ॥ विषण्ण इव वत्स ! त्वं, वीक्ष्यसे हेतुतः कुतः ? । शिवोऽथाख्यन्न सन्तोषपोषकोऽर्थोऽस्ति नाथ ! मे ॥ ९५ ॥ परिव्राट् तं प्रति प्रोचे, वचश्चेन्मे करिष्यसि । गृहदासीव ते वश्या, श्रीरवश्यं भविष्यति ॥ ९६ ॥ शिवोऽवोचद्वचस्त्विस्ते, करिष्ये निश्चितं वचः । त्वत्प्रसत्त्या प्रयात्वेषा, सापत्न्यादिव निःस्वता ॥ ९७ ॥ सोऽप्यूचे वत्स ! यद्येवं, कुतोऽप्यानय तच्छवम् । अक्षतं सोऽपि तं प्राप, तदोद्बद्धं नरं द्रुमे ॥ ९८ ॥ रात्रौ कृष्णचतुर्दश्यां, शिवेनानाय्य तं शवम् । त्रिदण्डी कुसुमादींश्च, श्मशाने स्वयमप्यगात् ॥ ९९ ॥ कुत्रापि यच्छारदमेघशुभ्रादभ्रास्थिभिर्जातमिवोग्रदन्तम् कुत्रापि चित्याज्वलितानलोद्यज्ज्वालाचयैः पल्लवितान्तरिक्षम् ॥ १०० ॥ कुत्रापि निःशंकविकीर्णकेशदुःशाकिनीक्रीडनदुर्निरीक्ष्यम् । कुत्रापि कंकालकरालकालवेतालमालाकलिताट्टहासम् ॥ १०१ ॥ कुत्रापि रक्षोभिरतीव भीष्मं, कुत्रापि भूतैरतिभीतिहेतुः । कुत्रापि घूघूत्कृतिघोरघूकं, कुत्रापि रौद्रं च शिवारवेण ॥ १०२ ॥ त्रिभिर्विशेषकम् । त्रिदण्डी मण्डलं तत्र, दीप्रदीपकमण्डलम् । चक्रे तत्र न्यधात्तीक्ष्णखड्गव्यग्रकरं शवम् ॥ १०३ ॥ मृतकांहितलाभ्यंगविधावादिश्य

१ स्तोकं २ आग्रहात् ३ विद्वन् ! ४ दरिद्रता ५ मृतकं ६ शुक्लप्रचुरैः ७ चितासमूहः ८ गगनं ९ अस्थि १० समूहः

वन्दारु-वृत्तौ नमस्कारे ॥ १० ॥

शिवस्य सुवर्णपुरुष सिद्धिः

तं शिवम् । स्वयं तु निश्चलस्वान्तो, मंत्रं सस्मार दुष्टधीः ॥ १०४ ॥ स्वान्ते स्वस्मिन् शिवोऽध्यासीत्, दैवादापद्गतोऽथ सः । प्रचुरोपद्रवं तावत्, श्मशानं भीषणा क्षपा ॥ १०५ ॥ कपाली क्रूरकर्माऽयमकोशासिकरः शवः । निहंतुं मेऽस्य तन्नूनं, सर्वोऽप्ययमुपक्रमः ॥ १०६ ॥ नेशे सम्प्रति नंष्टुं तत्किं कुर्वे कस्य वा ब्रुवे ? । एवं जातभयोऽस्मार्षीत्पित्रादेशं शिवस्तदा ॥ १०७ ॥ ततः सस्मार सर्वापद्भेत्रीं कर्त्रीं च संपदाम् । तदेकाग्रमनाः पंचपरमेष्ठिनमस्क्रियाम् ॥ १०८ ॥ क्षणात् त्रिदण्डिनस्तस्य, तीव्रमंत्रवशाच्छवः । अचालीत्किंचिदुत्तस्थौ, पपाताथ तथैव सः ॥ १०९ ॥ त्रिदण्डी पतनात्तस्य, लक्षयन् क्षणमात्मनः । स्थिरचित्तो विशेषेण, मंत्रं भूयोऽपि सोऽस्मरत् ॥ ११० ॥ तथैवोत्थाय होमान्ते, तथैव पतितः शवः । अपृच्छच्छिवमेषोऽथ, मंत्रं किमपि वेत्सि किम् ? ॥ १११ ॥ न वेद्मीत्यवदत्सोऽपि, फलं जानन्नमस्कृतेः । ततो भूयोऽपि तौ यत्नान्मंत्रं सस्मरतुः स्वकम् ॥ ११२ ॥ नमस्कारवशात्कर्तुं, शिवस्याशिवमीश्वरः । न किंचित्क्रुद्धवेतालविवशोऽपि शवस्ततः ॥११३॥ क्षणात् त्रिदण्डिनो मुण्डं, खड्गदण्डेन तेन सः । फलं तालद्रुमस्येव, छित्त्वा भूम्यामपातयत् ॥ ११४ ॥ मन्त्राधिष्ठितनिस्त्रिंशच्छिन्नदेहोऽथ तत्र सः । सुवर्णपुरुषो जज्ञे, मन्त्रो हि महिमाद्भुतः ॥ ११५ ॥ शिवोऽथ शवसंयुक्तं, वसुधाऽन्तर्निधाय तम् । दिनोदये गृहं प्राप, स्फुरत्पुण्योदयः सुधीः ॥ ११६ ॥ राज्ञे निवेद्य तं सर्वं, वृत्तान्तं दमितारये । आनिन्ये तद्गिरा स्वस्मिन्, गृहे तं स्वर्णपूरुषम् ॥ ११७ ॥ एतस्य प्रत्यहं कृन्तैरंगोपांगैः प्रसूनवत् । प्रातः प्रातः पुनर्भूतैर्महेभ्यः सोऽचिरादभूत् ॥ ११८ ॥ ज्ञात्वा धर्मफलं चित्ते, शिवो वित्तं च गत्वरम् । दानं भोगांश्च तन्वानश्चारु चैत्यमिदं व्यधात् ॥ ११९ ॥ इति निशम्य शिवस्य कथानकं, नृपसुतो निजगाद वयस्य ! किम् । इह

॥ १० ॥

१ मनः २ प्रभवामि ३ अवसरम् ४ क्षमः ५ शिरः ६ खड्गः ७ छिन्नैः ८ नाशशीलं ९ कुर्वन्.

भवेऽपि नमस्कृतिवैभवं, स्फुरति पश्य विपादितविप्लवम्? ॥१२०॥'इहलोगंमि तिदंडी'त्येतद्व्याख्यातम्, साम्प्रतं द्वितीयपदे ऐहिकफल एव 'सादिव्व'मित्येतद्व्याख्यते—

ततो नृपसुतः प्राप, पुरं पोतननामकम्। तत्राश्रमोऽपि बभ्राम, तदालोकनकौतुकी ॥ १२१ ॥ ततश्चैकत्र विन्य[1]स्तमौक्तिकस्वस्तिकांकितम्। सुगन्धि कुंकुमो[2]म्भोभिः, सर्वतः सिक्तभूतलम् ॥ १२२ ॥ अखण्डैः शंखवत् शुभ्रैरक्षतैः परिपूरितैः। प्रविशद्भिः सुसंकीर्णं, स्वर्णस्थालैः सहस्रशः ॥ १२३ ॥ विहितस्फा[3]रशृंगारसारैरविधवाजनैः। गीयमानमहाध्वानस्फुरद्धवलमंगलम् ॥ १२४ ॥ अनेकमार्गणा[4]दीनां, दीयमानमहाधनम्। साधर्मिकजनानां च, क्रियमाणोरु[5]भक्तिकम् ॥ १२५ ॥ अलक्षितविवाहादिलक्षणं तत्र पत्तने। कुमारोऽपश्यदेकस्मिन्, श्रीमद्गेहे महोत्सवम् ॥ १२६ ॥ पंचभिः कुलकम्। अपृच्छच्च नरं कंचित्, किमत्रोत्सवकारणम्?। सोऽवोचत् श्रूयतामेष, वृत्तान्तश्चित्रकृ[6]त्तमः ॥ १२७ ॥ गुप्तेन्द्रियः पुरेऽत्रास्ति, महेभ्यः सुगताभिधः। श्रावकः श्रावकाचारविचारचतुराशयः ॥ १२८ ॥ रूपान्तरधरीव श्रीस्तत्पुत्री श्रीमतीत्यभूत्। सदा सदाऽऽगमाभ्यासविशुद्ध्या शुद्धधर्मभृत् ॥ १२९ ॥ मिथ्यादृक्कश्चिदत्रत्यः, सुरूपः सुभगाग्रणीः[7]। श्रेष्ठिसूनुरनून[8]श्रीरन्यदा तामुदैक्षत ॥ १३० ॥ तद्रूपमोहितोऽत्यर्थं, सोऽथ प्रार्थ्य कथंचन। परिणिन्ये महद्‌र्ध्या तामानिन्ये च निजौकसि[9] ॥ १३१ ॥ वसन्ती तत्र तत्रत्यं, कृत्यं सर्वमसौ व्यधात्। न स्तोकमपि मिथ्यात्वं, किन्त्वेकं परमार्हती[10] ॥ १३२ ॥ शनैः शनैस्ततस्तस्या, ननन्द्राद्याखिलो जनः। जैनं धर्मं दधानायाः, प्रचुकोप पदे पदे ॥ १३३ ॥ तथाप्यचलचित्ता सा, कर्मवैचित्र्यचिन्तका। न स्वार्थं श्लथयामास, स्वार्थभ्रंशो हि मूर्खता ॥ १३४ ॥ शीलादिगु-

१ स्थापिताः २ काश्मीरजं ३ उदारः ४ याचकानां ५ विशाला ६ आश्चर्यकारकः ७ नायकः ८ संपूर्णधनः ९ गृहे १० श्राविका.

णयुक्ताया, अपि तस्याः प्रियोऽपि हि । व्यरांक्षीत् क्षुद्रदृष्टित्वाद्, दृष्टिरागो हि दुस्त्यजः ॥ १३५ ॥ उद्विग्नःक्षुर्वधूमन्यां, जिघांसुस्तां च सोऽक्षिपत् । घटे सर्पं गृहस्यान्तः, प्रच्छन्नं छादितोंऽहसा ॥ १३६ ॥ निषद्य चित्रशालायां, श्रीमतीं स समादिशत् । गृहान्तः पिहितात्कुम्भात्, पुष्पाण्यानीय मेऽर्प्पय ॥ १३७ ॥ पत्यादेशं समादाय, धीमती श्रीमती भृशम् । गणयन्ती नमस्कारानावासान्तः प्रविश्य सा ॥ १३८ ॥ सुभैरवेऽपि निर्भीका, ज्ञानोद्योता तमस्यपि । पिधानं पाणिनोत्सार्य, घटे स्वं पाणिमक्षिपत् ॥ १३९ ॥ नमस्कारप्रभावेन, तुष्टा शासनदेवता । कृत्वा सर्पं सुगन्धीनि, न्यधात् पुष्पाणि तत्क्षणात् ॥ १४० ॥ गृहीत्वा श्रीमती तानि, पत्युः पाणौ समर्प्पयत् । स ततश्चकितस्तत्र, गत्वा सर्वं व्यलोकत ॥ १४१ ॥ तमसर्पं घटं दृष्ट्वा, दिव्यगन्धान्वितं च सः । मीलयित्वा ततो लोकं, तं वृत्तान्तं न्यवेदयत् ॥ १४२ ॥ लगित्वा पादयोस्तस्याः, श्रीमत्याः शुद्धमानसः । स्वागः स क्षमयामास, वर्णयामास तां मुहुः ॥१४३॥ तन्वंगी तमथोचे मे, तनुरप्यस्ति न क्रुधा । जानात्वात्महितं किं तु, भवानद्यापि मद्गिरा ॥ १४४ ॥ उपसन्नस्य तस्याथ, साऽर्हद्धर्ममचीकथत् । स्वकर्मविवरं प्राप्य, तदाऽसौ बोधमासदत् ॥ १४५ ॥ तुष्टः सद्धर्म्मसम्प्राप्त्या सकुटुंबोऽपि संप्रति । इति प्रवर्त्तयामास, राजपुत्र ! महोत्सवम् ॥ १४६ ॥ महाद्भुतनिबन्धनं समधिगम्य सुश्राविकाचरित्रमिति विश्रुतं नृपसुतः प्रहृष्टोऽधिकम् । उवाच सुमतिं सखे ! फलमिहैव सम्प्रेक्ष्यते, नमस्कृतिमहातरोर्न यशःसुखाद्यं महत् ॥ १४७ ॥ ( पृथ्वीवृत्तम् )– अधुनेहलोकफल एव 'मातुलिंगवनमेवे'त्येतत् ज्ञातं विव्रियते ॥ राजसिंहः समित्रोऽपि, ततः पोतनपत्तनात् । गच्छन्नग्रे क्रमात्प्राप, पुरं क्षितिप्रतिष्ठितम् ॥ १४८ ॥ तदानन्दमयं वीक्ष्य, सबाह्याभ्यन्तरं तदा । विस्मितः स्माह तत्रत्यं, मर्त्यं कंचिन्नृपा-

१ विरक्तः २ तुच्छः ३ परिणयनेच्छुः ४ हननेच्छुः ५ पापेन ६ आगः- अपराधं ७ स्वल्पा ८ प्रसन्नः ९ उदाहरणं

त्मजः ॥ १४९ ॥ किंनिमित्तमिदं वल्गद्[1]विलासोल्लाससुन्दरम् । ऊर्ध्वीकृतपताकौघं, प्रत्यक्षं प्रति मन्दिरम् ॥ १५० ॥ स्वर्णस्तंम्भोपरिन्यस्तप्रशस्तमणितोरणम् । विधीयमानमाङ्गल्यं, दधिदूर्वाक्षतादिभिः ॥ १५१ ॥ दृश्यते नगरं सर्वं, प्रमोदभरनिर्भरम् ?। इत्युक्तः स पुमानूचे, कुमार ! श्रूयतामिदम् ॥ १५२ ॥ पुरेऽत्रास्ति महीपालो, बली नाम महाबलः । बलानुज[2] इवारातेर्[3]बलिनो[4] बलसूदनः[5] ॥ १५३ ॥ वृष्टेऽन्यदाऽम्बुदेऽत्यर्थं, पृथुपूरप्रवाहिनीम् । वाहिनीं[6] नगरासन्नां, जनो द्रष्टुमगाद् द्रुतम् ॥१५४॥ दक्षमुख्यः पुरारक्षस्तत्रैकं बीजपूरकम् । प्लाव्यमानं पयःपूरैर्महामानमुदैक्षत ॥ १५५ ॥ प्रविश्य तरसा[7] तत्र, तदादाय च तत्स्वयम् । गत्वा समर्पयामास, बलराजस्य सोऽञ्जसा[8] ॥ १५६ ॥ वर्णतो गन्धतश्चापि, दृष्ट्वोत्कृष्टं सुपुष्टिकृत् । सुस्वादु च तदाऽऽस्वाद्य, मुमुदे मेदिनीपतिः ॥ १५७ ॥ राजा सत्कृत्य तं प्रोचे, कुतः प्राप्तमिदं त्वया ? । सोऽप्युवाच नदीपूरे, ततो राजा तमभ्यधात् ॥ १५८ ॥ अमुष्य मातुलिंगस्य[9], मूलोत्थानं गवेषय । नद्यास्तीरे व्रजन्नूर्ध्वमेष प्रैक्षिष्ट तद्वनम् ॥ १५९ ॥ तदन्तः प्रविशन्नूचे, स गोपैस्तत्समीपगैः । भो अत्र यः फलं लाति, मृत्युमेति स निश्चितम् ॥ १६० ॥ व्यावृत्त्य तमसौ राज्ञे, वृत्तान्तं प्रत्यपीपदत्[10] । राजा तु त्यक्तमर्यादस्तं प्रतीदमभाषत ॥ १६१ ॥ प्रवेश्य तत्र वारेण, पुरादेकैकमानुषम् । आनेतव्यं त्वयाऽवश्यं, बीजपूरं ततोऽन्वहम् ॥ १६२ ॥ आरक्षः पुरलोकानां, लिखित्वा नामपत्रिकाम् । घटे क्षिप्त्वाऽन्वहं चैकां, कुमार्याऽऽकर्षयत्ततः ॥ १६३ ॥ निर्ययौ पत्रिका यस्य, कृतान्तस्येव दूतिका । आरक्षोऽग्राहयत्तेन, मातुलिङ्गं ततो वनात् ॥१६४॥ तदर्पयति राज्ञेऽसौ, मर्त्यस्तु म्रियतेऽथ सः । जनेष्वेवं विनश्यत्सु, विषसादाखिलं पुरम् ॥ १६५ ॥ श्राद्धस्य जिनदासस्य, निर्ययौ पत्रिकाऽन्यदा । गृहचैत्यानि सोऽर्चित्वा, क्षमयित्वा स्वमानुषान् ॥ १६६ ॥

१ प्रवर्त्तमानाः २ कृष्णः ३ शत्रोः ४ दैत्यस्य समर्थस्य वा ५ नाशकः ६ नदीं ७ वेगेन ८ शीघ्रं ९ बीजपूरस्य १० प्रत्यपादयत्.

वन्दारु-वृत्तौ नमस्कारे

॥ १४ ॥

प्रत्याख्याय स साकारं, निर्विकारमनास्ततः । तद्वनं मातुलिङ्गाय, लीलावनमिवागमत् ॥ १६७ ॥ सुधीरुच्चैःस्वरं धीरो, नमस्कारं समुद्गृणन् । जिनदासो वनस्यान्तः, प्रविवेश समाहितः ॥ १६८ ॥ वनाधिष्ठायकः क्षुद्रव्यन्तरोऽथ निशम्य तम् । विराधितव्रतं स्मृत्वा, प्राग्जन्म प्रत्यबुध्यत ॥१६९॥ कृताञ्जलिपुटः सोऽद्य, प्रत्यक्षीभूय तत्क्षणात् । श्रावकं तं नमस्कृत्य, गुरुभक्त्याऽब्रवीदिदम् ॥ १७० ॥ त्वं मे गुरुः सदाऽऽराध्यो, धर्मबोधविधानतः । वितरिष्यामि ते नित्यं, स्थानस्थस्यैव तत्फलम् ॥ १७१ ॥ व्यावृत्त्य कृतकृत्यस्तं, वृत्तान्तं नृपतेर्जगौ । अश्नुते च फलं शश्वदेकैकं व्यन्तरादसौ ॥ १७२ ॥ विश्राणयति राज्ञे तत्तुष्टोऽत्यर्थं ततो नृपः । जिनधर्मं स्तुवन्नुच्चैर्जिनदासमपूजयत् ॥ १७३ ॥ सकलेऽपि पुरे हर्षात्पुनर्जात इवाधुना । राजपुत्र ! धराधीश, इत्युत्सवमकारयत् ॥ १७४ ॥ इति विबुध्य तदुत्सवकारणं, सुमतिमित्रमुवाच नृपात्मजः । फलमिदं परमेष्ठिनमस्कृतेरिह भवेऽपि सुखावहमीक्ष्यते ॥ १७५ ॥ ( द्रुतविलम्बितम् ) इदानीं नमस्कारस्य परलोकफले चण्डपिङ्गलदृष्टान्तो व्याख्यायते—

मातुलिंग-वनं चंडपिंगलः

राजपुत्रः समित्रोऽपि, नानाद्भुतयुतां ततः । वीक्षमाणः क्रमेणोर्वीं, वसन्तपुरमासदत् ॥ १७६ ॥ तत्राशेषजनं वीक्ष्य, स नमस्कारतत्परम् । सुमतिं प्रत्युवाचैवं, विस्मयस्मेरमानसः ॥१७७॥ मित्रात्रत्यः समस्तोऽपि, लोकः पञ्चनमस्कृतिम् । पापठ्यते विना शाठ्यं, तदत्रावेहि कारणम् ॥ १७८ ॥ कुतश्चित् पुरुषादेष, तदवेत्य समेत्य च । कुमारस्य पुरोऽवादीज्जितमारस्य रूपतः ॥१७९॥ परन्तपः पुरेऽत्रासीज्जितशत्रुर्महीपतिः । भद्राभिधाना तस्याभूद्देवी भद्रगुणान्विता ॥ १८० ॥ चौरः कदाचिदत्रैत्य, कुतश्चिच्चण्डपिङ्गलः । प्रचण्डश्चौरिकां कुर्वन्, पुरमेतदपीडयत् ॥ १८१ ॥ भूमीभुजोऽन्यदा भित्त्वा, भाण्डागारमसौ ततः । जहे मनोहरं हारं, ॥ १४ ॥

१ ददाति २ आश्चर्यविकसितचित्तः ३ मायां ४ कामः ५ शूरः ६ महाराज्ञी ७ कल्याणकृत् ८ राज्ञः

नक्षत्रश्रेणिसुन्दरम् ॥ १८२ ॥ गुणतोऽपि कलावत्याः, कलावत्याः स तस्करः। गणिकाया गृहे गत्वा, हारं तस्यै ददौ मुदा ॥ १८३ ॥ सा किंचिच्छ्राविका सोऽपि, भेजे भोगाँस्तया समम् । आगादथ कृतानङ्गरङ्गाऽनङ्गत्रयोदशी ॥ १८४ ॥ वेश्यास्तस्यामयुः[1] सर्वाः, सर्वर्द्ध्या क्रीडितुं वने । दिक्चक्रे शक्रचाप[2]श्रीं, तन्वाना रत्नभूषणैः ॥ १८५ ॥ कलावत्यपि तं हारं, बिभ्रती हृदि ताः समाः[3]। जेतुकामा स्वरूपेण, कामपत्नीव निर्ययौ ॥ १८६ ॥ महादेव्याँ[4]स्तदा दास्यस्तत्र जग्मुर्निरीक्षितुम् । वीक्ष्योपलक्षयामासुस्तं हारमतिहा[5]रिणम् ॥१८७॥ भद्रान्तिके द्रुतं गत्वा, दास्यस्तास्तं न्यवीविदन् । एषाप्याख्यत् क्षितीशाय, सोऽप्युवाचेति वेत्रिणम् ॥ १८८ ॥ अद्य कल्ये वसत्येषा, केन सार्धं कलावती ? । तं ज्ञात्वा दस्युना[6] चण्डपिंगलेनेति सोऽवदत् ॥ १८९ ॥ कलावत्या गृहं राजा, वेष्टयित्वा समन्ततः । ग्राहयित्वा च तं चौरं, शूलिकायामचिक्षिपत् ॥ १९० ॥ ज्ञात्वा तं शूलिकाविद्धं, दध्याविति कलावती । मत्प्रमादादयं प्रापदवस्थामीदृशीं हहा ॥ १९१ ॥ कृतं[7] मत्तो विमुच्यैनमपरैः पुरुषैः खलु । सम्प्रत्येतस्य दास्यामि, परमेष्ठिनमस्क्रियाम् ॥ १९२ ॥ ध्यात्वेति धीमती तत्र, गत्वा पंचनमस्कृतिम् । श्रेयस्करीमदात्तस्मै, तस्कराय यशस्करीम् ॥१९३॥ नमस्कारवशादस्य, सुतः स्यां भूपतेरिति । निदानं कारयामास, तं सा मंत्रं परीक्षितुम् ॥ १९४ ॥ मृत्वाऽमुष्य महीशस्य, दुष्कर्मापि स तस्करः । महादेव्याः सुतो जज्ञे, **नमस्कारो हि कामधुक्** ॥ १९५ ॥ ततोऽस्यातिप्रबन्धेन, कृत्वा जन्मोत्सवं पिता । पुरन्दर इति ख्यातं, नामधेयं मुदा व्यधात् ॥ १९६ ॥ तन्मृत्योरस्य गर्भस्य, कालं ज्ञात्वा कलावती । समानं मनसाऽध्यासीन्नन्वेष स मम प्रियः ॥ १९७ ॥ रमयन्ती ततो भूपनन्दनं सा मुहुर्मुहुः । कुर्वन्तं रोदनं प्राह, मा रुदश्चण्डपिंगल ! ॥ १९८ ॥

१ अगच्छन् २ दिक्समूहे इन्द्रधनुः ३ सर्वाः ४ पट्टराज्ञ्याः ५ मनोहरं ६ चौरेण ७ अलं

नाम स्वं प्राच्यमुत्कर्णो, नित्यमाकर्णयन्नसौ । पश्यन्नास्यं तथैतस्याः, सस्मार प्राग्भवं निजम् ॥ १९९ ॥ गतेऽथ जितशत्रौ द्यां, नृपोऽत्राभूत्पुरन्दरः । त्यक्तान्यसंगमां मत्वा, भेजे चासौ कलावतीम् ॥ २०० ॥ परमेष्ठिनमस्कारफलमेतदवेत्य सः । जिनधर्मरतोऽधीते, सदा पञ्चनमस्कृतिम् ॥ २०१ ॥ ततोऽसौ सर्वलोकोऽपि, तामधीते कृतादरः । न खल्वेषा मृषा भाषा, यथा राजा तथा प्रजाः ॥ २०२ ॥ अथ सुमतिमुखेनाख्यातमेतन्निशम्य, क्षितिपतिसुत एषोऽत्यन्ततुष्टान्तरात्मा । सुहृदमिदमवोचत्पश्य मन्त्रेश्वरस्य, स्फुरित[1]मिति परत्रा[2]मुष्य चौरस्य कीदृक् ? ॥ २०३ ॥ [ मालिनी ] सम्प्रति प्रेत्यफल एव हुण्डिकयक्षदृष्टान्तो वितन्यते—

राजसिंहस्ततोऽन्यत्र, गच्छन् सुमतिसंयुतः । मथुरायां दिशि प्राच्यां[3], यक्षायतनमैक्षत ॥ २०४ ॥ निर्मापितं च तस्याग्रे, शूलाभिन्नं च तस्करम् । दीयमाननमस्कारमिव श्राद्धार्चया[4]न्वितम् ॥ २०५ ॥ अपूर्वमिदमाश्चर्यं, दृष्ट्वा राजमृगांकसूः । ऊचे तत्पूजकं भद्र !, वृत्तान्तोऽयं निवेद्यताम् ॥ २०६ ॥ सोऽब्रवीदिह राजास्ति, यथार्थः शत्रुमर्दनः । हितः पितेव शिष्टानामशिष्टानां कृतान्तवत् ॥२०७॥ तथाऽत्र जिनदत्ताख्यः, श्रेष्ठी श्रावककुञ्जरः[5] । करुणारसपाथोधिः, सत्त्व[6]रत्नमहानिधिः ॥२०८॥ अत्रैकदा कुतोऽप्येत्य, हुण्डिको नाम तस्करः । अलक्ष्यश्चौरिकां चक्रे, सततं विश्वविश्रुतः[7] ॥ २०९ ॥ सोऽन्यदा श्रीमतो गेहात्, खात्रेण स्वर्णमग्रहीत् । प्रबुद्धेनाथ पूच्चक्रे, गृहलोकेन तत्क्षणात् ॥ २१० ॥ ततश्चारक्षपुरुषैर्वेष्टयित्वा समन्ततः । सलोप्त्रः[8] स गृहीतस्तैर्न हि गोधा बिले बिले ॥ २११ ॥ निवेदितोऽथ राज्ञस्तैस्तस्करो भास्करोदये । विश्ववैरी विडम्ब्यासौ,

१ महिमानं २ भवान्तरे ३ पूर्वस्यां ४ प्रतिमया ५ श्रावकोत्तमः ६ धैर्य ७ प्रसिद्धः ८ चौरितवस्तुयुतः

वन्दारु-वृत्तौ नमस्कारे

॥ १७ ॥

हुंडिकयक्ष-वृत्तं

हन्यतामित्युवाच सः ॥२१२॥ निम्बपत्रस्रजा रक्तकरवीरस्रजा च तैः । शरावमालिकाद्यैश्च, मण्डितो वध्यमण्डनैः ॥२१३॥ जीर्ण-शीर्णकलिञ्जेन, ध्रियमाणेन मूर्धनि । कण्ठक्षिप्तेन लोप्त्रेण, दूरादपि स लक्षितः ॥ २१४ ॥ समारोप्य खरे कर्णे, डिण्डिमास्फाल-पूर्वकम् । उच्चैरुद्घोषयांचक्रे, तदागश्चत्वरादिषु ॥ २१५ ॥ भो भोः भृणुत हे लोकाश्चौरिकामीदृशीमसौ । यच्चक्रे हुण्डिकस्तेन, नीयते वध्यधामनि ॥ २१६ ॥ आत्मनीना जनास्तद्भो, मा कार्षीत्कोऽपि चौरिकाम् । न्यायचञ्चुर्नृपः स्वस्याप्यन्यायं न सहि-ष्यते ॥ २१७ ॥ ततस्तैस्ताड्यमानोऽसौ, यष्टिलोष्टादिभिर्भृशम् । निष्कृपैः शप्यमानश्च, स्वपापफलमाप्नुहि ॥ २१८ ॥ सज्जनैर्वी-क्ष्यमाणश्च, कृपामन्थरलोचनैः । सदा प्रमत्तैः खिड्गाद्यैर्हस्यमानः पदे पदे ॥ २१९ ॥ विपाकः कर्मणां हीति, चिन्त्यमानः सुयोगिभिः । ईदृशानि च पापानि, न कार्याणीति वादिभिः ॥ २२० ॥ दुर्दान्तडिम्भसङ्घातैः, समन्तात्परिवेष्टितः । कान्दिशी-कः समग्रासु, चक्षुषी दिक्षु विक्षिपन् ॥ २२१ ॥ एवं विडम्बनापूर्वं, भ्रामयित्वाऽखिले पुरे । आघातभूमिकां निन्ये, नगरारक्षकै-स्ततः ॥ २२२ ॥ क्षिप्त्वा तं शूलिकायां ते, मुमुचुश्चरपूरुषान् । कस्कोऽस्य कुरुते किं किं?, येन सोऽपि निगृह्यते ॥ २२३ ॥ तत-श्चातपतप्तस्य, तस्यासृग्विनिसर्गतः । तृषाऽत्यर्थं समुत्पेदे, धिगिमां या तदाप्यभूत् ॥ २२४ ॥ यः प्रयाति तदासन्नं, सलिलं तम-याचत । न कोऽपि पाययामास, भीमभूपतिभीलुकः ॥ २२५ ॥ श्रेष्ठ्यागाज्जिनदत्तोऽथ, पथा तेन तमप्यसौ । ययाचे तदथो-पेत्य, सदयोऽसौ तमब्रवीत् ॥ २२६ ॥ पानीयं पाययिष्यामि, किन्तु पञ्चनमस्कृतिम् । तत्परः स्मर येन त्वं, लभेथाः

॥ १७ ॥

१ कुशूलेन २ अपराधः ३ आत्महिताः ४ निपुणः ५ चंचलैः ६ अधमाः ७ बालकाः ८ निराधारः ९ वध्यस्य १० रुधिरं ११ जलं १२ भीरुः १३ जलं.

सुगतिं यतः ॥ २२७ ॥ हिंसावाननृतप्रियः परधनाहर्त्ता परस्त्रीरतः, किञ्चान्येष्वपि लोकगर्हितमहापापेषु गाढोद्यतः । मन्त्रेशं स यदि स्मरेदविरतं प्राणात्यये सर्वथा, दुष्कर्मार्जितदुर्गदुर्गतिरपि स्वर्गीभवेन्मानवः ॥ २२८ ॥ ( शार्दूलविक्रीडितम् ) ततस्तं श्रावकेणोक्तं, नमस्कारं मुहुर्मुहुः । सर्वापत्सारेविस्मारं, संसस्मार स तस्करः ॥ २२९ ॥ श्रावकोऽथ गृहं गत्वा, गृहीत्वा करकं[3] करे । यावदायात् द्रुतं तावत्, पञ्चत्वं[4] प्राप तस्करः ॥ २३० ॥ महर्द्धिकेषु यक्षेषु, देवत्वेनोपपद्यत । यादृशी मतिरन्ते हि, गतिः स्यात् खलु तादृशी ॥२३१॥ इतश्च तैर्नरैर्गुप्तैर्गत्वा राज्ञे निवेदितः । जिनदत्तस्य वृत्तान्तः, सोऽथ तं वध्यमादिशत् ॥ २३२ ॥ ततश्चारक्षकैर्मङ्क्षु[5], स समारोप्य रासभे[6] । विडम्बयितुमारेभे, यावत्तावत्स यक्षराट् ॥ २३३ ॥ अवधिज्ञानतो ज्ञात्वा, स्वगुरोरीदृशीं दशाम् । निर्माय[7] पर्वतं चैकं, निर्मायः[8] सोऽब्रवीदिदम् ॥ २३४ ॥ आकर्णयत राजाद्या, अरे रे पुरुषब्रुवाः[9] । चूरयिष्यामि वः सर्वान्, भूधरेणामुना ध्रुवम् ॥ २३५ ॥ यदमुष्य कृपाम्भोधेर्जगतोऽपि हितैषिणः । एवं विडम्बनाऽऽरब्धा, जिनदत्तस्य मत्प्रभोः ॥ २३६ ॥ ततः सरभसं[10] राजा, सपौरः सपरिच्छदः[11] । पुष्पादिभिः समानर्च, मृत्युभीर्महती हि भीः ॥ २३७ ॥ व्यजिज्ञपच्च नत्वैवं, स्वामिन्नः क्षम्यतामिदम् । अज्ञानादपराद्धं यत्, सन्तो हि नतवत्सलाः ॥ २३८ ॥ यक्षोऽवोचदमुं श्राद्धं, श्रयध्वं शरणं जनाः! । कारयध्वं च पूर्वस्यां, मदायतनमुच्चकैः[12] ॥ २३९ ॥ ततो राजा समारोप्य, श्रेष्ठिनं गन्धसिन्धुरे[13] । पुरे प्रवेशयामास, क्षमयामास चासकृत् ॥ २४० ॥ तथा हुण्डिकयक्षस्य, चैत्यमेतदकारयत् । शूलाभिन्नां च तन्मूर्त्तिं, श्रावकप्रतिमायुताम्

१ देवः २ सर्वदुःखतत्त्वनाशकं ३ लघुघटं ४ मरणं ५ शीघ्रं ६ खरे ७ कृत्वा ८ मायारहितः ९ अधमपुरुषाः १० वेगेन ११ परिवारः १२ चैत्यं १३ हस्तिनि.

॥ २४१ ॥ इत्याकर्ण्य नृपात्मजः प्रमुदितो मित्रं प्रतीदं जगौ, चौरोऽप्येष नमस्कृतिस्मृतिवशाज्जज्ञे यथा यक्षराट् । तद्वद्राजकुलेऽधुना समभवं पूर्वं पुलिन्द्रोऽप्यहं, कीदृग् भोः परमेष्ठिमन्त्रललितं प्रेत्यात्र सम्प्रेक्ष्यते ॥ २४२ ॥ ( शार्दूलविक्रीडितम् ) श्रुत्वेति सुमतिः प्रोचे, राजपुत्रं कृतादरः । पुलिन्द्रता कथं तेऽभूद्, ब्रूहि सौहार्दसुन्दर! ॥२४३॥ कुमारोऽपि नमस्कारसारं पूर्वभवं निजम् । हर्षप्रकर्षादाचख्यौ, सख्यु[1]रग्रे यथास्थितम् ॥ २४४ ॥ स्मित्वा[2]ऽथ सुमतिः प्रोचे, मन्ये रत्नवतीं भवान् । परिणेतुं पुराजन्मपत्नीं प्रचलितो ननु ॥ २४५ ॥ वेषेण पुरुषस्यैषा, पुरुषद्वेषिणी कथम् । संवीक्षितुमपि प्राप्या ?, दूरे सम्भाषणादिकम् ॥२४६॥ सोऽवोचत्सर्वकार्येषु, सावधानो विधिः सखे! । तत्कथं क्रियते चिन्ता ?. चित्तसन्तापिका यतः ॥२४७॥ **अघटितघटितानि घटयति, सुघटितघटितानि जर्जरीकुरुते । विधिरेव तानि घटयति यानि पुमान्नैव चिन्तयति** ॥ २४८ ॥ (आर्या) राजसिंहो नमस्कारज्ञातान्येतान्यथ स्मरन् । प्रचचाल पुरो गन्तुं, समित्रोऽपि ततः पुरात् ॥२४९॥ क्रमेण पृथिवीं क्रामन्नरण्यानीं[3] गतोऽन्यदा । ततस्तृष्णाऽऽतपश्रान्तः[4], प्रापदेकं सरोवरम् ॥ २५० ॥ उत्फुल्लपङ्कजाकीर्णं, यद्रेजे निर्मलोदकम् । वियत्ताराव्रजव्याप्तं[5], विश्रान्त[6]मिव भूतले ॥ २५१ ॥ कृत्वा स्नानादि तत्तीरे, सहकार[7]तरोस्तले । क्षणं खेदापनोदाय, सुष्वाप क्ष्मापतेः सुतः ॥ २५२ ॥ लतान्तरितगात्रोऽथ, सुमतिः कुसुमोच्चयम्[8] । कुर्वाणो नभसाऽद्राक्षीदायातं तत्र खेचरम् ॥२५३॥ वीक्ष्यामरकुमाराभं, कुमारं सोऽप्यचिन्तयत् । ममानुपदिका[9] कान्ता, दृष्ट्वाऽस्मिन्ननुरंक्ष्यति ॥२५४॥ ततश्चासौ लतागुल्माद्, गृहीत्वौषधिमम्भसा । घृष्ट्वा तच्छटयाऽऽच्छोट्य, ललाटे तं स्त्रियं व्यधात् ॥ २५५ ॥ गते विद्याधरे तत्र, तत्कान्ताप्याजगाम सा । स्त्रीरूपां रतिरूपां तां, विलोक्येति व्यचिन्तयत्

१ मित्रस्य २ हसित्वा ३ महदरण्यं ४ खिन्नः ५ तारकासमूहयुतं गगनमिव ६ आगतं ७ आम्रः ८ संग्रहं ९ पश्चात्

वन्दारु-वृत्तौ नमस्कारे



॥ २५६ ॥ दृष्ट्वैनां मत्पतिर्नूनं, निवृत्तोऽनेन वर्त्मना । रक्तोऽमुष्यां हि मामेष, त्यक्ष्यतीति विषेदुषी[1] ॥ २५७ ॥ तत्रत्यामौषधीं लात्वा, विद्याधरवधूः सुधीः । विधाय विधिना तेन, पुँरूपां तां ततो ययौ ॥ २५८ ॥ तदादाय प्रबुद्धस्य, दर्शयन्नौषधीयुगम् । राजसूनोः प्रबन्धं तं, सुमतिः प्रत्यपीपदत् ॥ २५९ ॥ इत्युग्रपुण्यसम्भारसारो राजमृगाङ्कसूः । समित्रोऽपि क्रमात्प्राप, ततः पद्मपुरं पुरम् ॥ २६० ॥ प्रासादे तत्र सौवर्णे, तस्थौ सुस्थः स्थिराशयः । चिन्तारत्नप्रभावेण, जातसर्वसमीहितः ॥ २६१ ॥ सर्वेषूत्सार्यमाणेषु, नृषु चक्षुःपथादथ । रत्नवत्यन्यदा चैत्ये, ययौ स्त्रीभिः समावृता ॥ २६२ ॥ स्त्रीरूपौ तावुभौ भूत्वा, गत्वा प्राक् तत्र तस्थतुः । अर्च्चामानर्च्चे जैनेन्द्रीं, साऽथ स्रक्चन्दनादिभिः ॥ २६३ ॥ प्रतियान्ती तु सा तत्र, पद्माक्षी पद्मपुत्रिका । प्रेक्षांचक्रे कुमारस्त्रीं, सुरस्त्रीमिव सुन्दराम् ॥ २६४ ॥ सहर्षं सुचिरं वीक्ष्य, कुमारी तामभाषत । अपूर्वेव ममाभाति, भवत्यागाः[2] कुतस्ततः ? ॥ २६५ ॥ मित्रस्त्र्यूचेऽन्यतः स्थानान्मत्सखीयमिहाययौ । ततो रत्नवती भूयोऽप्युवाचेति वचस्विनी[3] ॥ २६६ ॥ त्वत्सखी मम दृष्टापि, चन्द्रज्योत्स्नाऽम्बुधेरिव । कुरुते भृशमुल्लासं, तदायातु मदोकसि[4] ॥ २६७ ॥ एवं निष्कृत्रिमं[5] प्रोक्ते, जग्मतुः कृत्रिमस्त्रियौ । तया च कृतसत्कारे, चिरं तत्रैव तस्थतुः ॥ २६८ ॥ कथान्तरेऽन्यदाऽवादीत्कुमारस्त्री नृपात्मजाम् । तावन्न जायतेऽद्यापि, पतिस्ते स पुलिन्द्रकः ॥ २६९ ॥ अनुरूपं विना कान्तं[6], कमनीयापि[7] कन्यका । मणीव स्वर्णसम्बन्धं, विना नूनं न राजते ॥ २७० ॥ भुवनानन्ददं कञ्चित्ततस्त्वं नृपनन्दनम् । स्वयंवरागतं वीक्ष्य, विवाहयितुमर्हसि ॥ २७१ ॥ ततो रत्नवतीत्यूचे, मुक्त्वा तं प्राग्भवप्रियम् । अवश्यं न करिष्येऽहमपि स्वर्गपतिं[8] पतिम् ॥ २७२ ॥ कुमारस्त्री जगादैवं, यद्येवं तव यौवनम् । विना भोगान् वृथाऽरण्ये,

पद्मपुरे स्त्रीरूपिणौ नृपामात्य-कुमारौ

॥ २० ॥

---

१ विषादं गता २ त्वमागच्छः ३ पंडिता ४ गृहे ५ स्वाभाविकं ६ पतिं ७ मनोहरा ८ इन्द्रं.

वन्दारु-वृत्तौ नमस्कारे



पद्मपुरे स्त्रीरूपिणौ नृपामात्य-कुमारौ

मालतया मुकुलं[1] यथा !! २७३ ॥ रत्नवत्यवदच्चित्तविश्रान्त्यै क्रियते पतिः । सा[2] च त्वय्येव मेऽत्यर्थं, कार्यं नान्येन केनचित् ॥ २७४ ॥ तां पुलिन्द्रवरस्त्र्यूचे, स पुलिन्द्रो धवस्तव । लक्ष्यो हि लक्ष्मणा[3] केन ?, समाख्याहि मृगाक्षि ! मे ॥ २७५ ॥ ततः पद्मसुताऽवोचत्प्राक्कृतं सुकृतं मम । यो जानाति स विज्ञेयः, प्राणेशो[4] मम निश्चितम् ॥ २७६ ॥ बभाषे राजसिंहस्त्री, दमसारर्षिभाषितम् । मन्त्रेशमनिशं स्मृत्वा, मृत्वाऽभूस्त्वं नृपात्मजा ॥ २७७ ॥ श्रुत्वेति रत्नवत्याख्यचन्द्रलेखां सखीमसौ । किं स्वतः परतो वा मे, वेत्ति वृत्तान्तमेतकम् ? ॥ २७८ ॥ साऽऽख्यदेषा स्वतो वेत्ति, यदस्यां ते मनोरतिः । दृश्यतेऽस्या नरस्येव, चेष्टा च वचनादिका ॥ २७९ ॥ विकारास्ते[5] स्मरस्यास्याः, समीपे च स्फुरन्ति ते । कामशास्त्रेषु ये प्रोक्ताः, स्त्रीणां प्रियसमागमे ॥ २८० ॥ यदाह--स्त्री कान्तं वीक्ष्य नाभीं प्रकटयति मुहुर्विक्षिपन्ती कटाक्षान्, दोर्मूलं दर्शयन्ती रचयति कुसुमापीडमुत्क्षिप्तपाणिः । रोमाञ्चस्वेदजृम्भाः श्रयति कुचतटस्रांसि वस्त्रं विधत्ते, सोत्कण्ठं वक्ति नीवीं शिथिलयति दशत्योष्ठमङ्गं भनक्ति ॥२८१॥(स्रग्धरा)॥ तत्कारणात्कुतोऽप्येष, प्राग्जन्मदयित[6]स्तव । मर्त्य[7]मूर्त्तिं तिरोधाय, स्त्रीत्वं चाकृत कृत्रिमम् ॥ २८२ ॥ संज्ञिता रत्नवत्या सा, कुमार[8]स्त्रीमभाषत । स्वामिन् ! स्वाभाविकं रूपं, दर्शयाद्य प्रसद्य नः ॥२८३ ॥ द्वितीयौषधियोगेन, योगसिद्धाविव क्षणात् । प्रपन्नौ तौ निजं रूपं, जगन्नेत्रामृताञ्जनम् ॥ २८४ ॥ कुमाररूपमालोक्य, राजकन्योपमातिगम् । प्रमोदं प्राप तं यस्य, सङ्कीर्णा त्रिजगत्यपि ॥ २८५ ॥ चन्द्रलेखा बभाषेऽथ, यथा नाथ ! प्रकाशितम् । रूपं तथानुगृह्यास्मान्, कुलाद्यमपि कथ्यताम् ॥ २८६ ॥ राजसिंहाज्ञया राष्ट्रपुरजातिकुलादिकम् । पान्थ[9]प्रबन्धसम्बन्धं, सर्वं सुमतिरभ्यधात् ॥२८७॥ अवेत्यैनं च वृत्तान्तं, तुष्टोऽत्यर्थमथाञ्जसा ।

१ पुष्पं २ रतिः ३ चिन्हेन ४ पतिः ५ तव ६ प्रियः ७ पुरुषरूपं ८ कुमारं स्त्रीरूपं ९ पथिकोक्तकथासंबन्धयुतं.

॥ २१ ॥

वन्दारुवृत्तौ नमस्कारे



राजसिंहकुमाराय, राजा रत्नवतीं ददौ ॥ २८८ ॥ बिभ्राणः परमानन्दं, परमर्ध्याऽपरेऽहनि । श्रीपतिः श्रीमिव[1] श्रीमान्, कुमारस्ता-
मुदूढवान्[2] ॥२८९॥ करीन्द्रादिप्रदानेन, कृतभक्तिर्नृपेण सः । रत्नवत्या समं भेजे, भोगान् भाग्यैः समर्जितान् ॥ २९० ॥ पित्राऽ-
न्यदा प्रतीहारः, प्रहितोऽसौ कृताजतिः । कुमारस्यार्पयल्लेखं, तुष्टस्तं सोऽप्यवाचयत् ॥२९१॥ स्वस्तिश्रीमन्दिराद्रम्यात्पुराच्छ्रीमणि-
मन्दिरात् । राजा राजमृगाङ्कोऽथ, श्रीमत्पद्मपुरे पुरे ॥ २९२ ॥ कुमारतिलकं राजसिंहमालिङ्ग्य सम्मदात्[3] । सस्नेहमतिसोत्कण्ठं,
समादिशति तद्यथा ॥ २९३ ॥ वयं कुशलिनः किन्तु, त्वद्वियोगविषार्दिताः । त्वद्दर्शनसुधास्वादं, सोत्साहा वत्स ! वाञ्छितुम्
॥ २९४ ॥ अन्यद्वार्धकतो धर्मे, प्रवृद्धाधिकबुद्धयः । व्रतं जिघृक्षवोऽतस्त्वमेत्य द्राग्राज्यमाश्रय ॥ २९५ ॥ राजसिंहकुमारोऽथापृच्छ्य
पद्मनृपं ततः । चतुरङ्गचमू[4]युक्तश्चचाल स्वपुरं प्रति ॥ २९६ ॥ प्राप्यैतत्सद्गजारूढो, रत्नवत्या युतोऽविशत् । शच्याऽमा[5] हस्तिमल्ल[6]स्थ-
शचीपति[7]रिव स्वकम् ॥ २९७ ॥ प्रणतः पितृपादानां, भक्त्या भून्यस्तमस्तकः । आशीःप्रदानपूर्वं स, पितृभ्यामभिनन्दितः ॥२९८॥
नृपतिस्तुष्टचित्तोऽथ, चिन्तयामास चेतसि । निवेश्यामुं निजे राज्ये, करिष्ये धर्ममादृतः ॥ २९९ ॥ नत्वाऽथोद्यानपालेन, विज्ञप्तं
भूपतेः पुरः । देवोद्यानेऽद्य संप्राप्त, आचार्यो गुणसागरः ॥ ३०० ॥ अहो मे भाग्यसम्भारो, यदाऽऽगात्समये गुरुः । इति ध्यात्वा
नृपो राज्ये, राजसिंहमतिष्ठिपत् ॥ ३०१ ॥ दत्त्वा दानं जिनौकस्सु[8], कृत्वाऽर्चां च गजस्थितः । राजसिंहयुतो राजा, ययौ गुर्वन्तिके
ततः ॥ ३०२ ॥ नत्वा राजमृगाङ्कस्तं, विनयेन व्यजिज्ञपत् । भीमाद्भवोदधेर्दीक्षा[9]तर्योत्तारय मां प्रभो ! ॥ ३०३ ॥ गुरुणापि ततो
दत्तं, व्रतमस्य यथाविधि । तपस्तप्त्वा क्रमेणासौ, राजर्षिः सुगतिं ययौ ॥ ३०४ ॥ गृहिधर्मो गुरोः पार्श्वे, राज्ञा सम्यक्त्वपूर्वकम् ।

१ मुकुटमैत्रेयाभ्यां ङ्याः स्वीकारात् २ परिणीतवान् ३ हर्षात् ४ सैन्यं ५ सह ६ ऐरावणः ७ इन्द्रः ८ चैत्येषु ९ नावा.

पद्मपुरे स्त्रीरूपिणौ नृपामात्य-कुमारौ

॥ २२ ॥

पद्मपुरे
स्त्रीरूपिणौ
नृपामात्य-
कुमारौ

रत्नवत्या समं राजसिंहेन प्रत्यपद्यत ॥ ३०५ ॥ गुरुं नत्वा निजं स्थानमथागादवनीपतिः । गुरुस्तु सपरीवारो, विजहार वसुन्धराम् ॥ ३०६ ॥ ततस्त्रिवर्गसंसर्गसुन्दरो नृपसत्तमः[1] । राजसिंहश्चिरं कालं, प्राज्यं[2] साम्राज्यमन्वशात् ॥ ३०७ ॥ नमस्कारप्रभावेण, दुर्जया अपि भूभुजः । शेषामिवाज्ञां शीर्षेण, लीलया तस्य दध्रिरे ॥ ३०८ ॥ वनं पुष्पैः सरः पद्मैस्ताराभिश्च यथा नभः । तथाऽसौ भूषितां चैत्यैर्धात्रीं[3] धात्रीधवो[4] व्यधात् ॥ ३०९ ॥ ग्लानत्वमन्यदा प्राप्तः, सोऽथ स्वार्थं चिकीर्नृपः[5] । सुतं प्रतापसिंहाख्यं, दक्षो राज्ये न्यवीविशत् ॥ ३१० ॥ राजा रत्नवतीयुक्तो, राजसिंहोऽथ सिंहवत् । निर्भयोऽपि भवाद्भीतो, धर्माचार्यमजूहवत्[6] ॥ ३११ ॥ वन्दित्वा तत्पदद्वन्द्वं, निर्द्वन्द्वो[7] रचिताञ्जलिः । जगाद भगवन्मह्यं, समयोचितमादिश ॥ ३१२ ॥ गुरुः प्रोचे महाभाग!, भवकोटिसुदुर्लभम् । कुरुष्वाराधनं सम्यक्, सर्वाशंसा[8]विवर्जितः ॥ ३१३ ॥ पर्यङ्कासनमासीनः, पूर्वाशा[9]भिमुखस्तथा । गुरुभिः कारयांचक्रे, एवमाराधनामसौ ॥ ३१४ ॥ कथय त्वमतीचारान्, ज्ञानाद्याचारपञ्चके । यथागृहीतभंगानि, व्रतानि पुनराश्रय ॥ ३१५ ॥ भूदकाग्निमरुद्वृक्षान्, द्व्यक्षाँस्त्र्यक्षाँश्चतुःखगान् । श्वभ्रितिर्यग्नृदेवाँश्च, क्षमयैषु क्षमस्व च ॥३१६॥ प्राणिघातानृतस्तेयसंवेशन[10]परिग्रहाः । मायालोभौ मदद्वेषौ, रागक्षुद्रा[11]दिनीचिता[12]ः ॥ ३१७ ॥ अभ्याख्यानारतिरती,, निन्दा च शठता[13]ऽनृतम् । मिथ्यात्वं चेत्यघस्थानान्यष्टादश विवर्जय ॥३१८॥ यत्सर्वजन्मभिः पापं, त्रिदोषै[14]स्त्रिविधं त्रिधा । त्रिलोक्यां यत्त्वयाऽकारि, तन्निन्द निजदुष्कृतम् ॥ ३१९ ॥ विधिवद्दानशीलादि, सुकृतं यज्जगत्त्रये । स्वस्यान्यस्यापि सद्बोधं, तत् त्रिधाप्यनुमोदय ॥ ३२० ॥ जिनासिद्धान् मुनीन् धर्मं, शरण्यं

१ उत्तमः २ महान्तं राज्यमपालयत् ३ पृथ्वी ४ राजा ५ चिकीर्षुः ६ आकारयत् ७निष्क्लेशः ८ इच्छा ९ दिशा १० मैथुनं ११ द्वेषः १२ कलहः १३ मायामृषा १४ रागद्वेषमोहैः

शरणं श्रय । त्यजाहारं चतुर्भेदं, नमस्कारं मुहुः स्मर ॥ ३२१ ॥ नाहं कस्य न मे कश्चिदिति देहेऽपि निर्ममः । त्वमा[1]शंसेः सदा जैनाः, पादाः स्युर्मे गतिर्मतिः ॥ ३२२ ॥ विधायाराधनामेवं, राजसिंहः समाधिना । विपद्य[2] ब्रह्मलोकेऽभूद्दशाब्ध्[3]यायुः सुराधिपः ॥ ३२३ ॥ रत्नवत्यपि भूत्वैवं, ब्रह्मलोकदिवं ययौ । तौ द्वावपि ततश्च्युत्वा, क्रमेण शिवमेष्यतः ॥ ३२४ ॥ इत्याकर्ण्य पुलिन्द्रवृत्तमतुलं नृस्व[4]ःशिवश्रीपदं, ज्ञात्वा पञ्चनमस्कृतिस्मृतिफलं ज्ञा[5]तेषु शेषेषु च । तद्भव्या ! भवभा[6]वभीतिभिदुरं भव्येन[7] भावेन भो, नित्यं ध्यायत पञ्चमङ्गलमहामन्त्रं सदा सौख्यदम् ॥ ३२५ ॥ इति नमस्कारफलदृष्टान्ताः ॥

अधुना चैत्यवन्दना, सा च त्रिविधा 'नवकारेण जहन्ना दण्डगथुईजुगल मज्झिमा नेया । संपुन्ना उक्कोसा विहिणा खलु वंदणा तिविहा ॥१॥' 'दण्डगथुईजुगल'त्ति चैत्यस्तवदण्डकैकस्तुतिप्रदानयुगलरूपेति, अत्र च सम्प्रदायादुत्कृष्टचैत्यवन्दना ईर्यापथिकीप्रतिक्रमणपुरस्सरं विधेयेत्यतः सैवादौ व्याख्यायते, तत्र—

**इच्छामि पडिक्कमिउं, इरियावहियाए विराहणाए १ गमणागमणे २ पाणक्कमणे बीयक्कमणे हरियक्कमणे ३ ओसाउत्तिंगपणगदगमट्टिमक्कडासंताणासंकमणे ४ जे मे जीवा विराहिया ५ एगिंदिया बेइंदिया तेइंदिया चउरिंदिया पंचिंदिया ६ अभिहया वत्तिया लेसिया संघाइया संघट्टिया परियाविया किलामिया उद्दविया ठाणाओ ठाणं संकामिया जीवियाओ ववरोविया ७ तस्स मिच्छामि दुक्कडं ८ ॥**

इच्छामि—अभिलषामि, प्रतिक्रमितुं- निर्वर्त्तितुं ईरणमीर्या-गमनं तद्युक्तः पन्था ईर्यापथस्तत्र भवा ईर्यापथिकी विराधना-

---

१ इच्छेः २ मृत्वा ३ सागरोपमाणि ४ मनुष्य स्वर्ग मोक्षाः ५ दृष्टान्तेषु ६ उत्पत्तिः ७ सुंदरेण

जन्तुबाधा, मार्गे गच्छतां या काचिद्विराधना भवति सा ईर्यापथिकीत्युच्यते, यद्वा ईर्यापथः-साध्वाचारः, यदाहुः-"ईर्यापथो ध्यानमौनादिकं भिक्षुव्रतं, तत्र भवा ऐर्यापथिकी" विराधना-नद्युत्तरणशयनादिभिः प्राणातिपातादिका साध्वाचारातिक्रमरूपा तस्या विराधनायाः, प्रतिक्रमितुमिच्छामीति सम्बन्धः, संपत् १॥ क्व सति विराधना?-'**गमणागमणे**' गमने चागमने च, तत्र स्वस्थानादन्यत्र गमनं गमनं, व्यत्यये त्वागमनं, संपत् २॥ तत्रापि कथं विराधनेत्याह-'**पाणक्कमणे**'इत्यादि, प्राणिनो-द्वीन्द्रियादयस्तेषामाक्रमणे- संघट्टने, तथा '**बीयक्कमणे हरियक्कमणे**' बीजाक्रमणे हरिताक्रमणे, आभ्यां सर्वबीजानां शेषवनस्पतीनां च जीवत्वमाह, संपत् ३॥ तथा '**ओसा**' इत्यादि, अवश्यायः-त्रेहः, अस्य च ग्रहणं सूक्ष्मस्याप्यप्कायस्य परिहार्यत्वख्यापनार्थं, '**उत्तिंग**' भूम्यां वृत्तविवरकारिणो गर्दभाकारा जीवाः कीटिकानगराणि वा, '**पणग**' पंचवर्णा फुल्लिः, '**दगमट्टी**' उदकमृत्तिका- अनुपहतभूमौ चिक्खल्लः ( पंकः ), यद्वा दकम्- अप्कायो मृत्तिका- पृथ्वीकायः '**मक्कडासंताणासंकमणे**' मर्कटसन्तानः- कोलिकजालं तेषां संक्रमणे-आक्रमणे, संपत् ४॥ किं बहुना?, '**जे मे जीवा विराहिया**' ये केचन मया जीवा विराधिता-दुःखे स्थापिताः, संपत् ५॥ ते च के इत्याह—'**एगिंदियेत्यादि**' एकमेव स्पर्शनरूपमिन्द्रियं येषां ते एकेन्द्रियाः- पृथ्व्यादयः, एवं स्पर्शनरसनोपेता द्वीन्द्रियाः- शङ्खादयः, स्पर्शनरसनघ्राणयुक्तास्त्रीन्द्रियाः- कीटिकादयः, स्पर्शनरसनघ्राणचक्षुःसमन्विताश्चतुरिन्द्रिया- वृश्चिकादयः, स्पर्शरसनघ्राणचक्षुःश्रोत्रसहिताः पञ्चेन्द्रियाः-तिर्यग्नरामरादयः, संपत् ६॥ विराधनाप्रकारमाह—'**अभिहये**'त्यादि, अभिमुखमागच्छन्तो हताः **अभिहताः**-पादेन ताडिताः उत्क्षिप्य क्षिप्ता वा अभिहताः, **वर्त्तिताः**- पुञ्जीकृता धूल्यादिना वा स्थगिताः, **श्लेषिता**-भूम्यादौ लगिता ईषत्पिष्टा वा, **संघातिता**-मिथो गात्रैः पिण्डीकृताः, **संघट्टिता**-मनाक् स्पृष्टाः, **परितापिताः**-सर्वतः पीडिताः,

क्लामिताः-ग्लानिं प्रापिताः, जीवितशेषाः कृता इत्यर्थः, अवद्राविता-उत्त्रासिताः, स्थानात्स्थानं संक्रामिताः-स्वस्थानात्परस्थानं नीताः, जीविताद्व्यपरोपिता-मारिता इत्यर्थः, संपत् ७॥ 'तस्सत्ति' अभिहयइत्यादिविराधनाप्रकारस्य 'मिच्छामिदुक्कडं'ति मिथ्या मे दुष्कृतं- एतद् दुष्कृतं मिथ्या-विफलं मे भवत्वित्यर्थः, अस्य चैतन्निरुक्तं-यथा "मित्ति मिउमद्दवत्ते[1] छत्ति य दोसाण छायणे[2] होइ। मित्ति य मेराइ[3] ठिओ दुत्ति दुगुंछामि[4] अप्पाणं ॥ १ ॥ कत्ति कडं मे पावं, डत्ति य डेवेमि[5] तं उवसमेणं[6]। एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ॥२॥" संपत् ८ ॥ सम्यग् मिथ्यादुष्कृतकर्तुस्तत्क्षणादेवाशेषमपि कर्म क्षीयते, अत्र च मृगावतीदृष्टान्तः, तथाहि—एकदा श्रीमहावीरः, कौशाम्ब्यां समवासरत्। वन्दितुं तत्र चन्द्रार्कौ, सविमानौ समीयतुः ॥ १ ॥ तथापि चन्दना ज्ञात्वा, दक्षाऽस्तसमयं ततः। निर्गत्यागान्निजस्थाने, तत्रैवास्थात् मृगावती ॥२॥ स्वस्थानं गतयोश्चन्द्रसूर्ययोरथ विस्तृते। तमस्यागाद् द्रुतं भीता, सा साध्वीनां प्रतिश्रये ॥३॥ तत्रेर्यापथिकीं साऽथ, प्रतिक्रम्य प्रवर्त्तिनीम्। शयनस्थां प्रणम्योचे, मन्तुर्मे[7] क्षम्यतामयम् ॥ ४ ॥ चन्दना चन्दनाभाभिर्वाणीभिस्तामथाभ्यधात्। भद्रे! भद्रकुलोत्पन्ने, किं ते साम्प्रतमीदृशम्? ॥५॥ साप्यूचे मर्यकाऽपायं, कृतं दुष्कृतमेतकम्। करिष्ये नेदृशं भूय, इत्युक्त्वा न्यपतत्पदोः ॥ ६ ॥ निद्राऽथागात्प्रवर्त्तिन्या, मृगावत्यास्तु भावतः। मिथ्यादुष्कृतकारिण्या, जज्ञे केवलमुज्जलम् ॥ ७ ॥ सर्प्पव्यतिकरेणाथ, प्रबुद्धा चन्दना तदा। अवाप केवलं ज्ञानं, क्षमयन्ती मृगावतीम् ॥ ८ ॥

अस्यां च विश्रामाष्टकोल्लिंगनपदानि-इच्छ गम पाण ओसा, जे मे एगिंदि अभिहया तस्स। अड संपय बत्तीसं, पयाइं वन्नाण

१ भावमार्दवे २ उच्छादनं ३ मर्यादायां ४ उल्लंघयामि ५ अगच्छतां ६ उपाश्रये ७अपराधः ८ योग्यं ९ विभक्त्यन्तादकच् १० हानिकरं.

सङ्कसयं ॥ १ ॥ एवमालोचितप्रतिक्रान्तः कायोत्सर्गप्रायश्चित्तेन पुनरात्मशुद्ध्यर्थमिदं पठति—

**तस्स उत्तरीकरणेणं पायच्छित्तकरणेणं विसोहीकरणेणं विसल्लीकरणेणं पावाणं कम्माणं निग्घायणट्ठाए ठामि काउस्सग्गं**

तस्य- आलोचितप्रतिक्रान्तस्यातिचारस्योत्तरीकरणादिना हेतुना 'ठामि काउस्सग्गं' इति योगः, तत्रानुत्तरस्योत्तरस्य करणं-पुनः संस्कारद्वारेणोपरिकरणमुत्तरीकरणम् , अयं भावार्थः- यस्यातिचारस्य पूर्वमालोचनादि कृतं तस्यैव पुनः शुद्धये कायोत्सर्गस्य करणं, तच्च प्रायश्चित्तकरणेन स्यादित्याह-'पायच्छित्तकरणेणं' प्रायो-बाहुल्येन चित्तं-जीवं मनो वा शोधयतीति पापं छिनत्तीति वाऽऽर्षत्वात्प्रायश्चित्तं तस्य करणेन हेतुना। तच्च विशुद्ध्या स्यादित्याह-'विसोहीकरणेणं' विशोधनं विशुद्धिः-अतिचारापगमादात्मनो नैर्मल्यं तस्याः करणेन हेतुना। तदपि विशल्यत्वे सति स्यादित्याह—'विसल्लीकरणेणं' विशल्यो-विगतमायादिशल्यस्तस्य अविशल्यस्य विशल्यस्य करणं विशल्यीकरणं तेन हेतुना। किमित्याह-'पावाणं इत्यादि' पापानां-भवहेतूनां कर्म्मणां निर्घातनार्थं-उच्छेदनार्थं 'ठामि' अनेकार्थत्वाद्धातूनां करोमि कायोत्सर्गं-कायव्यापारत्यागमित्यर्थः। किं सर्वथा ?, नेत्याह—

**अन्नत्थ ऊससिएणं नीससिएणं खासिएणं छीएणं जंभाइएणं उड्डुएणं वायनिसग्गेणं भमलीए पित्तमुच्छाए सुहुमेहिं अंगसंचालेहिं सुहुमेहिं खेलसंचालेहिं सुहुमेहिं दिट्ठीसंचालेहिं एवमाइएहिं आगारेहिं अभग्गो अविराहिओ हुज्ज मे काउस्सग्गो जाव अरिहंताणं भगवंताणं नमुक्कारेणं न पारेमि ताव कायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि**

**अन्यत्रोच्छ्वसितात्**-ऊर्ध्वं श्वासग्रहणात्, पञ्चम्यर्थे तृतीया, एवमुत्तरत्रापि, **निःश्वसितात्**-श्वासमोक्षणात्, **कासितात्-क्षुतात् जृम्भितात्**-उद्गारितात्, एतानि च प्रतीतानि, **वातनिसर्गः**-अधोवातनिर्गमस्तस्मात्, कासितादीनि च जीवरक्षार्थं मुखे हस्तदानादियतनया कार्याणि, '**भमलीए**' अकस्माद्देहभ्रमः, '**पित्तमुच्छाए**' पित्तसंक्षोभादीषन्मोहो मूर्छा तस्याः, तयोश्च सत्योरुपवेष्टव्यं, सहसा पतने मा भूत् संयमात्मविराधनेति। '**सुहुमेहिं**' इत्यादि, **सूक्ष्मेभ्योऽङ्गसञ्चालेभ्यो**-रोमोत्कम्पादिभ्यः, **सूक्ष्मेभ्यः खेलसञ्चालेभ्यः**, खेलः-श्लेष्मा, **सूक्ष्मेभ्यो दृष्टिसञ्चालेभ्यो**-निमेषादिभ्यः। '**एवमाइएहिं**' मित्यादि, एवमादिभिराकारैः अपवादरूपैः-आदिशब्दादन्येऽपि गृह्यन्ते, अग्नेर्विद्युतो वा स्पर्शेन प्रावरणं गृह्णतोऽपि मार्जारमूषकादेः पुरतो गमनेऽग्रतः सरतोऽपि चौरसम्भ्रमे राजसम्भ्रमे वा सर्पदष्टे आत्मनि परे वा साध्वादौ अपूर्णमपि कायोत्सर्गं पारयतोऽपि न भंगः, यदाहुः—"अगणीओ छिंदिज्ज व बोहिखोभाइ दीहडक्को वा। आगारेहिं अभग्गो उस्सग्गो एवमाईहिं ॥ १ ॥" **एतैरभग्नः**—सर्वथा अखण्डितः, **अविराधितो**-देशतोऽप्यविनाशितो **भवेन्मम कायोत्सर्गः**, कियन्तं कालं यावदित्याह—'**जावे**' त्यादि, **यावदर्हतां भगवतां नमस्कारेण** '**णमो अरिहंताण**' मित्यनेन **न पारयामि** न पारं गच्छामि, तावत्किमित्याह—'**तावे**' त्यादि, तावन्तं कालं **कायं**-देहं, **स्थानेन**-ऊर्ध्वस्थानादिना **मौनेन**-वाग्निरोधेन, **ध्यानेन**-मनःसुप्रणिधानेन '**अप्पाणं**'ति आर्षत्वादात्मीयं कायं **व्युत्सृजामि**-कुव्यापारनिषेधेन त्यजामि ॥ साम्प्रतं कायोत्सर्गस्य दोषवर्जनाय गाथाद्वयमिदम्— "घोडग १ लया २ य खंभे कुड्डे ३ माले ४ य सवरि ५ वहु ६ नियले ७। लंबुत्तर ८ थण ९ उद्धी १० संजइ ११ खलिणी १२ य वायस १३ कविट्ठे १४ ॥ १ ॥ सीसोकंपिय १५ मूई १६ अंगुलिभमुहा १७ य वारुणी १८ पेहा १९ ॥ नाही करयल कुप्पर उस्सारिय पारियंमि थुई ॥ २ ॥

अश्ववद्विषमपादः १ वाताहतलतावत्कम्पमानः २ स्तम्भे कुड्ये वाऽवष्टभ्य ३ माले वोत्तमांगं निधाय ४ अर्धवसनशबरीवत् गुह्याग्रे करौ कृत्वा ५ वधूवदवनतोत्तमांगः ६ निगडितवच्चरणौ विस्तार्य मेलयित्वा वा ७ नाभेरुपरि जानुनोरधश्च लम्बमाननिवसनः ८ दंशादिरक्षणार्थमज्ञानाद्वा हृदयं प्रच्छाद्य ९ शकटोर्धिवदंगुष्ठौ पाणी वा मीलयित्वा १० संयतीवत्प्रावृत्य ११ कविष्ठवद्रजोहरणमग्रतः कृत्वा १२ वायसवत् चक्षुर्गोलकौ भ्रमयन् १३ कपित्थवत् परिधानं पिण्डयित्वा १४ यक्षाविष्ट इव शिरः कम्पयन् १५ मूकवत् हूहूकुर्वन् १६ आलापकगणनार्थमंगुलीर्भ्रुवौ वा चालयन् १७ वारुणी- सुरा, तद्वत् बूडबूडयन् १८ अनुप्रेक्षमाणो वानर इवौष्ठपुटौ चालयंश्च कायोत्सर्गं करोतीत्येकोनविंशतिर्दोषाः १९ ॥ सूत्रे सर्वमप्यनुष्ठानं साधुमुद्दिश्योक्तमतस्तद्विशेषमाह.— 'नाहि' त्ति नाभेरधश्चत्वार्यङ्गुलानि चोलपट्टः 'करयल' त्ति कुर्वन्ति दक्षिणेतरपाणिभ्यां मुखवस्त्रिकां रजोहरणं च 'कुप्परि' त्ति कूर्पराभ्यां चोलपट्टश्च धरणीयः 'उस्सारिय पारियंमि थुई' त्ति उत्सारिते-पूरिते कायोत्सर्गे नमस्कारेण पारिते जिनस्तुतिर्भणनीया। पाठान्तरं वा 'एगूणवीस दोसा काउस्सग्गस्स वज्जिज्ज' त्ति, सुबोधश्च तदिति गाथाद्वयार्थः। कायोत्सर्गे च 'चन्देसु निम्मलयरे'— त्यन्तश्चतुर्विंशतिस्तवश्चिन्त्यः। पारिते च समस्तो भणितव्यः, एवमीर्यापथिकीं प्रतिक्रम्य महावृत्तानर्थयुक्तानपुनरुक्तान् नमस्कारान् भणतीति, ततो 'अन्नोन्नंतरअंगुलिकोसागारेहिं दोहिं हत्थेहिं। पिट्टोवरिकुप्परसंठिएहिं तह जोगमुद्दत्ति ॥ १ ॥' त्येवंलक्षणया योगमुद्रया प्रणिपातदण्डकं पठति, स चायं—

**नमोत्थु णं अरिहंताणं भगवंताणं**

नमो-नमस्कारोऽस्तु-भवतु, णं वाक्यालंकारे, केभ्यः?-अर्हद्भ्यः, अत्र पाठत्रयम्- अरहंताणं अरिहंताणं अरुहंताणंति, तत्र

अर्हन्ति शक्रादिकृतां पूजामित्यर्हन्तः, अरीन् कर्मलक्षणान् घ्नन्तीत्येवंसाधवोऽरिहन्तारः, न रोहन्ति-दग्धकर्मबीजत्वात्पुनः संसारे न जायन्त इत्यरुहन्तस्तेभ्यः, 'चतुर्थ्याः षष्ठी' इति [८-३-१३१] प्राकृतसूत्राच्चतुर्थ्याः स्थाने षष्ठी, बहुवचनं तु क्षेत्रकालभेदेनार्हद्बहुत्वख्यापनार्थम्। एते च नामाद्यनेकविधा इति भावार्हद्ग्रहणार्थमाह—'भगवद्भ्यः' भगोऽत्र षड्विधः, यथा-'ऐश्वर्यस्य समग्रस्य १, रूपस्य २ यशसः ३ श्रियः ४। धर्मस्याथ ५ प्रयत्नस्य ६, षण्णां भग इतींगना ॥ १ ॥' भगः-समग्रैश्वर्यादिलक्षणो विद्यते येषां ते भगवन्तस्तेभ्यः, संपत् १। एवंविधा एव भगवन्तो विवेकिनां स्तोतव्याः इत्याभ्यामालापकाभ्यां स्तोतव्यसम्पदुक्ता ॥ साम्प्रतमस्या एव हेतुसम्पदमाह—

**आइगराणं तित्थयराणं सयंसंबुद्धाणं**

स्वस्वतीर्थेषु समस्तनीतिहेतुश्रुतधर्मस्यादिकर्तृभ्यः, 'तीर्थकरेभ्यः' तीर्थ-चतुर्विधः संघः प्रथमगणधरो वा तत्कारिभ्यः, 'स्वयंसंबुद्धेभ्यः' स्वयं-परोपदेशं विना सम्यग्-अविपर्ययेण बुद्धा-ज्ञाततत्त्वाः स्वयंसंबुद्धास्तेभ्यः, संपत् २। अत्राद्याया एव हेतुविशेषसंपदमाह-

**पुरिसुत्तमाणं पुरिससीहाणं पुरिसवरपुंडरीयाणं पुरिसवरगंधहत्थीणं**

पुरुषाणां-विशिष्टसत्त्वानां मध्ये तथास्वाभाव्यात् सर्वकालमसाधारणगाम्भीर्यादिगुणग्रामयोगादुत्तमाः पुरुषोत्तमाः तेभ्यः, 'पुरुषसिंहेभ्यः' पुरुषाणां कर्मशत्रून् प्रति ईश्वरतया सिंहा इव पुरुषसिंहाः तेभ्यः, 'पुरुषवरपुण्डरीकेभ्यः' पुरुषाणां वरपुण्डरीकाणीव, यथा तानि पंके जातानि जले प्रवृद्धानि तद्द्वयं विहायोपरि वर्त्तन्ते तथा अर्हन्तोऽपि कर्मपंके जाता भोगजलैः प्रवृद्धास्तद्द्वयं विहाय वर्त्तन्त इति पुरुषवरपुण्डरीकास्तेभ्यः, 'पुरुषवरगन्धहस्तिभ्यः' पुरुषवरगन्धहस्तिन इव, यथैषां गन्धेनैव क्षुद्रगजा भज्यन्ते तद्वद्-

तिदुर्भिक्षाद्युपद्रवगजा अर्हद्विहारपवनगन्धादेव भज्यन्त इति पुरुषवरगन्धहस्तिनस्तेभ्यः पुरुषवरगन्धहस्तिभ्यः, संपत् ३ ॥ आद्याया एव सामान्येनोपयोगसम्पदमाह—

**लोगुत्तमाणं लोगणाहाणं लोगहियाणं लोगपईवाणं लोगपज्जोअगराणं**

'लोकोत्तमेभ्यः' इह लोकशब्देन भव्यसत्त्वलोको गृह्यते ततस्तन्मध्ये सकलकल्याणकृत्तया भव्यत्वभावेनोत्तमा लोकोत्तमास्तेभ्यः, 'लोकनाथेभ्यः' लोकानां- विशिष्टसत्त्वानां सम्यक्त्वबीजाधानादियोजनेन रागाद्युपद्रवरक्षणेन च योगक्षेमकारिणो नाथा लोकनाथास्तेभ्यः, 'लोकहितेभ्यः' लोकाय- सकलैकेन्द्रियादिप्राणिवर्गाय पंचास्तिकायात्मकाय वा सम्यग्ग्रहणप्ररूपणादिना हिता लोकहितास्तेभ्यः, 'लोकप्रदीपेभ्यः' लोकस्य-विशिष्टसंज्ञिरूपस्य देशनांशुभिर्मिथ्यात्वतमोऽपनयनेन प्रदीपा लोकप्रदीपास्तेभ्यः, 'लोकप्रद्योतकरेभ्यः' लोकस्य-गणधरादेः प्रद्योतं-विशिष्टतत्त्वप्रकाशं कुर्वन्तीति लोकप्रद्योतकरास्तेभ्यः, संपत् ४ ॥ उपयोगसम्पद एव हेतुसम्पदमाह—

**अभयदयाणं चक्खुदयाणं मग्गदयाणं सरणदयाणं बोहिदयाणं**

'अभयदयेभ्यः' अभयं-इह १ परलोका २ऽऽदाना३ऽकस्मा४दाजीव५मरणा६श्लोक७लक्षणसप्तभयाभावं दयन्त इत्यभयदयास्तेभ्यः, 'चक्षुर्दयेभ्यः' तत्त्वावबोधरूपज्ञानदृष्टिदातृभ्यः, 'मार्गदयेभ्यः' मार्गः- चेतोऽकुटिलगमनेन विशिष्टगुणस्थानावाप्तिप्रवणो दर्शनमोहादिक्षयोपशमविशेषस्तं दयन्त इति मार्गदयास्तेभ्यः, 'शरणदयेभ्यः' रागादिभयभीतसत्त्वत्राणकारिभ्यः, बोधिदयेभ्यः-सद्दर्शनदातृभ्यः। एतानि यथोत्तरं पूर्वपूर्वफलभूतानि, तथाहि-अभयफलं चक्षुः चक्षुःफलं मार्ग इत्यादि, संपत् ५ ॥

अथाद्याया एव विशेषोपयोगसम्पदमाह—

**धम्मदयाणं धम्मदेसयाणं धम्मनागयाणं धम्मसारहीणं धम्मवरचाउरंतचक्कवट्टीणं**

धर्मदयेभ्यः- यथाऽर्हं यतिगृहिधर्मदायिभ्यः, अत्र च हेत्वन्तराणां सद्भावेऽपि भगवन्त एव प्रधानहेतव इति, धर्मदयत्वं च धर्मदेशनयैव स्यादित्याह—धर्मदेशकेभ्यः, धर्मं-प्रस्तुतं यथायोग्यसम्बन्ध्यतया देशयन्तीति धर्मदेशकास्तेभ्यः, 'धर्मनायकेभ्यः' धर्मस्य वशीकरणात् फलोपभोगात्प्रवर्द्धनाद् व्याघातरक्षणाच्च नायका धर्मनायकास्तेभ्यः, धर्मसारथिभ्यः, यथा सारथिस्तुरंगान् सम्यग्मार्गे प्रवर्तयति रथं पालयति च तथाऽर्हन्तोऽपि भव्यसत्त्वान् धर्मभरवहनसज्जान् कुर्वन्ति स्वयं च धर्मं पालयन्तीति धर्मसारथयः, प्रस्तुतधर्मस्य भव्यरथ्यापेक्षया सम्यग्दर्शनप्रवर्त्तनपालनयोगतः सारथयो धर्मसारथयस्तेभ्यः, अत्रार्थे सम्प्रदायः—

तथाहि श्रीमहावीरो, विहरन्नेकदा महीम्। उद्याने समवासार्षीत्, पुराद्राजगृहाद्बहिः ॥ १ ॥ पुत्रः श्रेणिकधारिण्योस्तत्र श्रुत्वा विभोर्गिरः। प्रबुद्धोऽष्टौ प्रियास्त्यक्त्वा, मेघो दीक्षामुपाददे ॥ २ ॥ ग्रहणासेवनाशिक्षाशिक्षायै स्वामिनाऽर्पितः। स्थविराणामसौ तैस्तु, शायितो द्वारवर्त्मनि ॥ ३ ॥ निर्यद्भिः[1] प्रविशद्भिश्च, साधुभिस्तत्र भूरिभिः[2]। सोऽसकृज्जानुहस्तांघ्रिकूर्परा[3]द्यैरघट्यत ॥ ४ ॥ प्रमृजद्भिश्च सर्वांगं, तथाऽगुण्ड्यत रेणुना। यथाऽसौ क्षणमप्येकं, निद्रां प्राप न तन्निशि ॥ ५ ॥ दध्यौ सोऽथ पुरो मेऽमी, सोदर्याः[4] साधवोऽभवन्। इदानीं पाणिपादाद्यैर्लेष्टु[5]वद् घट्टयन्ति माम् ॥ ६ ॥ सहिष्ये दुःसहां हन्त, कथमित्थं कदर्थनाम्?। तत्प्रातः प्रभुमापृच्छ्य, श्रयिष्ये गृहितां पुनः ॥ ७ ॥ इति ध्यात्वोद्गते सूर्ये, गत्वाऽर्हन्तं ननाम सः। बभाषे तमथो वीरः, सुधा-

१ निर्गच्छद्भिः २ प्रचुरैः ३ कोणी ४ भ्रातरः ५ पाषाणः

मधुरया गिरा ॥ ८ ॥ वत्स ! निर्गच्छदागच्छत्साधुभिर्घट्टितोऽद्य किम् । दुरध्यासीर्[1]भवौ पूर्वौ, मेघाऽनघमनाः शृणु ॥ ९ ॥ अतो भवात्तृतीयेऽभूर्वैताढ्यभुवि षड्रद[2]ः । हस्ती सहस्र[3]यूथेशस्त्वं सुमेरुप्र[4]भः सितः ॥ १० ॥ दवाद्भीतोऽन्यदा ग्रीष्मे, विहाय करिणीजवात् । धावमानः सरश्चैकं, पंकिलं तृषितोऽविशः ॥ ११ ॥ तत्राप्राप्तपयाः पंके, मग्नः प्रत्य[5]र्थिदन्तिना । विद्धः सप्त दिनान्यस्थाः, सहमानो महाव्यथाम् ॥ १२ ॥ आयुर्वर्षशतं विंशत्युत्तरं परिपाल्य च । रक्तो दन्ती चतुर्दन्तो, विन्ध्यभूम्यामभूः पुनः ॥ १३ ॥ मेरुप्रभाभिधः सप्तहस्तिनीशतनायकः । दवं दृष्ट्वाऽन्यदा जातिमस्मार्षीः स्वस्य पूर्विकाम् ॥ १४ ॥ वर्षारात्रादिमध्यान्ते, वल्ल्याद्युन्मूल्य मूलतः । स्थण्डिलं सपरिवारोऽकार्षीर्योजनमात्रकम् ॥ १५ ॥ दृष्ट्वाऽन्येद्युर्दवं भीतः, पौरु[6]षं स्वं विमुच्य च । द्रुतं गत्वाऽविशस्तत्र, स्थण्डि[7]ले सत्त्वसंकुले ॥ १६ ॥ संलीनांगः स्थितस्तत्र, गात्रकण्डूयनेच्छया । उदाक्षिपोंऽघ्रिमेकं स्वं, तद्भूम्यां शशकोऽविशत् ॥ १७ ॥ कण्डूयित्वा वपुः पादं, मुंचन्नालोक्य तं शशम् । सशंकस्त्वं तथैवास्थाः, शशकस्यानुकम्पया ॥ १८ ॥ सार्द्धदिनद्वयाच्छान्ते, दवे प्रचलितस्ततः । त्रुटित्वेव गिरेः कूटो[8], धरित्र्यामपतत्क्षणात् ॥ १९ ॥ ततो दिनत्रयीं क्षुत्तृड्बाधितोऽपि कृपापरः । आयुरब्दशतं क्षिप्त्वाऽभूस्त्वमत्र नृपात्मजः ॥ २० ॥ तदा कृपा कृता तेन, वत्स ! स्वस्थात्मना त्वया । तथा स्वस्य व्यथाऽत्यर्थं, नागण्यत मनागपि ॥ २१ ॥ इदानीं तु जगद्विद्वान्, सर्वसावद्यवर्जकः । साधुभिः समचित्तैस्त्वं, घट्ट्यमानोऽपि दूयसे ॥ २२ ॥ स्वस्याख्यातामिति श्रुत्वा, स्मृत्वा पूर्वभवौ निजौ । पुनरायातसंवेगो, मेघो नत्वाऽभ्यधात्प्रभुम् ॥ २३ ॥ जीयाश्चिरं यदेवं मामुत्पथे प्रस्थितं पथि[9] । पुनः प्रावीवृ[10]तः क्षिप्रं, रथ्याविव सुसारथिः ॥ २४ ॥ मुनयोऽमी महात्मानोऽमीषां पादर-

---

१ दुर्ध्यानमकार्षीः २ षड्दन्तः ३ सहस्रहस्तिनीभर्त्ता ४ विद्याधरकृतनामा ५ शत्रुः ६सत्त्वं ७निस्तृणभूमौ ८शिखरं ९ सन्मार्गे १०प्रावर्त्तयः

ज्ञोऽपि हि । वन्द्यं मेऽतः प्रभृत्येषां, निसृष्टं स्वं शरीरकम् ॥ २५ ॥ मुक्त्वा नेत्रे शरीरेऽत्र, कुर्वतां घट्टनादिकम् । मनसापि न दुष्यामीत्यत्रार्थे मेऽस्त्वभिग्रहः ॥ २६ ॥ एवं स्थिरीकृतो मेघस्तीव्रं तप्त्वा तपश्चिरम् । कृत्वा संलेखनां मासं, विजये त्रिदशोऽजनि ॥ २७ ॥ ततश्च्युत्वा विदेहेषु, लप्स्यते पदमव्ययम् । तदेवं भगवन्तोऽमी, धर्मसारथयो मताः ॥ २८ ॥ तथा—'धर्मवरचातुरन्तचक्रवर्त्तिभ्यः' धर्म एव वरं-प्रधानं चतसृणां गतीनामन्तकरणाच्चतुरन्तं चक्रमिव चक्रं मिथ्यात्वादिभावशत्रुलवनात् तेन वर्त्तंत इत्येवंशीला धर्मवरचतुरन्तचक्रवर्त्तिनस्तेभ्यः, 'अतः समृद्ध्यादौ वे'ति ( ८-२-४४ ) प्राकृतसूत्रादत्राच्चम्, संपत् ६॥ अथाद्याया एव सकारणत्वे स्वरूपसम्पदमाह—

**अप्पडिहयवरनाणदंसणधराणं वियट्टछउमाणं.**

अप्रतिहते-सर्वत्राप्रतिहते वरे-क्षायिकत्वाद्विशेषसामान्यावबोधरूपे ज्ञानदर्शने धारयन्तीत्यप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः, 'व्यावृत्तच्छद्मभ्यः' छादयतीति छद्म-ज्ञानावरणीयादिघातिकर्मचतुष्कं तद् व्यावृत्तम्-अपगतं येभ्यस्ते व्यावृत्तच्छद्मानस्तेभ्यः, संपत् ७॥ स्वतुल्यपरफलकर्तृत्वसम्पदमाह—

**जिणाणं जावयाणं तिण्णाणं तारयाणं बुद्धाणं बोहयाणं मुत्ताणं मोयगाणं**

जिनेभ्यो-रागादिजेतृभ्यः, जापकेभ्यः-अन्येषामपि उपदेशादिना रागादिजयकारयितृभ्यः, तीर्णेभ्यः- भवार्णवपारगतेभ्यः, 'तारकेभ्यः' तारयन्त्यन्यानपीति तारकास्तेभ्यः, बुद्धेभ्यो-ज्ञाततत्त्वेभ्यो, बोधकेभ्यः-अन्येषामपि तत्त्वज्ञापकेभ्यः, मुक्तेभ्यो-भवहेतुकर्मपाशरहितेभ्यः, मोचयन्त्यन्यानपि मोचकास्तेभ्यः, संपत् ८ ॥ साम्प्रतं मुक्त्यवस्थामाश्रित्य नवमीं संपदमाह—

**सव्वन्नूणं सव्वदरिसीणं सिवमयलमरुयमणंतमक्खयमव्वाबाहमपुणरावित्तिसिद्धिगइणामधेयं ठाणं संपत्ताणं णमो जिणाणं जिअभयाणं**

सर्वं वस्तु सामान्यविशेषात्मकमपि प्रथमसमये विशेषात्मकतया जानन्तीति सर्वज्ञास्तेभ्यः, ततो द्वितीयसमये सर्वं वस्तु सामान्यात्मकतया पश्यन्तीत्येवंशीलाः सर्वदर्शिनस्तेभ्यः, आह—इत्थमेषां दर्शनसमये ज्ञानस्यासत्त्वादसर्वज्ञताप्रसंगः, नैवं, सर्वज्ञस्य केवलिनः सदैव ज्ञानदर्शनलब्धिसद्भावेऽपि तत्स्वाभाव्याद् न युगपदेकस्मिन् समये उपयोगद्वयसम्भवः, क्षायोपशमिकसंवेदने तथाऽदर्शनात्, नच चतुर्ज्ञानिनोऽप्येकस्मिन् ज्ञानोपयोगे सति शेषज्ञानाभावः स्यात्, अत्र च बहु वक्तव्यम् तत्तु नोच्यते ग्रन्थगौरवभयात्, तथा **शिवं**-निरुपद्रवम्, **अचलं**-चलनक्रियारहितम्, **अरुजं**-रोगवर्जितम्, **अनन्तं** अनन्तज्ञानयोगात्, **अक्षयं** क्षयहेत्वभावात्, **अव्याबाधम्** अमूर्तत्वात्, **अपुनरावृत्ति** अकर्मकत्वात्, **सिद्धिगतिनामधेयं**-लोकाग्रलक्षणं स्थानं सम्प्राप्तेभ्यः, नमो जिनेभ्यः, जितभयेभ्यः, पुनरन्ते नमस्काराभिधानं मध्यपदेष्वपि अनुवृत्त्यर्थम्, अत्र च स्तुतित्वान्न पौनरुक्त्यम्, यदाहुः—'सज्झायझाणतवओसहेसु उवएसथुइपयाणेसु। संतगुणकित्तणेसु य न हुंति पुणरुत्तदोसा उ ॥१॥' संपत् ९ ॥ अनेन च जिनजन्मादिषु शक्रो जिनान् स्तौतीत्ययं शक्रस्तव उच्यते ॥ 'दो तिण्णि चउर पंच य पंच पंचेव दुन्नि चउ तिन्नि। सक्क नव संपयाओ आलावा हुंति तित्तीसं ॥ १ ॥ तित्तीसं च पयाइं, नव संपय वण्ण दुसयबासट्ठा। भावजिणत्थयरूवो, अहिगारो एस पढमोत्ति ॥ २ ॥' अतोऽनन्तरं त्रिकालवर्तिद्रव्यार्हद्वन्दनार्थमिमां गाथां पूर्वाचार्याः पठन्ति—'**जे अ अईआ सिद्धा, जे अ भविस्संति णागए काले। संपइ अ वट्टमाणा, सव्वे तिविहेण वंदामि** ॥१॥' कण्ठ्या ॥ ननु किं द्रव्यार्हन्तो नरकादिगतिगता अपि भावार्हद्वत्

वन्दनार्हाः?, कामं, कथमिति चेत्, उच्यते—सर्वत्र तावन्नामस्थापनाद्रव्यार्हन्तो भावार्हदवस्थां हृदि व्यवस्थाप्य नमस्कार्याः, अत्रापि च भरताधिपेन तथैव नमस्कृतत्वात्—

तथा ह्याद्यो जिनोऽयोध्यानगर्या बहिरेकदा। तास्थिवानथ तं नन्तुं, भरतश्चक्रवर्त्त्यगात् ॥ १ ॥ नत्वाऽप्राक्षीद्यथेयत्यां, सुरासुरनृपर्षदि। स जीवोऽस्ति जिनो योऽत्रावसर्प्पिण्यां भविष्यति ? ॥ २ ॥ स्वाम्यूचे तव पुत्रोऽयं, पारिव्राज्यप्रवर्त्तकः। मरीचिर्भारते भावी, त्रिपृष्ठः प्रथमो हरिः ॥ ३ ॥ मूकापुर्यां विदेहेषु, प्रियमित्रश्च चक्र्यसौ। भरतेऽत्र चतुर्विंशः, श्रीवीरो धर्मचक्र्यपि ॥ ४ ॥ श्रुत्वेति भरतश्चक्री, तत्र गत्वाऽब्रवीदिदम्। पारिव्रज्यं न ते वन्दे, न च चक्र्यर्द्धचाक्रिताम् ॥ ५ ॥ किन्तु तातेन यत्प्रोक्तस्त्वं भावी चरमो जिनः। आर्हन्त्यं त्रिजगद्वन्द्यं, तत्ते वन्देऽधुनाऽप्यहम् ॥ ६ ॥ ततः प्रदक्षिणास्तिस्रः, कृत्वा तं भक्तिनिर्भरः। अभिवन्द्य निजं धाम, जगाम भरताधिपः ॥ ७ ॥ तदेवं द्रव्यार्हतां नमस्करणीयत्वात्पूर्वाचार्याचरितत्वाच्च युक्तेयं गाथेति ॥ द्रव्यार्हद्वन्दनार्थोऽयं द्वितीयोऽधिकारः। प्रथमो दण्डकः ॥ तत उत्थाय 'चत्तारि अंगुलाइं पुरओ ऊणाइं जत्थ पच्छिमओ। पायाणं उस्सगो एसा पुण होइ जिणमुद्द ॥ १ ॥' त्ति एवंरूपया जिनमुद्रया चैत्यस्तवदण्डकं पठति; स चायम्—

**अरिहन्तचेइयाणं करेमि काउस्सग्गं वंदणवत्तियाए पूअणवत्तिआए सक्कारवत्तिआए सम्माणवत्तिआए बोहिलाभवत्तिआए निरुवसग्गवत्तिआए सद्धाए मेहाए धिइए धारणाए अणुप्पेहाए वड्ढमाणीए ठामि काउस्सग्गं**

अर्हतां- भावार्हतां चैत्यानि- चित्तसमाधिजनकानि प्रतिमालक्षणानि अर्हच्चैत्यानि तेषां वन्दनादिप्रत्ययं कायोत्सर्गं करोमीति सम्बन्धः। कायस्योत्सर्गः-स्थानमौनध्यानं विना क्रियान्तरनिरासेन त्यागस्तं करोमि। संपत् १ ॥ किंनिमित्तमित्याह—

वन्दनं- प्रशस्तमनोवाक्कायप्रवृत्तिस्तत्प्रत्ययं-तन्निमित्तं, यादृग् वन्दनात् पुण्यं स्यात् तादृग् कायोत्सर्गादपि मे भवत्वित्यर्थः, 'वत्ति-याए' त्ति आर्षत्वात्सिद्धम् । 'पूयणवत्तियाए' पूजनं-गन्धमाल्यादिभिरभ्यर्च्चनं तत्प्रत्ययम्, 'सक्कारवत्तियाए' सत्कारो-वस्त्राभरणादिभिः तत्प्रत्ययम्, नन्वेतौ पूजासत्कारौ द्रव्यस्तवत्वात्साधोः 'छज्जीवनिकायसंजमो' इत्यादिवचनप्रामाण्यात्कथं नानुचितौ?, श्रावकस्य तु साक्षात्तौ कुर्वतः कायोत्सर्गद्वारेण तत्प्रार्थनं कथं न नैरर्थक्यम्[1]?, उच्यते, साधोर्द्रव्यस्तवनिषेधः स्वयंकरणमाश्रित्य, नतु कारणानुमती, यतः-अकसिणपवत्तगाणं ( विरयाविरयाण एस खलु जुत्तो । संसारपयणुकरणो दव्वथए कूवदिट्ठंतो ॥ १ ॥) इत्याद्युपदेशदानतः कारणसद्भावो, भगवतां विशिष्टपूजादिदर्शने प्रमोदादिनाऽनुमतिरपि, यदुक्तम् "सुव्वइ य वइररिसिणा कारवणंपि य अणुट्ठियमिमस्स । वायगगन्थेसु तहा एयगया देसणा चेव ॥१॥" श्रावकस्य त्वेतौ सम्पादयतोऽपि भक्त्यतिशयादाधिक्यसम्पादनार्थं प्रार्थयमानस्य न नैरर्थक्यम्, किंच- एते भगवन्तोऽत्यादरेण वंद्यमानाः पूज्यमाना अप्यनन्तगुणत्वान्न सुवन्दितपूजिताः स्युः, अत्र सम्प्रदायः—

राजा दशार्णभद्रोऽभूद्दशार्णपुरपत्तने । तत्रान्यदा दशार्णाद्रौ, वीरोऽर्हन् समवासरत् ॥ १ ॥ वर्द्धितो नृपतिर्वीरागमेनोद्यानपालकैः । हर्षप्रकर्षादुत्तस्थौ, पृथ्वीशोऽथ निजासनात् ॥२॥ ततः कृतोत्तरासंगः, संमुखं परमेशितुः[2] । गत्वा पदानि सप्ताष्टौ, ववंदे विधिवज्जिनम् ॥ ३ ॥ सिंहासनमथास्थाय[3], तेभ्यो दानं मह‍द्ददौ । ततोऽतिभक्तिसम्भारभ्राजिष्णु[4]र्ध्यातवानिति ॥४॥ श्वो[5] वंदिष्ये तथाऽर्हन्तं, यथाऽन्येन न वन्दितः । ध्यात्वेत्यकारयद्रात्रौ, पुरमुद्यत्पताककम् ॥ ५ ॥ कृताट्टशोभमम्भोभिः, सिक्तभूमि सुगंधिभिः।



१ नैरर्थक्यमिति अप्राप्तस्य हि प्रार्थ । नतु प्राप्तस्येतिभावः २ परमेश्वरस्य ३ अधिष्ठाय ४ शोभमानः ५ कल्ये.

रत्नतोरणपांचाली[1]मंचोन्मंचविराजितम् ॥ ६ ॥ दह्यमानागुरुस्तोम[2]धूमधूम्रनभस्तलम् । स्थाने स्थाने प्रबन्धेन, प्रारब्धानेकनाटकम् ॥ ७ ॥ त्रिभिर्विशेषकम् । प्रातर्विहितशृंगारो, भूपतिर्गन्धसिन्धुर[3]म् । आरूढः सर्वसामन्तैः, सर्वर्द्ध्या सहितैर्वृतः ॥ ८ ॥ प्रत्येकं शिबिकारूढशुद्धान्ते[4]न समन्वितः । त्रिदशस्त्रैण[5]तुल्येन, सहस्रार्द्धमितेन सः ॥९॥ चतुरंगचमू[6]युक्तो, मन्यमानो जगत् तृणम् । वंदितुं श्रीमहावीरं, निर्ययौ निजमन्दिरात् ॥ १० ॥ त्रिभिर्विशेषकम् ॥ गीतवादित्रनृत्यादि, प्रेक्षमाणः पदे पदे । ददद्दानमथार्थिभ्यो, मनोरथपथातिगम् ॥ ११ ॥ गीयमानगुणग्राम[7]ः, क्रियमाणोरुमंगलः । प्रापद् दशार्णभद्रस्तं, दशार्णाभिधभूधरम् ॥ १२ ॥ युग्मम् । उत्तीर्य सिन्धुरस्कन्धात्, प्रविश्य विधिवत्ततः । नृपः समवसृत्यन्तश्चक्रे तिस्रः प्रदक्षिणाः ॥ १३ ॥ नत्वाऽर्हन्तं यथास्थानं, निषण्णो हृदि रंजितम् । वज्री[8] ज्ञात्वाऽथ तच्चित्तं, मनस्येवमचिन्तयत् ॥ १४ ॥ अस्याहो भक्तिरागोऽयं, विश्वपूज्यस्य पूजने । परमेतेन मानेन, दूष्यतेऽमुष्य ही यतः ॥ १५ ॥ सुरासुरनराधीशैः, सर्वैः सर्वर्द्धिभिर्जिनाः । युगपद्यदि पूज्यन्ते, तथापि स्युर्न पूजिताः ॥ १६ ॥ अप्रमेयगुणा ह्येते, पूजा तु प्रमिताऽगिनाम् । अतोऽस्य मानमोक्षार्थं, यतिष्ये शक्तिभक्तितः ॥ १७ ॥ अथैरावणदेवेनाकारयत्तुंगकुंजरान् । चतुःषष्टिसहस्राणि, पर्वतानिव जंगमान् ॥ १८ ॥ तेषु पंचशती जज्ञे, शीर्षाणां द्वादशोत्तरा । प्रत्येकमथ शीर्षेषु, जज्ञिरे चाष्टदन्तकाः ॥ १९ ॥ दन्ते दन्ते च वाप्योऽष्टौ, तत्राप्यष्टाम्बुजानि च । प्रत्येकं लक्षपत्राणि, तेष्वन्तः स्वर्णकर्णिकाः ॥ २० ॥ प्रासादस्तत्र तत्रेन्द्रोऽध्यास्ताग्रमहिषीयुतः । प्रत्येकं तेषु पत्रे[9]षु, पश्यन्नाट्यविधिं परम् ॥ २१ ॥ राजन्[10] स्वाराज्य[11]सम्पत्त्या, देवराजोऽन्ययाऽपि सः । जिनराजं नमस्कर्तुं, दशार्णगिरिमागमत् ॥ २२ ॥ प्रभुं प्रदक्षिणीकृत्य, नमतीन्द्रे गजस्थिते । गजाग्रिमौ

१ पुत्तलिका २समूहः ३हस्तिनं ४अन्तःपुरं ५देवीसमूहः ६सैन्यं ७समूहः ८इन्द्र ९ १६७९६२१६०००लक्षेषु १० दीप्यन् ११ स्वर्गराज्यं.

पदौ ग्राव्णि[1], मग्नावार्द्रभुवीव यत् ॥ २३ ॥ गजाग्रपदकस्तेन, स ख्यातस्तीर्थमुत्तमम् । क्षितीशोऽथ सहस्राक्षं[2], निरीक्ष्येति व्यचिन्तयत् ॥ २४ ॥ अहो रूपमहो ऋद्धिरहो स्त्रैणं च वज्रिणः । अहो भक्तिरहो शक्तिरस्यान्यत्सर्वमप्यहो ॥ २५ ॥ ही कूपभेकवत्स्वर्ध्या, गर्वाल्लाघवमासदम् । ततोऽनर्थप्रदायिन्या, कृतं[3] मेऽतः श्रियाऽनया ॥ २६ ॥ ध्यात्वेति बुद्धिमान् धीरः, पंचभिर्मुष्टिभिः कचान्[4] । उत्खाय तत्क्षणाद्दीक्षां, प्रभुपार्श्वे समाददे ॥ २७ ॥ जितंमन्यो[5]ऽथ राजर्षिं, नत्वोचे हर्षभाक् हरिः[6] । धन्यस्त्वं येन दुष्पूरा, प्रतिज्ञा पूरिता स्वका ॥ २८ ॥ पुनः पुनः प्रशस्यैनं, सुत्रामा[7] स्वर्गमीयिवान्[8] । क्रमात्कर्मक्षयं कृत्वा, राजर्षिस्तु शिवं ययौ ॥२९॥

तदेवं पूजासत्कारौ भावस्तवहेतुत्वाद्भणनीयावेवेति । 'सम्माणवत्तियाए' सन्मानः-स्तवादिभिर्गुणोत्कीर्त्तनं तत्प्रत्ययं, अथैता वन्दनाद्याशंसाः किमर्थमित्याह— 'बोहिलाभवत्तियाए' बोधिः-जिनधर्मप्राप्तिः इह भवे, परत्रापि च सुखेन शुभसामग्र्या जीवस्य बोधिलाभः-प्रेत्य जिनधर्म्मप्राप्तिस्तत्प्रत्ययम्, एषोऽपि किंनिमित्तमित्याह—'निरुवसग्गवत्तियाए' निरुपसर्गो-जन्माद्युपसर्गरहितो मोक्षस्तत्प्रत्ययं । सम्पत् २ ॥ अयं च कायोत्सर्गः श्रद्धादिरहितैः क्रियमाणोऽपि नेष्टसाधक इत्यत आह—श्रद्धया-स्वाभिलाषेण, न बलाभियोगादिना, मेधया-हेयोपादेयपरिज्ञानरूपया, न जडत्वेन अमर्यादावर्त्तितया वा नासमंजसत्वेन, धृत्या-मनःस्वास्थ्येन, न रागाद्याकुलतया, धारणया- अर्हद्गुणाविस्मरणरूपया, न तच्छून्यतया, अनुप्रेक्षया-अर्हद्गुणानामेव पुनः पुनश्चिन्तनेन, न तद्वैकल्येन, वर्द्धमानयेति प्रत्येकं श्रद्धादिभिः सम्बध्यते, एवमेतैर्हेतुभिस्तिष्ठामि-करोमि कायोत्सर्गम्, ननु प्राक् करोमि कायोत्सर्गमित्युक्तमेव किमर्थं पुनः ठामीत्यादि ?, उच्यते, सत्सामीप्ये सद्वद्वेति (५-४-१) सूत्रात्करोमि- करिष्यामि इति क्रिया-



१ पाषाणे २ इन्द्रं ३ न प्रयोजनं ४ केशान् ५ आत्मानं जितं मन्यते ६ इन्द्रः ७ इन्द्रः ८ गतः

भिमुख्यं प्रागुक्तं, अधुना त्वासन्नतरत्वादस्य करणमेव । किं सर्वथा कायोत्सर्गो?, नेत्याह-'अन्नत्थ ऊससिएण'मित्यादि, व्याख्याऽस्य प्रागवत् । अत्रापि विश्रामाष्टकोल्लिंगनपदानि, 'अरिहं वंदण सद्धा, अन्नत्थ सुहुम एव जा ताव । अड संपय तेयाला पय वन्ना दुसय तीसहिया ॥ १ ॥' एष स्थापनार्हद्वन्दनाख्यस्तृतीयोऽधिकारः । द्वितीयो दण्डकः । स्तुतिश्चात्र मूलबिम्बमाश्रित्य देया । ततः स्तुतिदानानन्तरमस्यामवसर्पिण्यां ये भारते वर्षे तीर्थकृतोऽभूवंस्तेषामासन्नोपकारित्वेन नामोत्कीर्त्तनाय चतुर्विंशतिस्तवं पठन्ति—

लोगस्स उज्जोअगरे, धम्मतित्थयरे जिणे । अरिहंते कित्तइस्सं, चउवीसंपि केवली ॥ १ ॥ उसभमजिअं च वंदे, संभवमभिणंदणं च सुमइं च । पउमप्पहं सुपासं, जिणं च चंदप्पहं वंदे ॥ २ ॥ सुविहिं च पुप्फदंतं, सीयल सिज्जंस वासुपुज्जं च । विमलमणंतं च जिणं, धम्मं संतिं च वंदामि ॥ ३ ॥ कुंथुं अरं च मल्लिं, वंदे मुणिसुव्वयं नमिजिणं च । वंदामि रिट्ठनेमिं, पासं तह वद्धमाणं च ॥ ४ ॥ एवं मए अभिथुआ, विहूअरयमला पहीणजरमरणा । चउवीसंपि जिणवरा, तित्थयरा मे पसीयंतु ॥ ५ ॥ कित्तियवंदियमहिया, जेए लोगस्स उत्तमा सिद्धा । आरुग्गबोहिलाभं, समाहिवरमुत्तमं दिंतु ॥ ६ ॥ चंदेसु निम्मलयरा, आइच्चेसु अहिअं पयासयरा । सागरवरगंभीरा, सिद्धा सिद्धिं मम दिसंतु ॥ ७ ॥

लोकस्य-पञ्चास्तिकायात्मकस्य केवलालोकदीपेनोद्योतकरान् प्रकाशकान्, धर्मतीर्थकरान्-नद्यादेः शाक्यादेश्च द्रव्यतीर्थस्य निरासेन संसारोत्तारकसङ्घादिरूपधर्मतीर्थकरणशीलान् , जिनान्-रागादिजेतॄन् , अर्हत इति विशेष्यपदं, तान् कीर्तयिष्ये-नामभिः

स्तोष्ये, चतुर्विंशतिमपि, अपिशब्दाच्छेषक्षेत्रसम्भवांश्च केवलिनो, भावार्हत इत्यर्थः ॥ नामान्येवाह–उसभेत्यादि गाथात्रयं पाठसिद्धम् । नामार्थस्तु सामान्यतो विशेषतश्चोच्यते–तत्र सामान्यत उसभोत्ति समग्रसंयमभारोद्वहनाय वृषभः, एवं तावत्सर्वेऽप्यर्हन्तो वृषभाः प्रथमजिने को विशेष इति, उच्यते--ऊर्वोर्वृषभलाञ्छनत्वात् मातुश्चतुर्दशस्वप्नेषु पूर्वं वृषभदर्शनाच्चेति ऋषभः१॥ एवं सामान्यनामान्वर्थः सर्वेष्वपि भावनीयः । तत्र परीषहादिभिर्न जित इत्यजितः, गर्भस्थेऽस्मिन् जननी द्यूते राज्ञा न जितेति अजितः २॥ सम्भवन्ति चतुस्त्रिंशदतिशयाः अस्मिन् शं-सुखं भवत्यस्मिन्नश्नुते चेति सम्भवः,गर्भस्थेऽस्मिन् पृथ्व्यामधिका शस्यसम्भूतिर्जातेति सम्भवः ३ ॥ अभिनन्द्यते देवेन्द्रादिभिरित्यभिनन्दनः, गर्भात्प्रभृत्येवाभीक्ष्णं शक्रेणाभिनन्दित इत्यभिनन्दनः ४ ॥ शोभना मतिरस्येति सुमतिः, गर्भस्थे अस्मिन् द्वयोः सपत्न्योर्व्यवहारच्छेदने मातुः सुनिश्चिता मतिरभूदिति सुमतिः ५ ॥ निष्पंकतामाश्रित्य पद्मस्येव प्रभाऽस्येति पद्मप्रभः, गर्भस्थे प्रभौ मातुः पद्मशयनदोहदो देवतया पूरितः पद्मवर्णश्चेति पद्मप्रभः ६ ॥ शोभनानि पार्श्वान्यस्येति सुपार्श्वः, गर्भस्थेऽस्मिन् माता सुपार्श्वा जातेति सुपार्श्वः ७ ॥ चन्द्रवत्सौम्या प्रभाऽस्येति चन्द्रप्रभः, गर्भस्थेऽस्मिन् मातुश्चन्द्रपानदोहदोऽभूदिति चन्द्रप्रभः ८ ॥ शोभनो विधिः- आचारोऽस्येति सुविधिः, गर्भस्थेऽस्मिन् मातापि सर्वविधिषु कुशला जातेति सुविधिः ९ ॥ समस्तसत्त्वसन्तापोपशमकत्वात् शीतलः, गर्भस्थेऽस्मिन् पितुः पूर्वोत्पन्नोऽचिकित्स्यः पित्तदाहो राज्ञीकरस्पर्शादेवोपशान्त इति शीतलः १० ॥ विश्वस्यापि श्रेयान्-हितकर इति श्रेयांसः, गर्भस्थेऽस्मिन् केनाप्यनाक्रान्तपूर्वा देवताधिष्ठिता शय्या जनन्या आक्रान्ता श्रेयश्च जातमिति श्रेयांसः ११ ॥ वसवो-देवविशेषास्तेषां पूज्यो वसुपूज्यः स एव वासुपूज्यः, गर्भस्थेऽस्मिन् वसूनि-रत्नानि तैरभीक्ष्णं राजकुलं पूजितवान् वसुपूज्यस्य राज्ञोऽपत्यमिति वा वासुपूज्यः १२ ॥ विमलानि ज्ञानादीन्य-

स्येति विगतमलो वा विमलः, गर्भस्थेऽस्मिन् मातुर्मतिस्तनुश्च विमला जातेति विमलः १३ ॥ अनन्तकर्मांशजयादनन्तानि वा ज्ञानादीन्यस्येत्यनन्तः, गर्भस्थेऽस्मिन् मात्रा रत्नखचितमनन्तं महत्प्रमाणं दाम स्वप्ने दृष्टमिति अनन्तः १४ ॥ दुर्गतौ पतन्तं सत्त्वसङ्घातं धारयतीति धर्मः, गर्भस्थेऽस्मिन् माता दानादिधर्मपरा जातेति धर्मः १५ ॥ शान्त्यात्मकत्वात्तत्कर्तृत्वाच्चेति शान्तिः, अस्मिन् गर्भस्थे पूर्वोत्पन्नाशिवस्य शान्तिर्जातेति शान्तिः १६ ॥ कौ-पृथिव्यां स्थितवानिति निरुक्तात् कुन्थुः, गर्भस्थेऽस्मिन् माता रत्नविचित्रं कुन्थुरूपं दृष्टवतीति कुन्थुः १७ ॥ 'सर्वोत्तमे महासत्त्वाकुले य उपजायते। तस्याभिवृद्धये वृद्धैरसावर उदाहृत ॥१॥ इत्यरः, गर्भस्थेऽस्मिन् मात्रा सर्वरत्नमयोऽरो दृष्ट इति अरः १८ ॥ परीषहादिमल्लजयान्मल्लिः, आर्षत्वादिकारः, गर्भस्थेऽस्मिन् मातुः सर्व्वर्तुककुसुममाल्यशयनीयदोहदो देवतया पूरित इति मल्लिः १९ ॥ मन्यते जगतस्त्रिकालावस्थामिति मुनिः, सुष्ठु व्रतान्यस्येति सुव्रतः, स चासौ सुव्रतश्चेति मुनिसुव्रतः, गर्भस्थेऽस्मिन् माता मुनिवत्सुव्रता जातेति मुनिसुव्रतः २० ॥ परीषहादिनामनान्नमिः, गर्भस्थेऽस्मिन् प्रत्यन्तनृपैरवरुद्धे नगरे भगवत्पुण्यशक्तिप्रेरितां प्राकारोपरिस्थितां भगवन्मातरमवलोक्य ते वैरिनृपाः प्रणता इति नमिः २१॥ अरिष्टस्य-दुरितस्य नेमिः-चक्रधारेवेत्यरिष्टनेमिः, गर्भस्थेऽस्मिन् मात्रा महान् अरिष्टरत्नमय उत्पतन्नेमिर्दृष्ट इति अरिष्टनेमिः, अकारोऽत्रापश्चिमादिशब्दवत् २२ ॥ सर्वभावान् पश्यतीति निरुक्तात्पार्श्वः, गर्भस्थेऽस्मिन् माता शयनीयस्था निशि तमस्यपि सर्पमपश्यदिति पार्श्वः २३॥ उत्पत्तेरारभ्य ज्ञानादिभिर्वर्द्धत इति वर्द्धमानः, गर्भस्थेऽस्मिन् ज्ञातकुलं धनधान्यादिभिर्वृद्धिं गतामिति वर्द्धमानः ॥ २४ ॥ एवं कीर्त्तयित्वा चित्तशुद्धये प्रणिधानमाह- 'एव'मित्यादि, एवं-पूर्वोक्तप्रकारेण मयाऽभिष्टुता नामादिभिः कीर्त्तिताः, किंविशिष्टाः ?-विधूतरजोमलाः, बध्यमानं बद्धं ऐर्यापथं वा कर्म रजः, पूर्वबद्धं निकाचितं साम्परायिकं वा मलः, ते

विधूते-अपनीते यैस्ते विधूतरजोमलाः, अत एव प्रक्षीणजरामरणाः, चतुर्विंशतिरपि जिनवराः, अपिशब्दः प्राग्वत्, 'जिनवराः' श्रुतादिजिनेभ्यः प्रकृष्टास्तीर्थकराः, मे-मम, प्रसीदन्तु-प्रसादपरा भवन्तु। यद्यप्येते वीतरागत्वान्न प्रसीदन्ति तथापि तानचिन्त्य-माहात्म्योपेतान् चिन्तामण्यादीनिव मनःशुद्ध्याऽऽराधयन्नभीष्टफलमवाप्नोतीति। तथा 'कित्तिये'त्यादि, कीर्त्तिताः-स्वनामभिः प्रोक्ताः, वन्दिताः- कायवाङ्मनोभिः स्तुताः, माहिताः-पुष्पादिभिः पूजिताः, य एते ऋषभाद्याः, लोकस्य-प्राणिवर्गस्य कर्ममला-भावेनोत्तमाः, सिद्धा-निष्ठितार्थाः, अरोगस्य भाव आरोग्यं-सिद्धत्वं तस्मै बोधिलाभः-अर्हद्धर्म्मावाप्तिः आरोग्यबोधिलाभस्तं, स चानिदान एव मोक्षाय अतस्तदर्थमाह—समाधिवरं- वरसमाधिं परमस्वास्थ्यरूपं, भावसमाधिमित्यर्थः, सोऽप्यनेकधा तारतम्ये-नातः उत्तमं-सर्वोत्कृष्टं ददतु। भावसमाधिगुणाविर्भावकं जिनदत्ताख्यानकं, तथाहि—

छद्मस्थ एकदा वीरो, वैशाल्यामाययौ बहिः। तस्थौ प्रतिमया[1] देवकुले काले घनागमे[2] ॥ १ ॥ तत्रासीत्परमः श्राद्धो, जिन-दत्ताभिधः सुधीः। च्युतः श्रेष्ठिपदाज्जीर्णश्रेष्ठित्वेन स विश्रुतः ॥२॥ वीरं संवीक्ष्य वन्दित्वा, कृत्वोपास्तिं[3] चिराद् गृहम्। आगाद-हिण्डनेनास्य, तर्कयन्नुपवासिताम् ॥३॥ एवं प्रतिदिनं कुर्वन्, वर्षारात्रमतीत्य सः। दध्यौ स्वाम्यद्य मद्गेहे, यद्यागच्छेत्परेण किम्? ॥ ४ ॥ ध्यायन्निति गृहस्यान्तस्तस्थौ स्वस्थमनाश्चिरम्। मध्याह्ने तु गृहद्वारे, सोऽथ स्थित्वेत्यचिन्तयत् ॥ ५ ॥ यद्यत्रैष्यति वीरोऽद्य, कल्पद्रुरिव जङ्गमः। संमुखस्तस्य यास्यामि, मूर्द्धबद्धाञ्जलिस्तदा ॥ ६ ॥ तं त्रिः प्रदक्षिणीकृत्य, वन्दिष्ये सपरिच्छदः[4]। ततो नेष्ये गृहस्यान्तर्निधानमिव जंगमम् ॥ ७ ॥ प्रधानैस्तत्र पानान्नैः, प्रासुकै[5]रेषणीयकैः[6]। भक्त्या तं पारयिष्यामि, संसाराम्भो-

१ कायोत्सर्गेण २ वर्षासु ३ सेवां ४ सपरीवारः ५ निर्जीवैः ६ उद्गमादिशुद्धैः

धितारकम् ॥८॥ पुनर्नत्वा तु यास्यामि, पदानि कतिचित्ततः । धन्यंमन्यः स्वयं भोक्ष्ये, शेषमुद्धरितं मुदा ॥९॥ एवं मनोरथश्रेणीं, जिनदत्तस्य कुर्वतः । श्रीवीरोऽभिनवश्रेष्ठिगृहं भिक्षार्थमागमत् ॥१०॥ कुल्[1]माषा दापितास्तेन, चेट्या[2] चट्टुकहस्तया। सुपात्रदानतस्तत्र, पञ्च दिव्यानि जज्ञिरे ॥११॥ नृपाद्या मिलितास्तत्र, श्रेष्ठ्यसौ तैः प्रशंसितः । पारयित्वा ततोऽन्यत्र, विहर्तुं प्रभुरभ्यगात् ॥१२॥ जिनदत्तो निशम्याथ, ध्वनन्तं देवदुन्दुभिम् । दध्यौ धिग्मामधन्योऽहं, यन्नायान्मद्गृहं प्रभुः ॥१३॥ तत्पुर्यामथ तत्रा[3]ह्नि, केवली समवासरत् । नृपाद्या एत्य तं नत्वाऽपृच्छन् कः पुण्यवानिह ? ॥ १४ ॥ सोऽथाख्यज्जिनदत्तं तं, राज्ञोचेऽनेन नो जिनः । पारितः पारितः किन्तु, श्रेष्ठिनाऽभिनवेन सः ॥ १५ ॥ केवली कथयित्वाऽस्य, भावनां मूलतोऽपि हि । बभाषे भावतोऽनेन, पारितः परमेश्वरः ॥ १६ ॥ दधानेन समाधिं तं, प्रधानं धीमता[4] तदा । द्वादशस्वर्गसंसर्[5]गयोग्यं कर्म समर्जितम् ॥ १७ ॥ किञ्चान्यद्यदि[6] नाश्रोष्यत्, तदाऽसौ देवदुन्दुभिम् । ततस्तदैव सोऽप्राप्स्यत्केवलज्ञानमुज्ज्वलम् ॥ १८ ॥ अनेन भावशून्येन, नूतनश्रेष्ठिना पुनः । सुपात्रदानतः प्राप्तं, स्वर्णवृष्ट्यादिकं फलम् ॥१९॥ समाधिरहितो जीवः, स्याल्लभेतैहिकं फलम्[7] । समाधिना पुनर्युक्तः, स्वर्गमोक्षावपि क्षणात् ॥ २० ॥ जिनदत्तं प्रशस्याथ, ते सर्वेऽगुर्यथागतम् । जिनास्तदेवं विज्ञेया, नूनं भावसमाधिदाः ॥ २१ ॥

तथा— 'चन्देसु' इत्यादि, पंचम्यर्थे सप्तमी, ततश्चन्द्रेभ्यो निर्मलतराः कर्ममलकलङ्कापगमात्, आदित्येभ्योऽधिकं प्रकाशकराः, केवलोद्योतेन लोकालोकप्रकाशकत्वात्, यदागमः-"चंदाइच्चगहाणं, पभा पयासेइ परिमियं खित्तं । केवलियनाणलंभो लोयालोयं पयासेइ ॥१॥" त्ति, सागरवरः-स्वयम्भूरमणाम्भोधिस्तद्वद्गम्भीराः, परीषहाद्यक्षोभ्यत्वात्, सिद्धाः-क्षीणाशेषकर्माणः,

१ माषाः २ दास्या ३ दिवसे ४ बुद्धिमता ५ प्राप्तिः ६ यदि ७ तर्हि (योज्यमुभयं)

सिद्धिं-परमपदावाप्तिं, मम, दिशन्तु-प्रयच्छन्तु। 'अडवीस पयपमाणा इह संपय वण्ण दुसयछप्पण्णा। नामजिणत्थयरूवो, चउत्थओ एस अहिगारो ॥१॥ एवं चतुर्विंशतिस्तवमुक्त्वा सर्वलोकेऽर्हच्चैत्यानां वन्दनाद्यर्थं कायोत्सर्गकरणायेत्थं पठति-सव्वलोए अरिहन्तचेइयाणमित्यादि वोसिरामीति यावत्, अर्थः प्राग्वत्, नवरं सर्वलोके-अधस्तिर्यगूर्ध्वलोकरूपे, तत्राधोलोके-चमरादिभुवनेषु द्वासप्ततिलक्षाधिकसप्तकोटिसंख्येषु १ तिर्यग्लोके-असंख्येयेषु व्यन्तरनगरद्वीपाचलज्योतिष्कविमानादिषु २ ऊर्ध्वलोके-सौधर्मादिस्वर्गगतविमानेषु त्रयोविंशत्युत्तरसप्तनवतिसहस्राधिकचतुरशीतिलक्षसंख्येष्विति ३। अत एव स्तुतिरत्र सर्वतीर्थकरसाधारणा। एष सर्वलोकस्थापनार्हत्स्तवरूपः पञ्चमोऽधिकारः, तृतीयो दण्डकः ॥ साम्प्रतं येन तेऽर्हन्तस्तत्कथिताश्च भावा ज्ञायन्ते तत्प्रदीपकल्पं श्रुतमर्हति कीर्त्तनं, तत्रापि तत्प्रणेतॄन् प्रथमं स्तौति—

पुक्खरवरदीवड्ढे, धायइसंडे य जंबूदीवे य। भरहेरवयविदेहे, धम्माइगरे णमंसामि ॥१॥

पुष्करवरद्वीपः-तृतीयद्वीपस्तस्यार्द्धे-मानुषोत्तरपर्वतादर्वाग्भागवर्त्तिनि, तथा धातकीखण्डे च-द्वितीयद्वीपे, (जम्बूद्वीपे चाद्ये) यानि भरतैरावतमहाविदेहानि पंचदश क्षेत्राणि तेषु, प्राकृतत्वादेकवचनं, धर्मस्य- श्रुतधर्मस्यादिकरान्नमस्यामि-स्तुवे। एष षष्ठोऽधिकारः ॥ अधुना श्रुतधर्मं स्तौति—

तमतिमिरपडलविद्धंसणस्स सुरगणनरिंदमहिअस्स। सीमाधरस्स वंदे, पप्फोडिअमोहजालस्स ॥ २ ॥ जाईजरामरणसोगपणासणस्स, कल्लाणपुक्खलविसालसुहावहस्स। को देवदाणवनरिंदगणच्चिअस्स, धम्मस्स सारमुवलब्भ करे पमायं ? ॥ ३ ॥ सिद्धे भो ! पयओ णमो जिणमए नंदी सया संजमे, देवंनागसुवण्णकिण्णरगण-

स्सब्भूअभावच्चिए। लोगो जत्थ पइट्ठिओ जगमिणं तेलोक्कमच्चासुरं, धम्मो वड्ढउ सासओ विजयओ धम्मुत्तरं वड्ढउ ॥ ४ ॥

तमः-अज्ञानं तदेव तिमिरं यद्वा बद्धस्पृष्टनिधत्तं ज्ञानावरणीयं कर्म तमः निकाचितं तिमिरं तस्य तयोर्वा पटलं-वृन्दं तद्विध्वंसयति-विनाशयतीति तमस्तिमिरपटलविध्वंसनः, सुरगणनरेन्द्रमहितस्येति व्यक्तम्, सीमायां-मर्यादायां धारयतीति सीमाधरः प्रक्रमात् श्रुतधर्मस्तस्य, प्राकृतत्वात्कर्मणि षष्ठी, अतस्तं वन्दे, तस्य वा यन्माहात्म्यं तद्वन्दे इति सम्बन्धे षष्ठी। प्रकर्षेण स्फोटितं विवेकिनां मोहजालं-मिथ्यात्वादिरूपं येन तस्य ॥ इत्थं श्रुतमभिवन्द्य तस्यैव गुणोपदर्शनपूर्वकमप्रमादविषयतां दर्शयति 'जाईत्यादि' जातिजरामरणशोकप्रणाशनस्य, जातिः-जन्म, शेषं व्यक्तम्, कल्यम्-आरोग्यं अणति-शब्दयतीति कल्याणं पुष्कलं सम्पूर्णं च, न च तदल्पं, किन्तु विशालं-विस्तीर्णं, सुखं आवहयति-प्रापयतीति कल्याणपुष्कलविशालसुखावहस्तस्य। देवदानवनरेन्द्रगणार्चितस्येति तु सुरगणनरेन्द्रमहितस्येत्यस्यैव निगमनम्, व्यक्तश्चैतत्, धर्मस्य-श्रुतधर्मस्य सारं-सामर्थ्यमुपलभ्य कः प्रमादं कुर्यात्?, न कश्चिदित्यर्थः ॥ अत्रार्थे सम्प्रदायः—प्रमादात्सूरिरेकोऽत्र, प्रेत्याभूद्विगतश्रुतः। तत्रोद्यच्छत्स एवाभूत्पारदृश्वा श्रुताम्बुधेः ॥ १ ॥ तथाहि—एकस्मिन् भ्रातरौ गच्छे, गङ्गाकूलनिवासिनौ। व्रतं जगृहतुः शान्तौ, तत्रैकोऽभूद्बहुश्रुतः ॥ २ ॥ सूरिर्जज्ञे क्रमेणासौ, शिष्यैः सूत्रार्थमिच्छुभिः। सेव्यमानो दिनं सर्वं, विश्रामं नाश्नुते क्वचित् ॥ ३ ॥ निशायामपि सूत्रार्थचिन्तनप्रच्छनादिभिः। नाससाद सुखं निद्रामन्वहं व्यग्रमानसः ॥ ४ ॥ भ्राता तस्य द्वितीयस्तु, नित्यमास्ते यथासुखम्। तं च पश्यन्नसौ सूरिर्दध्यौ दुर्बुद्धिबाधितः ॥ ५ ॥ अहो मे बान्धवो धन्यो, योऽयमास्ते सदा सुखी। ज्ञानविज्ञानहीनत्वात्केनाप्यायास्यते

न हि ॥ ६ ॥ अजाकृपाणकल्पेन, ज्ञानेनाहं त्ववाभवम् । दुःखं ततोऽत्र केनापि, विदुषा सूचितं यथा ॥ ७ ॥ मूर्खत्वं हि सखे! ममापि रुचितं तस्मिन्यदष्टौ गुणा, निश्चिन्तो १ बहुभोजनो २ ऽत्रपमना ३ नक्तंदिवाशायकः ४ । कार्याकार्यविचारणान्धबधिरो ५ मानापमाने समः ६, प्रायेणामयवर्जितो ७ दृढवपु ८ मूर्खः सुखं जीवति ॥ ८ ॥ ( शार्दूल० ) इत्थं पुनर्न भावयति, यथा ' नानाशास्त्रसुभाषितामृतरसैः श्रोत्रोत्सवं कुर्वतां, येषां यान्ति दिनानि पण्डितजनव्यायामखिन्नात्मनाम् । तेषां जन्म च जीवितं च सफलं तैरेव भूर्भूषिता, शेषैः किं पशुवद्विवेकरहितैर्भूभारभूतैर्नरैः ॥ ९ ॥ ( शार्दूल० ) ज्ञानप्रद्वेषतश्चैवं, ज्ञानमाशातयन्नसौ । दुष्टबुद्धिः प्रमादेन, ज्ञानघ्नं कर्म बद्धवान् ॥ १० ॥ ज्ञानाचारातिचारं तमनालोच्य विपद्य च । देवोऽभूद्देवलोकेऽसौ, सच्चारित्रप्रभावतः ॥ ११ ॥ च्युत्वाऽऽभीरकुले कस्मिन् , भरतेऽत्र सुतोऽजनि । पितृभ्यामनुरूपां स, कन्यामुद्वाहितो युवा ॥१२॥ तस्यैकदा सुता जज्ञे, सुरूपा भद्रकन्यका । यौवनं प्राप सा यूनां , मनोनयनहारकम् ॥ १२ ॥ अनोधुरि निधायैनां, तत्पिता नगरं प्रति । प्रतस्थे सममाभीरैर्घृतं विक्रेतुमन्यदा ॥ १४ ॥ तामेव पश्यतां तेषामनांसि च मनांसि ज । उत्पथस्थान्यभज्यन्त, सद्यः प्रस्फाल्य कुत्रचित् ॥ १५ ॥ विलक्षीभूय सम्भूय, तैरित्योच्यत तावथ । नाम्नाऽशकटाऽशकटापितेति च मुहुर्मुहुः ॥ १६ ॥ तदेव तस्य वैराग्यं, बभूव लघुकर्मणः । सुतामुद्वाह्य केनापि, दत्त्वा तस्मै धनादिकम् ॥ १७ ॥ गच्छे कस्मिन् स निष्क्रम्य, योगोद्वहनमाद्दतः। कुर्वन्नध्यैष्ट सुस्पष्टमुत्तराध्ययनत्रयम् ॥ १८ ॥ पठतोऽसंस्कृताख्यं तु, तुर्याध्ययनमञ्जसा । तज्ज्ञानावरणीयाख्यमागात्कर्मोदयं ततः ॥ १९ ॥ अधीयानस्य तस्यागादाचाम्लाभ्यां दिनद्वयम् । नैकोऽप्यालापकस्त्वागात् , कृच्छ्रेणाप्यभियोगतः ॥ २० ॥ ततोऽसौ गुरुभिः प्रोचे, किं तेऽनुज्ञाप्यतामिदम् ? । स प्राह भगवन्नस्य, योगः कीदृक् ? ततो गुरुः ॥ २१ ॥ ऊचे यावदिदं नैति, ताव-

दाचाम्लमस्य हि । स स्माह कृतमन्येन, श्रुतेन तपसा च मे ॥२२॥ आचाम्लान्यथ सोऽकार्षीद्, द्वादशाब्दीं समाहितः । क्षयमाप च तत्कर्म, सुखेनाध्यैष्ट तच्छ्रुतम् ॥२३॥ शेषं चापि श्रुतं क्षिप्रमधीते स्म महामतिः । श्रुतभक्तेरिहामुत्र, स सर्वसुखभागभूत् ॥२४॥

यतश्चैवमतः 'सिद्धे भो पयओ' इत्यादि, चतुर्थ्याः स्थाने सप्तमीति सिद्धाय फलाव्यभिचारेण प्रतिष्ठिताय, सकलनयव्यापकत्वेन त्रिकोटीपरिशुद्धत्वेन च प्रत्याख्याताय, भो इत्याद्यतिशायिनामामन्त्रणे, पश्यन्तु भवन्तः, प्रयतः-आदरपरोऽहं भूत्वा, नमो जिनमताय, कुर्वे इति शेषः, तस्मिंश्च सति नन्दिः-समृद्धिः, सदा, संयमे-चारित्रे भूयात्, यदाऽऽर्षम्-'पढमं नाणं तओ दये'त्यादि, किंविशिष्टे संयमे-'देवं' इत्यादि, देवा-वैमानिकाः नागा-धरणादयः शोभनो वर्णो येषां ते सुवर्णा-ज्योतिष्काः किंनरा-व्यन्तरविशेषास्तेषां गणैः-समूहैः सद्भूतभावेनार्चितस्तस्मिन्, अत्र वकारेऽनुस्वारः प्राकृतत्वात् सकारस्य द्वित्वं च, लोक्यत इति लोको-ज्ञानं स यत्र श्रुते प्रतिष्ठितं, किम्भूतं?-त्रैलोक्यमर्त्यासुरं आधाराधेयरूपं, तत्र त्रैलोक्यमूर्ध्वाधस्तिर्यग्लोकलक्षणं तस्मिन्, मर्त्यासुरमित्युपलक्षणत्वान्नारकातिर्यगादिपरिग्रहः,अयमित्थम्भूतो धर्मः-श्रुतधर्मो, वर्द्धतां-वृद्धिं यातु, शाश्वतः-अर्थतो नित्यः, विजयतां परवादिविजयेन, धर्मोत्तरं-चारित्रधर्मस्य प्राधान्यं यथा भवत्येवं वर्द्धतां, पुनर्वृद्ध्यभिधानं प्रत्यहं मोक्षार्थिना ज्ञानवृद्धिर्विधेया इत्युपदेशार्थं ॥ श्रुतस्यैव वन्दनादिप्रत्ययं कायोत्सर्गार्थं पठति-'सुयस्स भगवओ' इत्यादि 'वोसिरामि' इति यावत्, अर्थः प्राग्वत्, नवरं श्रुतस्येति-प्रवचनस्य सामायिकादिचतुर्दशपूर्वपर्यन्तस्य, भगवतः-समग्रैश्वर्यादियुक्तस्य ॥ स्तुतिश्चात्र दातव्या श्रुतस्य, सुयनाणत्थयरूवो, अहिगारो एस होइ सत्तमओ । इह पय संपय सोलस नवुत्तरा वण्ण दुन्नि सया ॥१॥ चतुर्थो दण्डकः । ततश्च सर्वानुष्ठानफलभूतेभ्यः सिद्धेभ्यो नमस्करणायेदं पठति--

**सिद्धाणं बुद्धाणं, पारगयाणं परंपरगयाणं । लोअग्गमुवगयाणं, नमो सया सव्वसिद्धाणं ॥ १ ॥**

सिद्धेभ्यः-परिनिष्ठितार्थेभ्यः, ते च सामान्यतः "कम्मे[1] सिप्पे[2] य विज्जा[3] य, मंते[4] जोगे[5] य आगमे[6] । अत्थ[7] जत्ता[8] अभिप्पाए[9], तवे[10] कम्मक्खए[11] इय ॥ १ ॥" इत्याद्यनेकविधाः स्युरत आह—**बुद्धेभ्यो**-ज्ञाततत्त्वेभ्यः, **पारं**- पर्यन्तं संसारस्य प्रयोजनव्रातस्य वा गताः पारगतास्तेभ्यः, '**परम्परागतेभ्यः**' परम्परया- चतुर्दशगुणस्थान[12]क्रमारोहरूपया, यद्वा कथंचित्कर्मक्षयोपशमादेः सम्यग्दर्शनं ततो ज्ञानं ततश्चारित्रमित्येवंभूतया गतास्तेभ्यः, **लोकाग्रमुपगतेभ्यः**-सिद्धिक्षेत्रं सम्प्राप्तेभ्यः, **नमः सदा सर्वसिद्धेभ्यः**-तीर्थसिद्धादिपंचदशविधेभ्यः, ते चामी- जिणे[13] १ अजिण २ तित्थ ३ तित्था ४ गिहि ५ अण्ण ६ सलिंग ७ थी ८ नर ९ नपुंसा १० । पत्तेय ११ सयंबुद्धा य १२ बुद्धबोहि १३ क्क १४ णिका य ॥१५॥१॥ बुद्धा-आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः । शेषं व्यक्तम् । सिद्धस्तुतिरष्टमोऽधिकारः ॥ अथासन्नोपकारित्वाद्वर्त्तमानतीर्थाधिपतेः श्रीवीरस्वामिनः स्तुतिं पठति—

१ कर्मणि-कृषिवाणिज्यादौ सिद्धो-निपुणः कर्मसिद्धः २ गुरूपदेशके शिल्पे सिद्धः शिल्पसिद्धः ३ विद्यायां स्थले च यस्य सिद्धिः ४ मंत्रे सिद्धः ५ योगासिद्धः- औषधासिद्धः ६ आगमसिद्धः- सर्वसिद्धान्तवेत्ता ७ अर्थसिद्धः- अविद्रव्योपार्जनपरः ८ जले निर्विघ्ना यात्रा स यात्रासिद्धः ९ चतुष्कबुद्धिनिपुणोऽभिप्रायवेत्ता अभिप्रायसिद्धः १० तपःसिद्धो- महातपस्वी ११ कर्मणां क्षयेण सिद्धः कर्म्मक्षयसिद्धः । १२ मिच्छे १ सासण २ मीसे ३, अविरय ४ देसे ५ पमत्त ६ अपमत्ते । ७ नियट्टि ८ अनियट्टि ९ सुहुम १० वसम ११ खीण १२ सजोगि १३ अजोगि १४ गुणा ॥१॥ १३ कर्मग्रन्थे १ तीर्थकरत्वेन सिद्धा जिनसिद्धा ऋषभादिवत्

२ अतीर्थकरसिद्धा भरतादिवत् ३ तीर्थे प्रवृत्ते सिद्धाः जम्बूस्वाम्यादिवत् ४ अतीर्थसिद्धा मरुदेव्यादिवत् ५ गृहस्थलिंगेन सिद्धाः चिलातिपुत्रवत् ६ अन्यलिंगेन सिद्धा वल्कलचीरीवत् ७ साधुवेषेण सिद्धाः स्वलिंगसिद्धाः ८ स्त्रीसिद्धाः चन्दनावत् ९ पुंसिद्धाः इलातीपुत्रवत् १० कृत्रिमनपुंसकसिद्धा गांगेयादिवत् ११ प्रत्येकबुद्धसिद्धाः करकण्डवादिवत् १२ स्वयम्बुद्धासिद्धाः कारणं विनापि आर्द्रकुमारवत् १३ आचार्यबोधिता बुद्धबोधिताः १४ एकसमये एके सन्तो ये सिद्धा एकसिद्धाः १५ एकसमये अनेके सिद्धा अनेकसिद्धाः ।

**जो देवाणवि देवो जं देवा पंजली नमंसंति । तं देवदेवमहिअं, सिरसा वंदे महावीरं ॥ २ ॥**

**यो देवानामपि**-भवनपत्यादीनां पूज्यत्वाद् **देवः**, **यं देवाः प्रांजलयो**-विनयरचितकरसम्पुटा **नमस्यन्ति**, **तं** भगवन्तं **देवदेवैः**- शक्रादिभिर्महितं- पूजितम् **शिरसा वन्दे महावीरम्** ॥ अथ नमस्कारफलप्रदर्शनायाह—

**इक्कोवि नमुक्कारो जिणवरवसहस्स वद्धमाणस्स । संसारसागराओ तारेइ नरं व नारिं वा ॥ ३ ॥**

**एकोऽपि नमस्कारः**, आस्तां बहवो, **'जिनवरवृषभाय'** जिनाः-श्रुतावधिजिनादयस्तेषां वराः केवलिनस्तेषां वृषभः-तीर्थकरनामकर्मोदयादुत्तमो जिनवरवृषभस्तस्मै **वर्द्धमानाय**, किमित्याह—**संसारसागरात्**, तत्र तिर्यग्नरनारकामरभवानुभवलक्षणः संसारः स एव प्रभूतभवस्थित्यादिभिर्दुष्प्राप्यमाणपारत्वात् सागर इव तस्मात्तारयति-पारं नयति, कमित्याह—**नरं वा नारीं वा**, नरग्रहणं पुरुषोत्तमधर्मप्रतिपादनार्थम्, नारीग्रहणं तासामपि तद्भव एव मुक्तिगमनज्ञापनार्थम्, नहि क्वापि स्त्रीषु विशेषेण मुक्तिगमनं प्रति प्रतिबन्धः प्रतिपादितोऽस्ति, तत्कारणस्य रत्नत्रयस्य नरेषु नारीषु चाविशेषेण भणनात्, तत्पालनस्य च उभयत्रापि प्रत्यक्षोपलभ्यमानत्वात्, अथैतासां सप्तमनरकगमनाभावेनोर्ध्वाधोगतिवैषम्यदर्शनात्कैश्चिन्मुक्तिगमनं प्रति विप्रतिपद्यते, तदप्ययु-

क्तम्, नहि यस्याधः स्तोका गतिस्तस्योद्ध्वमपि स्तोकैव, तथाहि- अधोगतौ भुजपरिसर्प्पा द्वितीयां नरकपृथिवीं पक्षिणस्तृतीयां सिंहास्तुर्यां उरगाः पंचमीमेव यावद्यांति, न परतः, परपृथ्वीगमनहेतुतथाविधमनोवीर्यविरहात्, अथ च सर्वेऽप्यूद्ध्वमुत्कर्षतः सहस्रारं यावद्गच्छन्ति, तन्नाधोगतिविषयमनोवीर्यपरिणतिवैषम्यदर्शनादूद्ध्वगतावपि तद्वैषम्यम्, तथाच सति सिद्धं स्त्रीपुंसामधोगतिवैषम्येऽपि निर्वाणं समानमिति। एष नवमोऽधिकारः। एतास्तिस्रः स्तुतयो गणधरकृतत्वात् नियमेनोच्यन्ते, सम्प्रदायाच्च अन्ये अपि, यदाहावश्यकचूर्णिकृत्– "सेसा जहिच्छाए"त्ति।

**उज्जिंतसेलसिहरे दिक्खा नाणं निसीहिया जस्स। तं धम्मचक्कवट्टिं अरिट्ठनेमिं नमंसामि ॥ ४ ॥**

कण्ठ्या। नवरं '**निसीहिय**'त्ति सर्वव्यापारनिषेधात् नैषेधिकी मुक्तिः। एष दशमोऽधिकारः।

अत्र च किंचित्सम्प्रदायागतमुच्यते–पुरा यदेदं श्रीमदुज्जयन्तमहातीर्थमाशाम्बरैः श्रीश्रमणसंघपार्श्वाद्बलादुद्दालयितुं प्रारब्धं तदा संघस्य कायोत्सर्गानुभावेन कम्पितासना शासनदेवता नृपपर्षदि दूरादानीतकन्यामुखेन 'उज्जिन्तसेलसिहरेत्यादि'गाथां चैत्यवन्दनान्तर्गतां कृत्वा समार्पयत्, तत्प्रभृत्येव सकलसंघेन पठ्यमानेयमाजगामेति।

**तथा--चत्तारि अट्ठ दस दो य वंदिया जिणवरा चउवीसं। परमट्ठनिट्ठियट्ठा सिद्धा सिद्धिं मम दिसन्तु ॥५॥**

'**परमट्ठनिट्ठियट्ठ**'त्ति परमार्थेन (न) कल्पनामात्रेण, निष्ठिता अर्था येषां ते तथा, शेषं व्यक्तम्। एष एकादशोऽधिकारः॥ ॥ ५१ ॥

अत्रापि सम्प्रदायः–चम्पायां प्रस्थितं वीरं, नत्वाऽऽपृच्छ्य सगौतमौ। साधू शालमहाशालौ, पृष्ठचम्पामुपेयतुः ॥ १ ॥

---

१ पृष्ठचम्पेयं हिमवदुत्तरतस्तिब्बकाख्यटिबेटविषये प्रसिद्धेतिप्रसिद्धकर्ता.

स्वस्रीयो[1] राट् तयोस्तत्र[2], पितृभ्यां सह गागिलिः । यशोमतीपिठरकाभिधाभ्यां व्रतमाददे ॥ २ ॥ आगच्छतां ततः शालादीनां प्रभुपदान्तिके । केवलज्ञानमुत्पेदे, पंचानामपि वर्त्मनि ॥३॥ गौतमस्तु जिनोपान्ते, ययौ यावद्विवन्दिषुः । प्रचेलुस्तेऽथ शालाद्यास्तावत्केवलिपर्षदि ॥ ४ ॥ ततस्तान् गौतमोऽवादीद्वन्दध्वं किं न भो विभुम् ? । स्वाम्यूचे केवलज्ञानभाजो माऽऽशातयैतकान् ॥ ५ ॥ श्रुत्वेति गौतमेनैते, क्षमयांचक्रिरे ततः । शुश्रुवे प्राग् जिनाख्यातमर्थमेवं जनो ब्रुवन् ॥ ६ ॥ यो भूमिगोचरो देवान्, वन्दतेऽष्टापदे गिरौ । केवलज्ञानमासाद्य, स सिध्यत्यत्र जन्मनि ॥ ७ ॥ चक्रे मनोरथं यावद्गौतमस्तावदर्हता । आदिष्टोऽष्टापदे देवान्, नन्तुं लब्धिनिधे ! व्रज ॥ ८ ॥ सोऽचालीदथ तत्रान्ये, श्रुत्वेति जनवार्त्तया । मुक्तीच्छवोऽचलंस्तत्र, कौण्डिन्याद्यास्तपस्विनः ॥ ९ ॥ तत्र पंचशतीयुक्तः, कोण्डिन्याख्यश्चतुर्थकृत् । आर्द्रमूलफलाहारी, प्रथमां मेखलां ययौ ॥ १० ॥ दिन्नः कुलपतिः षष्ठभोजी पंचशतीयुतः । शुष्कमूलफलाहारी, द्वितीयामारुरोह सः ॥ ११ ॥ सेवाली त्वष्टमासेवी, शुष्कसेवालभोजकः । सोऽपि तावत्परीवारोऽप्यारुरोह तृतीयकाम् ॥ १२ ॥ तदूर्ध्वमक्षमा गन्तुं, ते निरीक्ष्याथ गौतमम् । दध्युः स्थूलधियः स्थूलः, कथमेषोऽधिरोक्ष्यति ? ॥ १३ ॥ सूर्यस्यांशून् समाश्रित्य, तेषामुत्पश्यतामपि । स गरुत्मानिवोड्डीय, ययौ मंक्षु गिरेः शिरः ॥ १४ ॥ गोतमस्येति शक्त्या ते, विस्मिता इत्यचिन्तयन् । अस्य शिष्या भविष्यामः, प्रत्यायातो महात्मनः ॥ १५ ॥ गौतमोऽथ चतुर्द्वारे, चैत्ये दक्षिणदिक्स्थितान् । सम्भवादीन् जिनांस्तत्र, चतुरश्चतुरोऽनमत् ॥ १६ ॥ प्रत्यगाशास्थितानष्टौ, सुपार्श्वादीन् जिनांस्ततः । ततोऽप्युत्तरदिक्संस्थान्, धर्मादींश्च दशार्हतः॥ १७ ॥ ततः पूर्वदिगासीनं, नाभेयमजितं तथा । मानवर्णयुतानेवं, चतुर्विंशतिमर्हतः

---

१ भागिनेयः २ शालमहाशालयोः ।

॥१८॥ ववन्दे विधिवद् वृन्दारकवृन्दाभिवन्दितान् । इतोऽभूद् दुर्दिनं सर्वं, ततः सायं विनिर्ययौ ॥ १९॥ सोऽथ पृथ्वीशिलापट्टे, निषसाद विशारदः । कुबेरोऽथ तदाऽऽगत्य, तं वन्दित्वा निषेदिवान् ॥२०॥ तस्याग्रे गौतमोऽत्युग्रानगारगुणान् जगौ । शङ्काहृत् पुण्डरीकाख्यं, तथाऽध्ययनमुत्तमम् ॥ २१ ॥ ततः सामानिको दध्रे, सहस्रार्द्धमितं सुरः । सम्यक्त्वं च क्रमात्सोऽभूद्वज्रोऽन्त्यो दशपूर्विणाम् ॥ २२ ॥ द्वितीयेऽह्नि जिनान्नत्वाऽवतरन्नथ गौतमः । विज्ञप्तस्तापसैर्भक्त्या, देहि दीक्षां दमीश्वर ! ॥ २३ ॥ दीक्षितास्तेन ते तस्मादुत्तेरुः पर्वतादथ । पारणं परमान्नेन, कारयामास गौतमः ॥ २४ ॥ एकप्रतिग्रहक्षीरैर्दृष्ट्वा भोज्यं च तावताम् । विस्मयात्केवलज्ञानं, पंचशत्याः क्षणादभूत् ॥ २५ ॥ मार्गेऽथ पंचशत्याश्च, शेषाणां जिनदर्शनात् । केवलज्ञानमापुस्ते, तद्दिने शुभभावतः ॥ २६ ॥ गौतमस्तु जिने वीरे, निर्वृते प्राप केवलम् । तदेवं गौतमेनात्र, चतुराद्या जिना नताः ॥ २७ ॥ 'संपय पयप्पमाणा, इह वीस छहत्तरं च वण्णसयं । पणिवायदंडगाइसु पंचमओ दंडओ य इमो ॥ १ ॥' एवमेतत्पठित्वोपचितपुण्यसम्भार उचितेष्वौचित्यप्रवृत्त्यर्थमिदमाह—

**वेयावच्चगराणं संतिगराणं सम्मद्दिट्ठिसमाहिगराणं करेमि काउस्सग्गं अन्नत्थ०**

**वैयावृत्त्यकराणां**-प्रवचनार्थं व्यापृतभावानां गोमुखयक्षादीनां, **शान्तिकराणां** सर्वलोकस्य, **सम्यग्दृष्टिविषये समाधिकराणां**, एषां सम्बन्धिनां, षष्ठ्याः सप्तम्यर्थत्वादेतद्विषयं वा आश्रित्य, **करोमि कायोत्सर्गम्**, अत्र 'वन्दणवत्तियाए' इत्यादि न पठ्यते, तेषामविरतत्वात्, अन्यत्रोच्छ्वसितेनेत्यादि पूर्ववत्, ततः एतेषां स्तुतिं भणित्वा प्रागूवच्छक्रस्तवं च ततः सर्वचैत्यसाधुवन्दनं कृत्वा स्तोत्रं च यथोचितमुद्दामगम्भीरस्वरेण पठित्वा " मुत्तासुत्ती मुद्दा, समा जहिं दोवि गब्भिया हत्था । ते पुण णिलाडदेसे,

लग्गा अन्ने अलग्गत्ति ॥ १ ॥" एवंलक्षणया मुक्ताशुक्तिमुद्रया प्रणिधानं करोति, तच्चेदम्-

**जय वीयराय ! जगगुरु ! होउ मम तुहप्पभावओ भयवं ! । भवनिव्वेओ मग्गाणुसारिआ इट्ठफलसिद्धी ॥ १ ॥ लोगविरुद्धच्चाओ गुरुजणपूआ परत्थकरणं च । सुहगुरुजोगो तव्वयणसेवणा आभवमखंडा ॥ २ ॥ वारिज्जइ जइवि निआणबंधणं वीअराअ ! तुह समए । तहवि मम हुज्ज सेवा भवे भवे तुम्ह चलणाणं ॥३॥ दुक्खखओ कम्मक्खउ समाहिमरणं च बोहिलाभो अ । संपज्जउ मह एअं, तुह नाह ! पणामकरणेणं ॥ ४ ॥ सर्वमङ्गल-माङ्गल्यं, सर्वकल्याणकारणम् । प्रधानं सर्वधर्माणां, जैनं जयति शासनम् ॥ ५ ॥**

**जय वीतराग!, जगद्गुरो!** एतच्च भगवतो विश्वनाथस्य सन्निधापनार्थमामन्त्रणं, **भवतु मम तव प्रभावतः, भगवन्निति** सम्बोधनं भक्त्यतिशयख्यापनार्थम्। किमित्याह- **भवनिर्वेदः**-संसारविरागः, **मार्गानुसारिता**-असद्ग्रहत्यागेन तत्त्वप्रतिपत्तिः, **इष्टफलसिद्धिः**-ऐहिकार्थनिष्पत्तिर्ययोपगृहीतस्य चित्तस्वास्थ्यं भवति॥ **लोकविरुद्धत्यागः**-सर्वजननिन्दादिवर्जनं, यदाह-"सव्वस्स चेव निंदा, विसेसओ तहय गुणसमिद्धाणं । उजुधम्मकरणहसणं, रीढा जणपूयणिज्जाणं ॥ १ ॥ बहुजणविरुद्धसंगो देसादायारलंघणं चेव । उव्वणभोगो य तहा दाणाई पयडमन्ने उ ॥ २ ॥ साहुवसणंमि तोसो सइ सामत्थंमि अपडियारो उ । एमाइयाइं इत्थं लोगविरुद्धाइं नेयाइं ॥ ३ ॥"तथा **गुरुजनपूजा**- मातापित्रादीनां भक्तिः, **परार्थकरणं च**- परहितार्थकरणं, जीवलोकसारं पौरुषचिह्नमेतत् ,**शुभगुरुयोगो**-विशिष्टश्रुतचारित्रयुक्ताचार्यसम्बन्धः,**तद्वचनसेवा**-सद्गुरूपदेशविधानं, न जातुचिदयमहितमुपदिशति, **आभवम्**-संसारम् ,**अखण्डा**-सम्पूर्णा ॥ इदं च प्रणिधानं न निदानरूपं, प्रायो निःसङ्गाभिलापरूपत्वादिति ॥

इदानीं वन्दनाविधिः-तत्र "मुहणंतय २५ देहा २५ वस्सएसु २५ पणवीस हुंति पत्तेयं । छट्ठाणा ६ छग गुरुवयण ६ छच्च गुणा ६ हुंति नायव्वा ॥ १ ॥ अहिगारिणो य पंच य ५ इयरे पंचेव ५ पंच आहरणा ५ । एगोवग्गह १ पंचाभिहाण ५ पंचेव पडिसेहा ५ ॥२॥ आसायण तित्तीसं ३३ दोसा बत्तीस३२ कारणा अट्ठ ८ । छद्दोसा ६ अडनउयं,ठाणसयं १९८ वंदणे होइ ॥३॥ तत्र—दिट्ठिपडिलेहणेगा पप्फोडा तिन्नि तिन्नि अंतरिया । अक्खोडा पक्खोडा,नव नव इय पुत्ति पणवीसा ॥ १ ॥ पायाहिणेण तिय तिय बाहुसु सीसे मुहे य हियए य । पिट्ठीइ हुंति चउरो,छ प्पाए देहपणुवीसा ॥२॥ आवश्यक२५–दुओणयं अहाजायं,किइ-कम्मं बारसावयं । चउस्सिरं तिगुत्तं च, दुपवेसं एगनिक्खमणं ॥ १ ॥ " स्थानानि वचांस्यवग्रह आशातनाश्च सूत्रेण सह व्याख्यास्यन्ते । गुणास्त्वमी-" विणओवयार १ माणस्स भंजणा २ पूयणा गुरुजणस्स ३ । तित्थयराण य आणा ४, सुयधम्माराहणा ५ ऽकिरिया ६ ॥ १ ॥ " विनय एव उपचारो-भक्तिविशेषः,तथा मानस्य-अहंकृतेर्भञ्जनं,गुरुजनस्य पूजा, तीर्थकराणां चाज्ञा, श्रुतधर्माराधना,अक्रियेति सर्वक्रियाविगमादचिरेण मोक्षश्च वन्दनेन स्यादिति । वन्द्या-वन्दनकार्हाः ५ " आयरियउवज्झाए, पवत्ति थेरे तहेव रायणिए । एएसिं किइकम्मं, कायव्वं निज्जरट्ठाए ॥१॥" तत्राचार्योपाध्यायौ प्राग् नमस्कारे व्याख्यातौ, प्रवर्त्यादि-स्वरूपं किंचिदुच्यते यथा—'तवसंजमजोगेसुं, जो जोगो तत्थ तं पवत्तेइ । असहं च नियत्तेई, गणतत्तिल्लो पवत्तीओ ॥ १ ॥ थिरकरणा पुण थेरो, पवत्तिवावारिएसु अत्थेसु । जो जत्थ सीयइ जई, संतबलो तं थिरं कुणइ ॥ २ ॥ रत्नाधिको गणावच्छेदकः, यथा–"उद्धावणो पहावण खित्तोवहिमग्गणासु अविसाई । सुत्तत्थतदुभयविऊ, गणवच्छो एरिसो होइ ॥ १ ॥" चूर्णौ त्वन्यमतेन इत्थमपि, यथा–"अन्ने पुण भणंति–अन्नोवि तहाविहो रायणिओ सोऽवि वंदियव्वो, रायणिओ नाम जो नाणदंसणचरणसाहणेसु

सुट्ठु पयउत्ति ।" अवन्द्या- निष्कारणे वन्दनानर्हाः ५, यथा–पासत्थो ओसन्नो, होइ कुसीलो तहेव संसत्तो । अहछंदोवि य एए, अवंदणिज्जा जिणमयंमि ॥ ६ ॥ तत्र पार्श्वे ज्ञानादीनां तिष्ठतीति पार्श्वस्थः , यथा—" सो पासत्थो दुविहो, सव्वे देसे य होइ नायव्वो । सव्वंमि नाणदंसणचरणाणं जो उ पासंमि ॥ १ ॥ देसंमि य पासत्थो,सिज्जायरऽभिहडरायपिंडं च । नीयं व अग्गपिंडं, भुंजइ निक्कारणे चेव ॥ २ ॥ कुलनिस्साए विहरइ, ठवणकुलाणि अ अकारणे विसई । संखडिपलोयणाए, गच्छइ तह संथवं कुणइ ॥ ३ ॥ " अवसीदति स्म क्रियाशैथिल्यान्मोक्षमार्गे श्रान्त इवावसन्नः, यथा—ओसन्नोवि य दुविहो, सव्वे देसे य तत्थ सव्वंमि। ओबद्धपीढफलगो, ठवियगभोई य नायव्वो ॥ १ ॥ आवस्सयसज्झाए पडिलेहणझाणभिक्खअभत्तट्ठे । आगमणे निग्गमणे, ठाणे य निसीयणतुयट्टे ॥ २ ॥ आवस्सयाइं न करे, अहवावि करेइ हीणमहियाइं । गुरुवयणबलाउ तहा, भणिओ एसो य ओसन्नो ॥ ३ ॥ " कुत्सितं-ज्ञानादित्रयविराधकं शीलं- स्वभावो यस्य स कुशीलः,यथा—"कालविणयाइरहिओ, नाणकुसीलो उ दंसणे इणमो । निस्संकियाइविजुओ, चरणकुसीलो इमो होइ ॥ १ ॥ कोउयभूईकम्मे, पसिणापसिणे निमित्तमाजीवी । कक्ककुरुयाइलक्खण, उवजीवइ विज्जमन्ताई ॥ २ ॥" संविग्नासंविग्नसंसर्गात्तद्भावं संसजते स्मेति संसक्तः, यथा—"पासत्थाईएसुं, संविग्गेसुं च जत्थ मिलई उ । तहिं तारिसओ होई, पियधम्मो अहव इयरो य ॥ ४ ॥ " यथाकथंचिद्गुर्वागमानिरपेक्षतया सर्वकार्येषु छन्दः-अभिप्रायो यस्य स यथाछन्दः, यथा—"उस्सुत्तमणुवइट्ठं, सच्छंदविगप्पियं अणणुवाई । परतत्ति पवत्तेती णेओ इणमो अहाछंदो ॥ ५ ॥ " " पासत्थाई वंदमाणस्स, नेव कित्ती न निज्जरा होइ । कायकिलेसं एमेव, कुणई तह कम्मबंधं च ।"

ज्ञातानि–दव्वे भावे वंदण १ रयहरणा २ ऽऽवत्त ३ नमण ४ विणएहिं ५। सीयल १ खुड्डय २ कण्हे ३ संब ४ पालय ५

उदाहरणा ॥ १ ॥" तत्र वन्दने-गुणस्तुतौ शीतलाचार्यदृष्टान्तः, स चायं-एगस्स रण्णो पुत्तो सीयलो नाम राया, भइणी सिंगार-सुंदरी, सा विक्कमसीहेण परिणीया, अन्नया सीयलो सो य निव्विण्णकामभोगो पव्वइओ, तस्स य भइणी अण्णस्स रण्णो दिन्ना, तीसे चत्तारि पुत्ता जाया, सा तेसिं कहंतरे कहेइ जहा तुज्झं माउलो पव्वइओ, एवं कालो वच्चइ । तेऽवि अन्नया तहारूवाणं थेराणं अंतिए पव्वइया, चत्तारिवि बहुस्सुया जाया, आयरियं पुच्छिउं माउलगवंदगा जंति, एगंमि नगरे सुओ, तत्थ गया, वियालो जाओत्तिकाउं बाहिरियाए ठिया, सावगो य नयरं पविसिउकामो, सो तेहिं भणिओ-सीयलायरियाणं कहेहि 'जं तुज्झं भाइणिज्जाऽत्थ आगया, वियालुत्ति न पविट्ठा, तेण कहियं, तुट्ठो । इमेसिंपि रत्तिं सुभेण अज्झवसाणेण चउण्हवि केवलनाणं समुप्पन्नं, पभाए आयरिया दिसाओ पलोयंति,इत्ताहे! मुहुत्तेणं एहिंति, पोरिसिसुत्तं मण्णे करिस्संति, तओ अइचिराविए देवकुलियं गया, ते य वीयरागा नाढायंति, तओ आयरिएणं दंडओ ठविओ, पडिक्कंते आलोइए भणइ-कओ वंदामि ?, ते भणंति--जओ भे पडिहायइ,सो चिंतेइ-'अहो दुट्ठसेहा न लज्जंति'तहवि रोसेणं वंदइ,चउसुवि वंदिएसु [केवली किर पुव्वं पवत्तं उवयारं न भंजइ, जाव न नज्जइ, एस जीयकप्पो,तेसु नत्थि पुव्वपवत्तो उवयारुत्ति] ते भणंति'दव्ववंदणेणं वंदिया,इयाणिं भाववंदणेणं वंदाहि', तं च किर वंदंतं कसायकंडएहिं छट्ठाणवडियं पिच्छंति,सो भणइ-एयंपि नज्जइ?,भणंति-बाढं,किं अइसओ अत्थि?,आमं,किं छाउमत्थिओ केवलिओ?, केवली भणंति-केवलिओ, सो किर तहेव उस्ससियरोमकूवो अहो मए मंदभग्गेण केवली आसाइयत्ति संवेगमागओ, तेहिं चेव कंडयठाणेहिं पडिनियत्तोत्ति जाव अपुव्वकरणं पविट्ठो, केवलनाणं समुप्पन्नं चउत्थवंदणसमत्तीए । सा चेव काइया चिट्ठा एगंमि बंधाय एगंमि मुक्खाय । पुव्वं दव्ववंदणं आसी, पच्छा भाववंदणं ॥

द्रव्यचितौ-रजोहरणादिधारणे भावचितौ-ज्ञानादित्रये क्षुल्लकाचार्यकथा, तद्यथा-एगो खुड्डगो आयरिएण कालं करेमाणेण लक्खणजुत्तत्ता आयरिओ ठविओ,ते सव्वे पव्वइयगा तस्स खुड्डगस्स आणानिद्देसे वट्टंति, तेसिं च गीयत्थाणं थेराणं मूले पढइ, अन्नया मोहणिज्जेण बाहिज्जंतेण भिक्खागएसु साहूसु बितिज्जएण सन्नापाणयं आणावित्ता मत्तयं गहाय उवहयपरिणामो वच्चइ एगदिसाए, परिस्संतो इक्कंमि वणसंडे वीसमइ, तस्स पुप्फफालियस्स मज्झे समीरुक्खस्स पेढं बद्धं, लोगो तत्थ पूयं करेइ, तिलगबउलाईणं न किंचिवि, सो चिंतइ-एयस्स पेढस्स गुणेण एग ( याव ) ई से पूया किज्जइ, ताहे सो भणइ- एए किं न अच्चेह ?, ते भणंति- पुव्विल्लएहिं कइल्लयं एयं, तं च पुणो वंदइ, तस्सवि चिंता जाया-पिच्छ जारिसं समीरुक्खं तारिसो अहं, अन्नेवि तत्थ बहुस्सुया रायपुत्ता इब्भपुत्ता अत्थि ते न ठविया, अहं ठविओ, ममं पूयंति, कत्तो मज्झ समणत्तणं ?, रयहरणचेइगुणेणं वंदंति, पडिनियत्तो, इअरेवि भिक्खाओ आगया,मग्गंति, न लहंति सुइं वा पउत्तिं वा, सो आगओ, आलोएइ- जहाऽहं संनाभूमीं गओ, सूलो उद्धाइओ, तत्थ पडिओ, अच्छिओ, इयाणिं उवसंतो आगओमि,ते तुट्टा, पच्छा गीयत्थाणं आलोएइ पायच्छित्तं च पडिवज्जइ । तस्स पुव्विं दव्वचिई, पच्छा भावचिई जाया ॥

आवर्त्तादिकृतिकर्मणि कृष्णदृष्टान्तः, स चायं-अह बारवई कइया, वासारत्ते पहू समोसरिओ । पुट्ठो कण्हेण मुणी, विहरंति न कीस वासासु ? ॥ १ ॥ भणइ पहू बहुजीवा, पुहई वासासु तेण न चरंति । तो विण्हू अंतेउरमज्झगओ गमइ चउमासं ॥२॥ वीरो नाम कुविन्दो, हरिभत्तो सो पवेसमलभंतो । दारं पूइय वच्चइ, न जिमइ हरिदंसणेण विणा ॥ ३ ॥ वित्ते वासारत्ते,रायाणो वीरओ य संपत्तो । पुट्ठो हरिणा वीरय ! किं दीससि दुब्बलो अहियं ? ॥ ४ ॥ वित्तीहिं जहावित्ते, कहिए कण्होऽवि अख-

लियपवेसं । वीरं काउं पत्तो, सपरियणो सामिनमणत्थं ॥ ५ ॥ वंदिय नेमिं सोउं , जइधम्मं तो हरी भणइ एवं । न खमो वयस्स तहविहु, तं कारिस्सामि अन्नेहिं ॥ ६ ॥ अणुमोइस्सामि तहा, अन्नो जो कोवि गिण्हिही दिक्खं । नियपुत्तस्स व तस्स उ, निक्खमणमहूसवं काउं ॥ ७ ॥ इय नियमं घित्तु हरी, गिहागओ अह विवाहजोगाओ । कन्नाओ पायपडणत्थमागयाओ भणइ एवं ॥ ८ ॥ वच्छाउ ! किं भविस्सह, दासीओ अहव सामिणीओ य ? । ताओ भणंति अम्हे उ, सामिणीओ भविस्सामो ॥ ९ ॥ तो पहुपासे दिक्खं, गिण्हह आमंति ताहि भणियंमि । निक्खमणमहामाहिमं, काउं पव्वावए विण्हू ॥ १० ॥ एगाए देवीए, हरिपासे पेसिया नियकन्ना । सिक्खविऊण तओ सा, साहइ दासी भविस्सामि ॥ ११ ॥ सोऊण इमं कण्हो, चिंतइ अन्नावि मा कुणउ एवं । तो तेण सण्णिओ वीरओ य सुकयं कहइ नियय़ं ॥ १२ ॥ तक्कहियं सोउ हरी, अत्थाणे भणइ बीयदिवसंमि । निसुणंतु निवा! सव्वे, विरियं वीरस्स य कुलं च ॥ १३ ॥ जेण रत्तफणो नागो, वसंतो बदरीवणे । हओ पुढविसत्थेण, वे मई नाम खत्तिओ ॥ १४ ॥ जेण चक्खुक्खया गंगा, वहंती कलुसोदयं । धारिया वामपाएणं, वे मई नाम खत्तिओ ॥१५॥ जेण घोसवई सेणा, वसंती कलसीपुरे । निरुद्धा वामहत्थेण, वे मई नाम खत्तिओ ॥ १६ ॥ ता केउमंजरीए, इमाइ धूयाइ एस उचिय वरो । इय वुत्ते से हरिणा, अणिच्छमाणस्स सा दिण्णा ॥ १७ ॥ वीरोवि कण्हभीओ, तं परिणिय नियगिहंमि नेऊणं । सुस्सूसं कुणइ सयं, सपरियणो तीइ रयणिदिणं ॥ १८ ॥ हरिणा कयाइ पुट्ठो, किं तुह आणं करेइ मे धूया ? । वीरो भणइ अहं खलु, आणाकारी तुह सुआए ॥ १९ ॥ भणइ हरी जइ कम्माइं, तं न कारेसि नत्थि तुह ठाणं । वीरो हरिचित्तण्णू , तो गिहपत्तो तयं भणइ ॥ २० ॥ पज्जणियं कुणसु लहुं, साविहु पडिभणइ कोलिया ! अप्पं । न मुणसि ? तो वीरेणं रज्जूए ताडिया बाढं ॥२१॥

तो सा गंतु साहइ, रुयमाणी तं हरिस्स भणइ इमो । सामित्तं मुत्तु तया, दासत्तं मग्गियं तुमए ॥ २२ ॥ सा भणइ ताय! इण्हिपि मज्झ सामित्तणं तयं कुणसु । भणइ हरी जइ नवरं, मण्णिस्सइ वीरओ एयं ॥ २३ ॥ तीए बाढं भणिओ, कण्हो वीराउ मोइऊण तयं । पव्वावेई पहुणा, निक्खमणमहूसवं काउं ॥ २४ ॥ अन्नया अरिट्ठनेमिसामी समोसरिओ, राया निग्गओ, अट्ठारसवि समणसाहस्सीओ वासुदेवो वंदिउंकामो भट्टारयं पुच्छइ-'अहं साहू कयरेणं वंदणेणं वंदामि ?, केण पुच्छसि- दव्ववंदणएणं भाववंदणएणं ?, सो भणइ- जेण तुब्भे वंदिया होह, सामी भणइ- भाववंदणेणं वंदाहि, ताहे सव्वे साहुणो बारसावत्तवंदणेणं वंदइ, रायाणो परिसंता ठिया, वीरओ वासुदेवाणुवित्तीए वंदइ, कण्हो बद्धसेओ जाओ,भट्टारओ पुच्छिओ,जहा अहं तीहिं सट्ठेहिं संगामसएहिं न एवं परिसंतो म्हि, सामी भणइ-तुमे खइयं सम्मत्तं उप्पाडियं, तुमए एयाए सद्धाए तित्थयरनामगोयं कम्मं निव्वत्तियं, जया विद्धो पाओ तया निंदणगरिहणाए सत्तमाए पुढवीए बद्धेल्लयं आउयं उव्वेढंतेण तच्चं पुढविमाणीयं, जइ आउयं धरंतो तो पढमं पुढविमाणंतो, अण्णे भणंति-इहेव वंदंतेणवि । भावे किइकम्मं वासुदेवस्स, दव्वे वीरगस्सत्ति ॥

शिरोनमनपूजायां **सेवकदृष्टान्तः**,स चायं-एगस्स रण्णो दो सेवगा,तेसिं अल्लीणा गामा,तेसिं सीमानिमित्तं भंडणयं जायं,ताहे नगरं रायसमीवं संपट्ठिया,तेहिं साहू दिट्ठो, तत्थेगो भणइ-साधुं दृष्ट्वा ध्रुवा सिद्धिः, तिपयाहिणं काऊणं वंदित्ता गओ, बिइओऽवि तस्स किरुघुट्टयं करेइ, सोवि वंदइ, तं चेव भणइ । ववहारो आबद्धो ( पढमो ) जिओ । तस्स दव्वपूया, इयरस्स भावपूया ॥ ४ ॥ विनयकर्मणि **शाम्बपालकदृष्टान्तः**—स चायम्–

भयवंपि नेमिनाहो, बारवईए पुणोवि संपत्तो । कण्हस्स पाहुडेणं, वरतुरओ आगओ तइया ॥ १ ॥ हरिणा पालयसंबाइ

नियसुया जंपिया पए जो उ । पढमं नमिही सामिं, तस्स इमं देमि वरतुरयं ॥ २ ॥ संबो पभायसमए, सिज्जाओ उट्ठिओ गिहेवि ठिओ । थुइथुत्तमंगलाइहिं, वंदए भावओ नेमिं ॥ ३ ॥ लोभाभिभूयचित्तो, अंतिमजामंमि जामिणीए य । उट्ठित्तु पालओ अभवसिद्धिओ गंतु समुसरणे ॥ ४ ॥ अक्कोसइ हियएण, बाहिरवित्तीहिं वंदए सामिं । जंपइ हरिस्स पुच्छंतयस्स पहु ! सक्खिओ होज्जा ॥ ५ ॥ इय भणिऊण नियत्तो, मिलिओ मग्गंमि केसवस्स तओ । भणइ मह देसु आसं, सामि मे वंदिओ पुव्विं ॥ ६ ॥ राया जंपइ को इत्थ, सक्खिओ ? सोवि भणइ नेमिजिणो । तो पत्तो ओसरणे, उवविट्ठो वंदिऊण पहुं ॥ ७ ॥ हरिणा पुट्ठो सामी पढमं केणऽज्ज वंदिया तुब्भे? । पहु भणइ दव्वओ पालएण भावा य संबेण ॥ ८ ॥ संबस्स य तुट्ठेणं, दिन्नो आसो जहिच्छिएणं च । निक्कासिओ य इयरो, भावविहीणुत्ति कण्हेणं ॥ ९ ॥ नामानि "वंदण १ चिइ २ किइकम्मं ३, पूयाकम्मं च ४ विणयकम्मं च ५ । वंदणगस्स य एए, नामाइं हवंति पंचेव ॥ १ ॥" एतानि प्रागुक्तशीतलादिदृष्टान्तेषु भावितार्थानि ॥ वन्दनकस्य पञ्चैतानि निषेधस्थानानि 'वक्खित्त पराहुत्ते, पमत्ते मा कयाइ वंदिज्जा । आहारं व करिंते, नीहारं वा जइ करेइ ॥ १ ॥" व्याक्षिप्तोऽनुयोगप्रतिलेखनाद्यैः, प्रमत्तो निद्राद्यैः, शेषं व्यक्तं ॥

दोषाः ३२-"अणाढियं च थद्धं च, पविट्ठं परिपिंडियं । टोलगई अंकुसं चेव, तहा कच्छवरिंगियं ॥१॥ मच्छुव्वत्तं मणसावि, पउट्ठं तहय वेइयाबद्धं । भयसा चेव भयंतं, मित्तीगारवकारणा ॥ २ ॥ तेणियं पडिणीयं चेव, रुट्ठं तज्जियमेव य । सढं च हीलियं चेव, तहा विपलिउंचियं ॥ ३ ॥ दिट्ठमदिट्ठं च तहा, सिंगं व करमोयणं । आलिट्ठमणालिट्ठं, [ ग्रन्थाग्रं १००० ] ऊणं उत्तरचूलियं ॥ ४ ॥ मूयं च ढड्ढरं चेव, चुडुलियं च अपच्छिमं । बत्ती-

सदोसपरिसुद्धं, किईकम्मं पउंजए ॥ ५ ॥ एषां व्याख्या–अनादृतम्- आदररहितं, यद्वन्दनं तद्दोषदुष्टमिति सर्वत्र योज्यम् १ 
स्तब्धं देहमनोभ्यां स्तब्धत्वाच्चतुर्द्धा २ प्रविष्टं-वन्दमानस्येतस्ततः पर्यटनं ३ परिपिण्डितं- प्रभूतवन्द्यानां युगपद्वन्दनं संपिण्डित-
करचरणस्य वा अव्यक्तवर्णोच्चारणतो वा ४ टोलगति-तिन्दुवत् उत्प्लुत्योत्प्लुत्य ५ अंकुशं-हस्तादावाकृष्य गुरूनुपवेशयतः ६
कच्छपरिङ्गितम्-अग्रतोऽभिमुखं च कच्छप इव चलतः ७ मत्स्योद्वृत्तं- मत्स्य इवोद्वेलतः वन्दितुकामस्य वान्यं झषवद् द्रुतं
परावर्त्तमानस्य ८ मनसा प्रद्विष्टं-गुरोरुपरि प्रद्विष्टस्य ९ वेदिकाबद्धं-जान्वोरुपरि हस्तौ निवेश्य १ अधो वा २ उत्संगे वा ३ जानु-
मेकं ४ द्वौ वा करद्वयान्तः ५ कृत्वा १० भयेन-संघकुलगच्छादिभ्यो बिभ्यतः ११ भजमानं-भजते भक्ष्यते वा मां गुरुरिति बुद्धि-
मतः १२ मैत्री- मित्रं मे आचार्यो मैत्री भवत्वनेन सहेति वा १३ गौरवं-सामाचारीकुशलोऽहमिति गर्वेण १४ कारणात्- वस्त्रादि-
लाभहेतोः १५ स्तैनिकं लाघवभयात्प्रच्छन्नं १६ प्रत्यनीकं-आहारादिकाले १७ रुष्टं-क्रुद्धस्य गुरोर्वा १८ तर्जितं-न कुप्यसि न प्रसी-
दसि वा किं त्वया वन्दितेनेत्यादि वदतः १९ शठं-विश्रम्भार्थं ग्लानत्वामिषेण वा न सम्यक् २० हीलितं-गणिन्! वाचकेत्यादिवचो-
भिर्हसतः २१ विपरिकुञ्चितं- अर्द्धवन्दिते एव देशादिविकथाः कुर्वतः २२ दृष्टादृष्टं- तमसि एवमेवासीनस्य दृष्टस्य तु सम्य-
गावर्त्तादीन् कुर्वतः २३ शृङ्गं- आवर्तेषु शिरसो वामदक्षिणे शृंगे स्पृशतः २४ करं- राजकर इव मन्यमानस्य २५ मो-
चनं- न मुच्येऽहमस्मादिति चिन्तयतः २६ आश्लिष्टानाश्लिष्टं- रजोहरणशिरोभ्यामाश्लेषानाश्लेषाच्चतुर्द्धा २७ न्यूनं-व्यंजना-
वश्यकैरसम्पूर्णं २८ उत्तरचूलं-वन्दनानन्तरं मस्तकेनवन्दे इत्यभिदधतः २९ मूकं-अव्यक्तस्वरं ३० ढड्ढरं महच्छब्दं ३१
चूडुलिकं-उल्मुकवद्रजोहरणं बिभ्रतः, हस्तं भ्रमयित्वा सर्वान् वन्दे इति वा वदतः ३२ ॥ किइकम्मंपि कुणंतो, न होइ किइकम्मनि- 

ज्जराभागी । बत्तीसामन्नयरं, साहू ठाणं विराहंतो ॥ १ ॥ बत्तीसदोसपरिसुद्धं, किइकम्मं जो पउंजइ गुरूणं। सो पावइ निव्वाणं, अचिरेण विमाणवासं वा ॥ २ ॥



कारणानि ८-पडिकमणे १ सज्झाए २, काउस्सग्गा ३ वराह ४ पाहुणए ५। आलोयण ६ संवरणे ७, उत्तमट्ठे य ८ वंदणयं ॥ १ ॥ सर्वमप्यनुष्ठानं प्रथमं साधूनुद्दिश्य सूत्रेऽभिहितं, श्राद्धस्य तु यथायोग्यमायोजनीयम्। तत्र प्रतिक्रमणे उभयोरपि वन्दनम्, 'चत्तारि पडिक्कमणे किइकम्मा' इति वचनात् १ तथा साधोः स्वाध्यायस्य प्रस्थापने प्रवेदने प्रतिक्रमणे आसनानुज्ञापने च २ कायोत्सर्गे च विकृत्यनुज्ञारूपे३ तथोभयोरपि अपराधक्षामणायां ४ प्राघूर्णके५ आलोचनायां च६ संवरणे-भक्तार्थिनः केनचित्कारणेन पुनरभक्तार्थप्रत्याख्याने दिवसचरिमप्रत्याख्याने वा७ उत्तमार्थे च-आराधनाकाले८ इति। दोषाः ६-माणो१ अविणय२ खिंसा ३, नीयागोयं ४ अबोहि ५ भववुड्ढी ६। अनमंते छद्दोसा, एवं अडनउय ठाणसयं ॥ १ ॥ इदानीं वन्दनकसूत्रं व्याख्यायते—इह शिष्यो विधिवत्प्रतिलेखितमुखवस्त्रिकात्मदेहः ईषच्चावनतकायः करद्वयगृहीतरजोहरणादिः अवग्रहाद् बहिः स्थितो वन्दनायोद्यत एवमाह—

**इच्छामि खमासमणो! वंदिउं जावणिज्जाए निसीहिआए, अणुजाणह मे मिउग्गहं, निसीहि, अहोकायं कायसंफासं खमणिज्जो भे किलामो, अप्पकिलंताणं बहुसुभेण भे दिवसो वइक्कंतो ?, जत्ता भे ?, जवणिज्जं च भे ?, खामेमि खमासमणो !, देवसिअं वइक्कमं, आवस्सिआए पडिक्कमामि खमासमणाणं देवसिआए आसायणाए तित्तीसन्नयराए जंकिंचिमिच्छाए मणदुक्कडाए वयदुक्कडाए कायदुक्कडाए कोहाए माणाए मायाए लोभाए सव्वका-**

**लिआए सव्वमिच्छोवयाराए सव्वधम्माइक्कमणाए आसायणाए जो मे अइयारो कओ तस्स खमासमणो! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ॥**

इच्छामि-अभिलषामि, हे **क्षमाश्रमण**-क्षमोपलक्षितदशविधश्रमणधर्मप्रधान!, **वन्दितुं**-नमस्कर्तुं, **'यापनीयया'** याप्यते-कालः क्षिप्यते यया सा यापनीया तया, शक्तिसमन्वितयेत्यर्थः, कया?-**'नैषेधिक्या'** निषेधः-प्रणातिपातादिनिवृत्तिरूपः प्रयोजनं यस्याः सा नैषेधिकी-तनुस्तया इतीच्छानिवेदनं प्रथमं स्थानं १, यथा "इच्छा य १ अणुन्नवणा २, अव्वाबाहं च ३ जत्त ४ जवणा य ५। अवराहखामणावि य ६, छ ट्ठाणा हुंति वंदणए ॥ १ ॥" अत्रान्तरे यदि व्याक्षिप्तो गुरुस्तदा भणति-प्रतीक्षस्वेति आवश्यकचूर्णौ, वृत्तौ तिविहेणेति तु, त्रिविधेनेति मनोवाक्कायैः संक्षेपेण वन्दस्वेत्यर्थः, ततः शिष्यः संक्षेपेण वन्दते, अव्याक्षिप्तस्तु छन्देनेति भणतीति प्रथमं गुरुवचनम्। यथा–छंदेण १ ऽणुजाणामि २, तहत्ति ३ तुज्झंपि वट्टए ४ एवं ५। अहमवि खामेमि तुमं ६, वयणाइं वंदणरिहस्स ॥ १ ॥" छन्देनेति कोऽर्थः?-ममापि निराबाधमेतादिति। ततः शिष्यो ब्रूते—**अनुजानीत**-अनुमन्यध्वं **मे**-मम **मितावग्रहम्**, तत्र यथा—देविंद १ राय २ गिहवइ ३, सागरि ४ साहम्मि ५ उग्गहा पंच। गुरुउग्गहो पुणो इह, आयपमाणो चउदिसंपि ॥१॥ इति द्वितीयं स्थानम्। अत्र गुरुवचनम्- अनुजानामीति २। शिष्यो **नैषिधिक्या**- निषिद्धान्यव्यापाररूपया अवग्रहे प्रविश्य विधिनोपविश्य गुरुपादौ स्वललाटं च कराभ्यां स्पृशन्निदमाह—**अधकायः**-गुरुचरणलक्षणं प्रति **कायेन**-मदीयहस्तललाटलक्षणेन **संस्पृशन्**, तमप्यनुजानीध्वमिति योगः, ततं उन्नम्य मूर्द्धबद्धांजलिर्गुरुमुखानिविष्टदृष्टिरिदमाह—**क्षमणीयः**-सोढव्यो **भे**-भवद्भिः **क्लमः**- संस्पर्शे सति देहबाधारूपः **अल्पक्लान्तानां**- निराबाधानां, **बहुशुभेन**, **भे**-भवतां,

दिवसो व्यतिक्रान्तः१, दिवसग्रहणं रात्र्याद्युपलक्षणार्थं दिवसे च तीर्थप्रवर्त्तनं पाक्षिकाद्यनुष्ठानं प्रशस्तश्च स इति ज्ञापनार्थमिति तृतीयं स्थानम् । अत्र गुरुवचनं 'तहत्ति' तथेति, यथा त्वं ब्रूषे तथाऽस्तीत्यर्थः ३। शिष्यो देहवार्त्तां पृष्ट्वा संयमवार्त्तां पृच्छति- 'जत्ता भे' यात्रा- संयमस्वाध्यायादिरूपा भे- भवतामुपसर्प्पतीति तुर्यं स्थानम्, अत्र गुरुवचनम्- 'तुज्झंपि वट्टए' त्ति मम तावत्संयमयात्रोत्सर्पति तवापि सोत्सर्पतीत्यर्थः ४ । पुनर्विनेयः प्राह--'जवणिज्जं च भे' यापनीयं च-इन्द्रियनोइन्द्रियैरबाधितं भे-भवतां, शरीरमिति गम्यमिति पञ्चमं स्थानम् । 'एवं' तथेत्यर्थः ५ । पुनः शिष्यो ब्रूते-'क्षमयामि क्षमाश्रमण! दैवसिकं व्यतिक्रमं- स्वापराधमिति षष्ठं, अत्र गुरुवचनम्-'अहमवि खामेमि तुब्भे' अहमपि क्षमयामि युष्मान् अविधिशिक्षणादिकं व्यतिक्रमं ६ । ततो विनेयोऽभ्युत्थाय 'आवस्सियाए' इत्यादिना आलोचनार्हेण 'तस्स खमासमणो पडिक्कमामि' इत्यादिना प्रतिक्रमणार्हेण च प्रायश्चित्तेनात्मानं शोधयितुकामो अवग्रहान्निःसृत्येदं पठति-'आवस्सियाए' इत्यादि, अवश्यकार्येषु चरणकरणेषु भवा क्रिया आवश्यिकी तया हेतुभूतया आसेवनाद्वारेण यदसाध्वनुष्ठितं तस्मात्प्रतिक्रमामि-निवर्त्ते, इत्थं सामान्येनाभिधाय विशेषेणाह-क्षमाश्रमणानां सम्बन्धिन्या दैवसिक्या ज्ञानाद्यायस्य शातना-खण्डना आशातना,निरुक्त्या यलोपः,तया, किंविशिष्टया? त्रयस्त्रिंशदन्यतरया त्र्यधिकत्रिंशदाशातनानामेकतरया, ताश्चेमाः—

"पुरओ पक्खासन्ने,गंता३चिट्ठण६निसीयणा९ऽऽयमणे१०। आलोयण११पडिसुणणे१२पुव्वालवणे१३य आलोए१४॥१॥ तह उवदंस१५ निमंतण१६ खद्धा १७ यमणे १८ तहा अपडिसुणणे१९। खद्धत्ति य २० तत्थ गए २१ किं २२ तुम२३ तज्जाय२४ नो सुमणे २५ ॥२॥ नो सरसि२६ कहं छित्ता२७ परिसं भित्ता २८ अणुट्ठियाइ कहे २९। संथा-

रपायघट्टण३० चिट्ठु३१ च्च३२ समासणे ३३ आवि॥३॥ आसां व्याख्या—गुरोः पुरतः पार्श्वयोरासन्ने च पृष्ठतः प्रत्येकं गमनं ३ स्थानं ३ निषदनं ३ कुर्वतः ९ गुरोः पूर्वं बहिर्गतेनाचमनं १० पूर्वं गमनागमनालोचनं ११ रात्रौ कः स्वपिति? को जागर्तीति पृच्छति गुरौ जाग्रतोऽप्यप्रतिश्रवणं १२ पूर्वं साध्वादेरागतस्य प्रथममालपनं १३ भिक्षां शैक्षकस्य कस्यचिदालोच्य पश्चाद् गुरोरालोचनं १४ एवं गुरोरुपदर्शनं १५ निमंत्रणं च गुरुमनापृच्छ्य यथारुचि साधुभ्यः 'खद्धे'ति प्रचुरं ददतः १७ गुरोर्यत्किंचिद्दत्त्वा स्वयं स्निग्धमधुराद्युपभोगादनं १८ अप्रतिश्रवणं रात्रिवच्छेषकालेऽपि १९ 'खद्धे'ति गुरुं प्रति निष्ठुरभणनं २० 'तत्थ गए'त्ति तत्रस्थस्यैव प्रतिवचनं ददतः २१ गुरुं प्रति किमिति वचनं २२ त्वंकारश्च २३ गुरुणेदं कुर्वित्युक्तो यूयमेव किं न कुरुध्वमिति तज्जातवचनं २४ गुरौ कथां कथयति उपहतमनस्त्वं २५ न स्मरसि त्वं नायमर्थः सम्भवति २६ स्वयं कथनेन कथाछेदनम् २७ अधुना भिक्षावेला इत्यादिमिषैः पर्षद्भेदनम् २८ अनुत्थितायां पर्षदि सविशेषकथनं २९ गुरुशय्यादेः पादेन घट्टनं ३० 'चिट्ठ'त्ति गुरुशय्यादौ निषदनादि३१एवमुच्चासने३२एवं समासनेऽपीति ३३॥ साम्प्रतमेतास्वेव किंचिद्विशेषेणाह— जंकिंचि मिच्छाए'त्ति यत्किंचित् कदालम्बनमाश्रित्य मिथ्याभावोऽत्रास्तीत्यभ्रादित्वादकारे (मिथ्या तया मिथ्यया) मिथ्याभावयुक्तयेत्यर्थः, तथा मनोदुष्कृतया-प्रद्वेषनिमित्तयेत्यर्थः वाग्दुष्कृतया-असत्यपरुषादिवचननिमित्तया कायदुष्कृतया-आसन्नगमनस्थानादिनिमित्तया,क्रोधभावोऽत्रास्तीति क्रोधा तया क्रोधया,एवं मानया मायया लोभया, क्रोधादिभिर्जनितयेत्यर्थः, सार्वकालिक्या-अतीतानागतवर्त्तमानकालकृतया,एष्यत्काले कथमाशातना?, उच्यते, श्वोऽस्य गुरोरिदमिदं वाऽनिष्टं कर्त्ताऽस्मीतिचिन्तया, सर्व एव मिथ्योपचारा-मातृस्थानगर्भा भक्तिविशेषा यस्यां सा सर्वमिथ्योपचारा तया, सर्व्वे धर्मा-अष्टौ प्रवचनमातरः करणीय-

व्यापारा वा तेषामतिक्रमणं-लङ्घनं यस्यां सा सर्वधर्मातिक्रमणा तया, एवंभूतया आशातनयायो मया अतिचारः-अपराधःकृतो विहितः, तस्यातिचारस्य हे क्षमाश्रमण! युष्मत्साक्षिकं प्रतिक्रमामि-अपुनःकरणेन निवर्त्ते, तथा दुष्टकर्मकारिणं निन्दाम्यात्मानं उद्विग्नेन चेतसा, तथा गर्हे युष्मत्साक्षिकं, तथा व्युत्सृजाम्यात्मानमाशातनाकरणकालवर्त्यात्मानुमतित्यागेनेति॥ द्वितीयवन्दनकमप्येवमेव, नवरमावश्यिकीनिष्क्रमणरहितम् ॥ एवं वन्दनकं दत्त्वा अवग्रहान्तःस्थ एव शिष्योऽतिचारालोचनं कर्तुकामः किंचिदवनतकायो गुरुं प्रतीदमाह—

इच्छाकारेण संदिसह भगवान्! देवसियं आलोउं?, इच्छं, आलोएमि, जो मे देवसिओ अइआरो कओ काइओ वाइओ माणसिओ उस्सुत्तो उम्मग्गो अकप्पो अकरणिज्जो दुज्झाओ दुव्विचिंतिओ अणायारो अणिच्छिअव्वो असावगपाउग्गो नाणे दंसणे चरित्ताचरित्ते सुए सामाइए तिण्हं गुत्तीणं चउण्हं कसायाणं पंचण्हमणुव्वयाणं तिण्हं गुणव्वयाणं चउण्हं सिक्खावयाणं बारसविहस्स सावगधम्मस्स जं खंडिअं जं विराहिअं तस्स मिच्छामि दुक्कडं ॥

इच्छाकारेण-निजेच्छया, न पुनर्बलाभियोगादिना, सन्दिशत- आदेशं ददत दैवसिकं- दिवसभवमतीचारमिति गम्यम्, एवं रात्रिकादिकमपि द्रष्टव्यम्, आलोचयामि मर्यादया सामस्त्येन वा प्रकाशयामि। अत्रान्तरे आलोचयेति गुरुवचः श्रुत्वा शिष्यो वक्ति- इच्छामि- अभ्युपगच्छामि युष्मद्वचः, आलोचयामि-पूर्वमभ्युपगतमर्थं क्रियया दर्शयामि, आलोचनामेव साक्षात्कारेणाह- यो मया दैवसिकोऽतिचारः कृतः, स पुनरनेकधा भवति तत आह-कायिको वाचिको मानसिकः, कायिकं च दर्शयन्नाह-उत्सूत्रः-

सिद्धान्तविरुद्धः **उन्मार्गः**-क्षायोपशमिकभावरूपं मार्गमतिक्रम्य औदयिकभावेन कृत इत्यर्थः, **अकल्प्यः**-अकल्पनीयः'**अकरणिज्जो**, कर्तुमनुचितः, हेतुहेतुमद्भावश्चात्र, यत एव उत्सूत्रोऽत एवोन्मार्ग इत्यादि । उक्तः कायिको वाचिकश्च, मानसिकमाह-**दुर्ध्यातः** एकाग्रचित्ततया आर्त्तरौद्रलक्षणः, दुर्विचिन्तितः अशुभ एव चलचित्ततया, 'जं थिरमज्झवसाणं, तं झाणं जं चलं तयं चित्तं' इति वचनात् , यत एवेत्थम्भूतोऽत एवानाचारः, यत एवानाचारोऽत एवानेष्टव्योऽत एवाश्रावकप्रायोग्यः, क्व विषये ? इत्याह- **ज्ञाने दर्शने चारित्राचारित्रे**- देशविरतिरूपे, एतान्येव व्याचष्टे- **श्रुते** अकालस्वाध्यायादिकः **सामायिके**- सम्यक्त्वसामायिकरूपे शंकादिर्योऽतिचारः, चारित्राचारित्रातिचारं तु भेदेनाह- **तिसृणां गुप्तीनां, चतुर्णां कषायाणां पंचानामणुव्रतानां त्रयाणां गुणव्रतानां चतुर्णां शिक्षाव्रतानां**,सर्वव्रतमीलनेन **द्वादशविधस्य श्रावकधर्मस्य यत् खंडितं**-देशतो भग्नं **यद्विराधितं** सर्वतो भग्नं **तस्य मिथ्या मे दुष्कृतम्** ॥ पुनरपि विनेयोऽवनतकायः प्रवर्द्धमानसंवगो मायादिदोषमुक्तः आत्मनः सर्वशुद्ध्यर्थमिदं भणति-

**सव्वस्सवि देवसिअ दुच्चिंतिअ दुब्भासिअ दुच्चिट्ठिअ इच्छाकारेण संदिसह** भगवान् ? गुरुः '**पडिक्कमह**' **तस्स मिच्छामि दुक्कडं ।**

सुगमं, नवरं सर्वाण्यपि लुप्तषष्ठ्येकवचनान्तानि पदानि ॥ ततोऽवग्रहान्निःसृत्य पुनर्वन्दनं दत्त्वाऽपराधक्षामणोद्यत एवमाह-

**इच्छाकारेण संदिसह अब्भुट्ठिओमि अब्भिंतरदेवसियं खामेउं?, इच्छं, खामेमि देवसियं, जंकिंचि अपत्तिअं परपत्तिअं भत्ते पाणे विणए वेआवच्चे आलावे संलावे उच्चासणे समासणे अंतरभासाए उवरिभासाए जंकिंचि मज्झ विणयपरिहीणं सुहुमं वा बायरं वा तुब्भे जाणह अहं न जाणामि तस्स मिच्छामि दुक्कडं ।**

इच्छाकारेण सन्दिशत अभ्युत्थितोऽस्मि-अभ्युद्यतोऽस्मि अभ्यन्तरं 'देवसिय'मिति दिवसाभ्यन्तरसम्भवमतिचारं क्षमयितुं-मर्षयितुं,ततःक्षमयस्वेत्यत्र गुरुवचः श्रुत्वा पुनः शिष्यः प्राह-इच्छामि भगवदाज्ञां, क्षमयामि दैवसिकं स्वापराधं, ततो विधिवत्पंचांगस्पृष्टभूतलो मुखवस्त्रिकया स्थगितवदनदेश इदमाह-यत्किंचित् सामान्यतःअप्रीतिकं-अप्रीतिमात्रं पराप्रीतिकं-प्रकृष्टाप्रीतिकं, क्व विषये ?- भक्ते पाने विनये-अभ्युत्थानादिके वैयावृत्त्ये- औषधपथ्याद्यवष्टम्भरूपे आलापे-सकृज्जल्परूपे संलापे-मिथःकथारूपे,उच्चासने समासने,गुरोरासनादिति गम्यम् , अंतरभाषायां-गुरोर्भाषमाणस्य विचालभाषणरूपायां उपरिभाषायां गुरुभाषणानन्तरमेव विशेषतरभाषणरूपायां,एषु भक्तादिषु यत्किंचित् मम विनयपरिहीणं-भक्तिवियुक्तं,सञ्जातमित्यर्थः, सूक्ष्मं वा अल्पप्रायश्चित्तशोध्यं बादरं वा-गरिष्ठप्रायश्चित्तशोध्यं,यूयं जानीथ,सकलभाववेदकत्वात् ,अहं न जानामि, मूढत्वात् , तस्याप्रीतिकादिविषयस्यातिचारस्य मिथ्या मे दुष्कृतमिति ॥ पुनरपि वन्दनं दत्त्वा शक्त्यनुरूपं प्रत्याख्यानं करोति--

तत्र- प्रत्याख्यानानि १ तद्भंगा२--ऽऽकार ३ सूत्रा ४ र्थ ५ शुद्धयः ६ । प्रत्याख्यानफलं चात्र ७, किंचिदेवोच्यतेऽधुना ॥ १ ॥ तत्र प्रत्याख्यानं द्विधा मूलगुणप्रत्याख्यानोत्तरगुणप्रत्याख्यानभेदात् ,मूलगुणप्रत्याख्यानं द्विधा देशसर्वभेदात् , सर्वमूलगुणप्रत्याख्यानं साधूनां पंच महाव्रतानि, देशमूलगुणप्रत्याख्यानं श्राद्धानां पंचाणुव्रतानि, उत्तरगुणप्रत्याख्यानमपि द्वेधा- देशसर्वभेदात् , साधूनां सर्वोत्तरगुणप्रत्याख्यानमनेकधा, यथा- पिण्डस्स जा विसोही समिईओ भावणा तवो दुविहो । पडिमा अभिग्गहावि य, उत्तरगुणमो वियाणाहि ॥ १ ॥ श्राद्धानां देशोत्तरगुणप्रत्याख्यानं यथायोग्यमनागतादि दशधा, यथा-- अणागयमइक्कंतं, कोडीसहियं नियंटियं चेव । सागारमणागारं, परिमाणकडं निरवसेसं ॥ १ ॥ संकेयं चेव अद्धाए, पच्चक्खाणं तु दसविहं

होइ । सयमेवणुपालणियं, दाणुवएसो जहसमाही ॥ २ ॥ तत्र पर्युषणादौ ग्लानत्ववैयावृत्त्यादिकारणसद्भावे तदर्वागपि यदष्टमादि क्रियते तदनागतं १, एवमतिक्रान्ते पर्वणि यत्क्रियते तदतिक्रान्तं २, एकस्य निष्ठाकाले अन्यस्य च ग्रहणकाले प्रत्याख्यानस्याद्यन्तकोटिद्वयमीलनात्कोटिसहितं ३, मासे अमुष्मिन् दिवसे वा यदष्टमादि विधेयं हृष्टेन ग्लानेन वा तन्नियंत्रितं, एतच्चतुर्दशपूर्विषु जिनकल्पेन प्रथमसंहननेन च सह व्यवच्छिन्नं ४ सहाकारैः-महत्तराद्यैर्यद्वर्त्तते तत्साकारं ५ निर्गतं महत्तरादिकारणात् निराकारं ६ दत्तिकवलादीयत्तया परिमाणकृतं ७ सर्वाशनपानत्यागान्निरवशेषम् ८ अंगुष्ठग्रन्थ्यादिचिह्नोपलक्षितं संकेतम् ९ अद्धा-कालस्तदुपलक्षितमद्धाप्रत्याख्यानं, तद्दशधा, यथा नवकार १ पोरिसीए २, पुरिमड्ढ ३ क्कासणे ४ गठाणे य ५ । आयंबिल ६ अभत्तट्ठे ७ चरिमे य ८ अभिग्गहे ९ विगई १० ॥ १ ॥ द्वारम् १ । भंगकास्तु सप्तचत्वारिंशं शतं भवन्ति, ते चैवं-तिन्नि तिया तिन्नि दुया, तिन्निक्किक्का य हुंति जोगेसु । तिदुएगं तिदुएगं, तिदुएगं चेव करणाइं ॥ १ ॥ एवं स्थापितेषु

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ३ | ३ | ३ | २ | २ | २ | १ | १ | १ | योगाः |
| ३ | २ | १ | ३ | २ | १ | ३ | २ | १ | करणानि |
| १ | ३ | ३ | ३ | ९ | ९ | ३ | ९ | ९ | एवं ४९ भंगाः |

योगकरणेषु गाथोक्तांकसमैरंकैर्वर्तने एकोनपंचाशद्भंगाः स्युः, ते चैवं--प्रथमांके ऊर्ध्वाधस्त्रिकरूपे मनोवाक्कायैर्न करोति न कारयति नानुमन्यते चेत्येको भंगः,द्वितीये त्रिकद्विकरूपे मनोवाक्कायैर्न करोति न कारयति, न करोति नानुमन्यते, न कारयति नानुमन्यते चेति भंगत्रयं, एवमन्येऽपि स्वधिया वाच्याः । ततस्तेऽतीतानागतवर्त्तमानकालत्रिकेण गुणिताः सप्तचत्वारिंशद् (शं) भंगशतं स्याद्, उक्तंच-- "पढमे लब्भइ एगो, सेसेसु पएसु तियतियतियंति । दो नव तिय दो नवगा तिगुणिय सीयाल भंगसयं ॥ १ ॥ सीयालं भंगसयं, पच्चक्खाणंमि जस्स उवलद्धं । सो खलु पच्चक्खाणे, कुसलो सेसा

अकुसलत्ति ॥ २ ॥ यद्वा-' इत्थं पच्चक्खायापच्चक्खावितयाण चउभंगी । जाणगऽजाणपएहिं निप्फण्णा होइ नायव्वा ॥ १ ॥ ज्ञो ज्ञस्य पार्श्वे प्रत्याख्यातीति शुद्धः १ ज्ञोऽज्ञस्य पार्श्वे- गुर्वाद्यभावे बहुमानतो गुरुपितृपितृव्यादेः सकाशे शुद्धः २ अज्ञो ज्ञस्य पार्श्वे तदैव संक्षेपेण ज्ञापिते शुद्धः ३ अज्ञोऽज्ञस्याशुद्ध एव ४ । द्वारम् २ । प्रत्याख्यानस्य भंगे तु गुरुदोषः, यथा- वयभंगे गुरुदोसो थेवस्सवि पालणा गुणकरी य । गुरुलाघवं च नेयं, धम्मंमि अओ य आगारा ॥ १ ॥ दो चेव नमुक्कारे, आगारा छच्च पोरिसीए य । सत्तेव य पुरिमड्ढे, एगासणगंमि अट्ठेव ॥ २ ॥ सत्तेगट्ठाणस्स उ, अट्ठेव य अंबिलंमि आगारा । पंचेव अभत्तट्ठे, छप्पाणे चरमि चत्तारि ॥ ३ ॥ पंच चउरो अभिग्गहे निव्वीए अट्ठ नव य आगारा । अप्पाउरणे पंच य, हवंति सेसेसु चत्तारि ॥ ४ ॥ निर्विकृतौ अष्ट नव च, कथं ?, नवणीओगाहिमए, अद्दवदहिपिसियघयगुले चेव । नव आगारा एसिं, सेसदवाणं तु अट्ठेव ॥ १ ॥ अप्रावरणे चोलपट्टकाकारः पंचमः । द्वारं ३। साम्प्रतं सूत्रार्थौ---

**उग्गए सूरे नमुक्कारसहियं पच्चक्खामि, चउव्विहंपि आहारं, असणं पाणं खाइमं साइमं, अन्नत्थणाभोगेणं सहसागारेणं वोसिरामि १ ॥**

उद्गते सूर्ये नमस्कारसहितं प्रत्याख्यातीति गुरुर्ब्रूते, शिष्यस्तु प्रत्याख्यामीति, एवमन्यत्रापि । इदं च मुहूर्त्तमानकालं, रात्रिभोजनप्रत्याख्यानतीरणरूपत्वादस्य, नमस्कारसहितमिति मुहूर्त्तादुपर्यपि यावन्नमस्कारेण न पारयामि तावत्, किमित्याह--चतुर्विधमप्याहारं अशनं पानं खाद्यं स्वाद्यं, तत्र- असणं ओयण सत्तुग मुग्ग जगाराइ खज्जगविही य । खीराइ सूरणाई, मंडकपभिई य विन्नेयं ॥ १ ॥ पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव । आउकाओ सव्वो ककडगजलाइयं च तहा ॥ २ ॥ भत्तोसं दंताई

खज्जूरं नालिकेरदक्खाई । कक्कडिअंबकफणसाइ, बहुविहं खाइमं नेयं ॥ ३ ॥ दंतवणं तंबोलं, चित्तं तुलसीउहेडगाईयं । महुपिप्पलिसुंठाइ, अणेगहा साइमं होइ ॥ ४ ॥ अन्यत्रानाभोगात्, अनाभोगः-अत्यन्तं विस्मृतिः, तथा सहसाकारात् सहसाकारः-अतिप्रवृत्तियोगादनिवर्त्तनं, ताभ्यामन्यत्र व्युत्सृजामि-त्यजामि ॥

**पोरिसीयं पच्चक्खामि उग्गए सूरे चउव्विहंपि आहारं असणं पाणं खाइमं साइमं, अन्नत्थणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणेणं सव्वसमाहिवत्तियागारेणं वोसिरामि २ ॥**

व्याख्या सर्वत्र प्राग्वत्, विशेषस्तूच्यते--पुरुषः प्रमाणमस्याः सा पौरुषी छाया, कथं ?, कर्कसंक्रान्तौ पूर्वाह्णे अपराह्णे वा शरीरप्रमाणच्छाया भवति तदा पौरुषी, प्रहर इत्यर्थः, तद्रेखां याम्योत्तरायतां यदा देहच्छायापर्यन्तः स्पृशति तदा सर्वदिनेषु पौरुषी, यद्वा पुरुषस्योर्द्ध्वस्थितस्य दक्षिणकर्णनिवेशितार्कबिम्बस्य दक्षिणायनाद्यदिने यदा जानुच्छाया द्विपदा भवति तदा पौरुषी, यथा-- 'आसाढे मासे दुपया, पोसे मासे चउप्पया । चित्तासोएसु मासेसु, तिपया हवइ पोरिसी ॥ १ ॥' हानिवृद्धी त्वेवं 'अंगुलं सत्तरत्तेणं, पक्खेणं तु दुअंगुलं । वड्ढए हायए वावि, मासेणं चउरंगुलं ॥ १ ॥ 'साहुवयणेण' मित्यत्र पादोनप्रहरेणाप्यधिकारोऽतस्तत्र पौरुषीछायोपरि प्रक्षेपोऽयम् 'जिट्ठामूले आसाढसावणे छहि अंगुलेहि पडिलेहा । अट्ठहि बीयतइयंमि, तइए दस अट्ठहि चउत्थे ॥ १ ॥' सार्द्धपौरुषी त्वेवं-- पोसे तणुछायाए नवहि पएहिं तु पोरिसी सड्ढा । ताविक्केक्का हाणी, जावासाढे पया तिन्नि ॥ १ ॥ पूर्वार्द्धोऽग्रे वक्ष्यमाणोऽपि प्रमाणप्रस्तावादिहैव विज्ञेयः-'पोसे विहत्थिछाया, बारसअंगुलपमाण पुरिमड्ढे । मासि दुअंगुलहाणी, आसाढे निट्ठिया सव्वे ॥ १ ॥' सुखावबोधार्थं स्थापना चैषाम् ॥ साम्प्रतं सूत्रशेषो व्याख्यायते-- तत्र 'पच्छण्ण-

| का | | मा | पो | मा | फा | चै | वै | ज्ये | आ | श्रा | भा | आ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| पौ | ३-४ | ३-८ | ४ | ३-८ | ३-४ | ३ | २-८ | २-४ | २ | २-४ | २-८ | ३ |
| साधु | ८ | १० | १० | १० | ८ | ८ | ८ | ६ | ६ | ६ | ८ | ८ |
| सार्ध | ७ | ८ | ९ | ८ | ७ | ६ | ५ | ४ | ३ | ४ | ५ | ६ |
| पु (वि) अं | ८ | १० | १२ | १० | ८ | ६ | ४ | २ | ० | २ | ४ | ६ |

कालेणं' ति प्रच्छन्नता कालस्य मेघरजोगिर्यन्तरितत्वेन सूर्येऽदृश्यमाने अपूर्णायामपि पौरुष्यां पूर्णेतिबुद्ध्या भुंजानस्य न भंगः, ज्ञाते तु यत् मुखे तद्भस्मानि करस्थं तु भाजने मुक्त्वा तथैव स्थातव्यं यावत्पौरुषी पूर्यते, ततः परं भोक्तव्यं, अन्यथा भुंजानस्य तु भंग एव, एवं दिग्मोहेऽपि यदा पूर्वामपि पश्चिमामिति जानाति तदा पौरुष्यामपूर्णायामपि भुंजानस्य न भंगः, मोहविगमे तु पूर्वतन एव विधिः । साधुवचनम्-उद्घाटपौरुषीत्यादि विभ्रमकारणं, तच्च श्रुत्वा भुंजानस्य न भंगः, ज्ञाते तु अन्येन वा कथिते प्राग् विधिः । कृतपौरुषीप्रत्याख्यानस्य तीव्रशूलादिना विह्वलस्य समाधिनिमित्तमौषधपथ्यादिः प्रत्ययः-कारणं स एवाकारः ॥ सार्धपौरुषी पौरुष्यन्तर्भूतैव ।

**सूरे उग्गए पुरिमड्ढं पच्चक्खामि, चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अण्णत्थणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरामि ३ ॥**

पूर्वमर्द्धं पूर्वार्द्धं- दिनस्याद्यं प्रहरद्वयं, '**महत्तरागारेणं**' महत्तराकारः बृहत्तरनिर्जरालाभहेतुभूतं पुरुषान्तरासाध्यं ग्लानचैत्यसंघादिप्रयोजनं तदेवाकारः, यच्चात्रैव महत्तराकारस्य पाठः न नमस्कारसहितादौ तत्र च कालमहत्त्वाल्पत्वे हेतू ॥

**एगासणं पच्चक्खामि चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं**

**सागारियागारेणं आउंटणपसारेणं गुरुअब्भुट्ठाणेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरामि ४॥**

एकं-सकृदशनं-भोजनं एकं वा आसनं पुताचलनतो यत्र तदेकाशनमेकासनं वा, 'सागारिकागारो' यतः सागारिको- गृहस्थः स एवाकारस्तस्य पश्यतोऽन्यत्रापि गत्वा भुंजानस्य न भंगः, तत्समक्षभोजने तु महादोषः, यदार्षम्—''छक्कायदयावंतोवि संजओ दुल्लहं कुणइ बोहिं। आहारे नीहारे, दुगुंछिए पिंडगहणे य ॥ १ ॥' गृहस्थस्य तु येन दृष्टं भोजनं न जीर्यति स सागारिको बन्दिकादिर्वा, आकुंचने प्रसारणे च क्रियमाणे किंचिदासनं चलति तत्रापि न भंगः, गुरोः-आचार्यस्य प्राघूर्णकस्य वा साधोरागच्छतोऽभ्युत्थानेऽपि न भंगः, पारिष्ठापनिकागारः साधोरेव, यथा परिष्ठापनं-सर्वथा त्यजनं प्रयोजनमस्य पारिष्ठापनिकमन्नं तदेवाकारः पारिष्ठापनिकाकारः, तत्र हि त्यज्यमाने बहुदोषसम्भवादाश्रीयमाणादावागमिकन्यायेन गुणसम्भवाच्च गुर्वाज्ञया पुनर्भुंजानस्य न भंगः, 'विहिगहियं विहिभुत्तं, उव्वरियं जं भवे असणमाई। तं गुरुणाऽणुन्नायं, कप्पइ आयंबिलाईणं ॥ १ ॥' श्रावकस्त्वखण्डसूत्रत्वादुच्चरति ॥

**'एगठाणं पच्चक्खामि चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अण्णत्थणाभोगेणं सहसागारेणं सागारियागारेणं गुरुअब्भुट्ठाणेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरामि ५ ॥**

मुखं दक्षिणपाणिं वाऽशक्यपरिहार्यत्वात् मुक्त्वा शेषांगोपांगानां प्रथमनिवेशरूपमेकं स्थानं यत्र तदेकस्थानम् ५ ॥

**आयंबिलं पच्चक्खामि अन्नत्थणाभोगेणं सहसागारेणं लेवालेवेणं गिहत्थसंसट्ठेणं उक्खित्तविवेगेणं पारि-**

**ट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरामि ६ ॥**

आयामः- अवश्रावणम् , अम्लं- चतुर्थो रसः, एते व्यंजने प्रायो यत्र भोजने ओदनकुल्माषसक्तुप्रभृतिके तदाचाम्लं समयभाषयोच्यते, लेपो भोजनभाजनस्य विकृत्या तीमनादिना वा, अलेपोऽगुल्यादिसंलेखनतः, लेपश्चालेपश्च तस्मादन्यत्र, तथा शुष्कौदनादिभक्ते पतिते पूर्वस्य द्रवविकृत्यादिद्रव्यस्योत् क्षिप्तस्य-उद्धृतस्य विवेको-निःशेषतया त्याग उत्क्षिप्तविवेकः। गृहस्थस्य भक्तदायकस्य सम्बन्धि करोटिकादिभाजनं विकृत्यादिनोपलिप्तं गृहस्थसंसृष्टं ६ ॥

**सूरे उग्गए अभत्तट्ठं पच्चक्खामि चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरामि ७ ॥**

न विद्यते भक्तार्थोऽस्मिन् प्रत्याख्याने सोऽभक्तार्थः, स उपवास इत्यर्थः ॥ यदि चात्र त्रिविधाहारस्य तदा पारिष्ठापनिकं कल्पते, चतुर्विधाहारस्य तु पानकेऽप्युद्धरित एव कल्पते ॥ अत्र च साधवः शक्तिसद्भावे पौरुष्यादीनि चतुर्विधाहारस्य प्रत्याख्यान्ति, तदभावे त्रिविधाहारस्य, नतु द्विविधस्य, निष्कारणे स्वाद्यस्याननुज्ञातत्वात् । श्राद्धस्तु संप्रदायात् कानिचित्प्रत्याख्यानानि द्विविधाहारस्यापीति ७ ॥ यदा तु त्रिविधाहारस्य प्रत्याख्यानं तदा पानकमाश्रित्य षडाकारा भवन्ति--

**पाणस्स लेवेण वा अलेवेण वा अच्छेण वा बहुलेण वा ससित्थेण वा असित्थेण वा वोसिरामि ८ ॥**

अत्र तृतीयायाः पंचम्यर्थत्वात् अत्र कृतलेपाद्वा- खर्जूरादिपानकात्, वाशब्दोऽलेपकृतपानकापेक्षयाऽवर्जनीयत्वाविशेषद्योतनार्थः, अलेपकृताद्वा सौवीरादेः, **अच्छाद्वा**-निर्मलादुष्णोदकादेः, बहलाद्वा-गडुलात्तिलतन्दुलधावनादेः, **ससिक्थाद्वा**-अवश्राव-

णादेः, असिक्थाद्वा- सिक्थवर्जितात् ।

**दिवसचरिमं भवचरिमं वा पच्चक्खामि चउविहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरामि ९ ॥**

दिवसस्य-अहोरात्रस्य चरमः- अवशिष्टोऽशः स तथा तं, एवं भवचरममपि । दिवसचरमं त्वल्पाकारत्वादेकासनादिष्वपि सार्थकं ९ ॥ अभिग्रहप्रत्याख्यानं यथा- 'अंगुट्ठमुट्ठिगं घरसेउउस्सासथिबुगजोइक्खे । इय संकेयं भणियं, धीरेहिं अणंतनाणीहिं ॥ १ ॥' तत्र **अंगुट्ठसहियं पच्चक्खामि चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरामि** इत्यादि सुगमानि—

**विगइओ पच्चक्खामि अन्नत्थणाभोगेणं सहसागारेणं लेवालेवेण गिहत्थसंसट्ठेणं उक्खित्तविवेगेणं पडुच्चमक्खिएणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरामि १० ॥**

मनसो विकारहेतुत्वाद्विकृतयः, ताश्च दश- 'दुद्धं दहि घय तिल्लं, गुडं तहोगाहिमं छ भक्खाओ । महु मज्ज मंस मक्खण, चत्तारि अभक्खविगईओ ॥ १ ॥ गोमहिष्यजोष्ट्र्यैडकानां क्षीराणि पंच, दधिनवनीतघृतानि चतुर्भेदानि, उष्ट्रीणां दध्याज्याभावात् , तिलातसीलट्टासर्षपभेदात् तैलानि चत्वारि, गुडो द्वेधा-पिण्डो द्रवश्च, अवगाहेन-स्नेहबाहल्येन निर्वृत्तमवगाहिमं-पक्वान्नं, यत्तापिकायां घृतादिपूर्णायां चलाचलखाद्यकादि पच्यते तेनैव स्नेहेन द्वितीयं तृतीयं च तद्विकृतिः, ततः परं योगवाहिनां निर्विकृतिकप्रत्याख्यानेऽपि आगाढकारणे कल्पते । एवं शेषाण्यपि विकृतिगतानि, तानि चामूनि- अह पेया १ दुद्धट्टी २, दुद्धवलेही य

३ दुद्धसाडी य ४। पंच य विगइगयाइं, दुद्धंमि क्खीरिसहियाइं ५ ॥ १ ॥ अंबिलजुयंमि दुद्धे, दुद्धदहीदक्खमीसरद्धंमि । पयसाडी तह तंदुलचुण्णयसिद्धंमि अवलेही ॥ २ ॥ दहिए विगइगयाइं, घोलवणं १ घोल २ सिहरिणि ३ करंबो ४ । लवणकणदहियमहियं ५, संगरिगाइंमि अप्पडिए ॥ ३ ॥ पक्कघयं १ घयकिट्टी २, पक्कोसहि उवरि तरिय सप्पि च ३ । निब्भंजण ४ वीसंदणगा ५ य घयविगयगयाइं ॥ ४ ॥ तिलमल्ली १ तिलकुट्टी २ वट्ट तिल्लं ३ तहोसहुव्वरियं ४ । लक्खाइदव्वपक्कं, तिल्लं ५ तिल्लंमि पंचेव ॥ ५ ॥ अद्धकढि इक्खुरसो १, गुलवाणीयं च २ सक्करा ३ खंडं ४ । पायगुलं ५ गुलविगईविगयगयाइं तु पंचेव ॥ ६ ॥ एगं एगस्सुवरिं १ तिण्होवरि बीयगं च जं पक्कं । तुप्पेणं तेणं चिय २ तइअं गुलहाणियापभिई ३ ॥ ७ ॥ चउत्थं जलेण सिद्धा, लप्पासिया ४ पंचमं तु पूअलिया । चुप्पडिअतावियाए, परिपक्का ५ तीस मिलिएसु ३० ॥ ८ ॥ सांप्रतमभक्ष्यविकृतयः, तत्र मधु त्रेधा- माक्षिकं कौन्तिकं भ्रामरं च, मद्यं द्वेधा- काष्ठपिष्टोद्भवभेदात् , मांसं त्रेधा-जलस्थलखेचरजन्तूद्भवभेदात् चर्मरुधिरमांसभेदाद्वा, म्रक्षणं चतुर्द्धा पूर्वोक्तमेव । एकादिविकृतिप्रत्याख्यानं निर्विकृतिकप्रत्याख्यानं च विकृतिप्रत्याख्यानेन संगृहीतं, अत्र 'गिहत्थसंसट्ठेणं'ति गृहस्थेन स्वप्रयोजनाय दुग्धेन संसृष्ट ओदनः, दुग्धं तु तमतिक्रम्योत्कर्षतश्चत्वार्यंगुलानि यावदुपरि वर्त्तते, ततस्तद् दुग्धमविकृतिः, पंचमांगुलारम्भे तु विकृतिरेव, एवमन्यान्यपि गृहस्थसंसृष्टानि यथा- खीरदहीवियडाणं, चत्तारि य अंगुलाइं संसट्ठं । फाणियतिल्लघयाणं, अंगुलमेगं तु संसट्ठं ॥ १ ॥ महुपुग्गलरसयाणं, अद्धंगुलयं तु होइ संसट्ठं । गुलपुग्गलनवणीए, अद्दामलगं तु संसट्ठं ॥२॥ इति । 'पडुच्चमक्खिएणं'ति प्रतीत्य सर्वथा रूक्षमण्डकादि म्रक्षितम्-ईषत्सौकुमार्योत्पादनाय स्नेहितं यत्तत्प्रतीत्यम्रक्षितं, तत्र यदांगुल्या ईषत् घृतादि गृहीत्वा म्रक्षितं तदा कल्पते, धारया तु नेति १० ॥ अत्र च सार्द्धपौरुषीअ-

पार्श्वासनकादीनि आकारसंख्यासूत्रेऽनुक्तान्यपि संप्रदायागतत्वात् युक्तियुक्तत्वाच्च पौरुषीपूर्वार्द्धैकासनवज्ज्ञेयानीति । द्वारम् ५ ।

अधुना शुद्धिः, सा च षोढा, यथा-'सा पुण सद्दहणा १ जाणणा य २ विणय ३ अणुभासणा चेव ४ । अणुपालणाविसोही, ५ भावविसोही भवे छट्ठा ॥ १ ॥ 'पच्चक्खाणं तु सव्वण्णुदेसियं जं जहिं जया काले । तं जो सद्दहइ नरो, तं जाणसु सद्दहणसुद्धं ॥ १ ॥ पच्चक्खाणं जाणइ, कप्पे जं जंमि होइ कायव्वं । मूलगुणउत्तरगुणे, तं जाणसु जाणणासुद्धं ॥ २ ॥ किइकम्मस्स विसोहिं, पउंजई जो अहीणमइरित्तं । मणवयणकायगुत्तो, तं जाणसु विणयओ सुद्धं ॥ ३ ॥ अणुभासइ गुरुवयणं, अक्खरपयवंजणेहिं परिसुद्धं । पंजलिउडो अभिमुहो, तं जाणणुभासणासुद्धं ॥ ४ ॥ कंतारे दुब्भिक्खे, आयंके वा महई समुप्पन्ने । जं पालियं न भग्गं, तं जाणसु पालणासुद्धं ॥ ५ ॥ रागेण व दोसेण व, परिणामेण व न दूसियं जं तु । तं खलु पच्चक्खाणं, भावविसुद्धं मुणेयव्वं ॥ ६ ॥ यद्वा- फासियं १ पालियं २ चेव, सोहियं ३ तीरियं तहा ४ । किट्टिय ५ माराहियं चेव ६ एरिसयंमि पयइअव्वं ॥ ७ ॥ उचिए काले विहिणा, पत्तं जं फासियं तयं भणियं । तह पालियं च असई, संमं उवओगपडियरियं ॥ ८ ॥ गुरुदत्तसेसभोयणसेवणाए अ सोहियं जाण । पुण्णेवि थोवकालावत्थाणा तीरियं होइ ॥ ९ ॥ भोयणकाले अमुगं, पच्चक्खायंति सरइ किट्टियंयं । आराहियं पयारेहिं, सम्ममेएहिं पडियरियं ॥ १० ॥' द्वारम् ६॥ सांप्रतं फलं, तच्च सामान्यतो यथा-पच्चक्खाणस्स फलं, इहपरलोए अ होइ दुविहं तु । इहलोइ धम्मिलाई, दामन्नगमाइ परलोए ॥ १ ॥ तत्र च धम्मिलदृष्टान्तः सविस्तरत्वाद्वसुदेवहिण्डितो ज्ञेयः, दामन्नकस्य त्वयम्—

अत्राभूद्भरतक्षेत्रे, पुरं गजपुराह्वयम् । तत्र चासीत्सुनन्दाख्यो, भद्रकः कुलपुत्रकः ॥ १ ॥ तस्याभूज्जिनदासाह्वो, वयस्यो[1]-
ऽद्वैतसौहृदः । यः सदा जिनधर्माब्ज[2]सेवने भृंगतां[3] ययौ ॥ २ ॥ नेत्राविव समाचारौ, निर्व्याज[4]प्रीतिसंयुतौ । अवियुक्तौ सदाऽन्येद्यु-
रुद्याने तौ समेयतुः ॥ ३ ॥ निरीक्ष्य कंचनाचार्यं, कैरव[5]निशाकरम् । सुनन्दस्तत्र सानन्दः, समित्रोऽगात्तदन्तिके ॥ ४ ॥ लला-
टस्पृष्टभूपृष्ठस्तमानम्य ससंमदः । पश्यन्नास्यं गुरूणां सोऽध्यास्त मित्रस्य मार्गतः[6] ॥ ५ ॥ अथाचख्यौ गुरुर्मांसममेध्यं[7] यो हि
खादति । स्वमांसमास्यते श्वभ्रगतोऽसौ श्वभ्रपालकैः[8] ॥ ६ ॥ श्रुत्वेति जातसंवेगो, जग्राहाभिग्रहं ततः । स मांसभक्षणस्यांगिरक्षणै-
कविचक्षणः ॥ ७ ॥ दुःखद्विषः सुखाकांक्षानात्मौपम्येन देहिनः । स जानन्न व्यधाद्धिंसां, जातुचिन्मांसकाम्यया ॥ ८ ॥ तदा-
भितोऽप्यविरलै[9]रलरोलानिलैर्जगत् । कम्पयन्नथ दुष्कालः, कल्प[10]कालोपमोऽभवत् ॥ ९ ॥ तस्मिन् महति दुष्काले, षष्ठारक इवा-
जनि । जनः सर्वोऽपि हि प्रायो, मांसभक्षणतत्परः ॥ १० ॥ अथोचेऽसौ स्वगेहिन्या, त्रातुं निजकुटुम्बकम् । पंगुवत्किं निषण्णो-
ऽसि ?, मीनानानयसे न हि ॥ ११ ॥ सुमुखः सम्मुखं तस्या, बभाषेऽसौ मिताक्षरम् । भद्रे ! भद्रौघ[11]घातिन्या, कृतं मे हिंसया-
ऽनया ॥ १२ ॥ सोऽवोचद्वंचितोऽसि त्वमरे किं मुण्डिकैः क्वचित् ? । यत्पश्यन्नपि दीनास्यं, त्रायसे न कुटुम्बकम् ? ॥ १३ ॥
भक्ष्यं विना कुटुम्बेऽस्मिन्, मृते वंठ[12] इवैककः । कथं दर्शयितासि त्वं, मुखं लोकस्य दुर्मुखः ? ॥ १४ ॥ ततो निर्भर्त्स्य तत्स्यालै-
र्बलादपि दयाहृदः । हृदेऽनीयत मत्स्यानां, ग्रहणार्थं कृताग्रहैः ॥ १५ ॥ तत्रास्ताघजले जालं, सोऽक्षैप्सीत् क्षितिकाकृतिः[13] । अपत-

१ मित्रं २ कमलं ३ भ्रमरः ४ निर्मायं ५ कुमुदं ६ पृष्ठतः ७ अपवित्रं ८ परमाधार्मिकैः ९ सततशुष्कवातैः १० युगान्तः ११ कल्याणश्रेणेः १२ विटः १३ दीनवदनः

तत्र मत्स्यौघः, सिन्धौ नद्यौघवत्स्वयम् ॥ १६ ॥ समाकर्षंस्तमानायं, वीक्ष्य दुःखाकुलान् झषान् । तं तत्रैवामुचत्क्षिप्रं, कम्पमानोऽनुकम्पया ॥ १७ ॥ एवं दिनद्वयीमन्यां, मीनानां मनसो विना । स श्यालकानुवृत्त्यैव, चक्रे ग्रहणमोक्षणे ॥ १८ ॥ तृतीयेऽह्नि तु वीक्ष्यैकां, झषस्यैकस्य पक्षिकाम् । भग्नामस्तोकशोकार्त्तः, स्वौकस्यागात्सुनन्दकः ॥ १९ ॥ जगाद स्वजनान् सर्वान्, रोचते तत् प्रजल्पत । अहं न जातुचित्कुर्वे, हिंसां श्वभ्रनिबंधनाम् ॥२०॥ इत्युदित्वा सुनन्दोऽथानशनं विदधे सुधीः । सम्यक्समाहितस्वान्तः, स्वायुष्कं पर्यपूरयत् ॥२१॥ इतश्च मगधाभिख्ये, देशे धर्मैकधामनि । श्रियः क्रीडागृहं राजगृहं नामास्ति पत्तनम् ॥ २२ ॥ नरेशो नरवर्माख्यस्तत्राभूदिव मांत्रिकः । प्रतापमन्त्रतो वश्या, जयश्रीर्यस्य सर्वदा ॥ २३ ॥ तत्रासीन्मणिकाराख्यः, श्रेष्ठी श्रेष्ठिशिरोमणिः । अनेकमणिकोटीशो, मण्याकर इवापरः ॥ २४ ॥ तस्य कुन्दोज्ज्वलयशाः, सुयशा नाम पत्न्यभूत् । तस्याः कुक्षौ सुनन्दस्य, जीवः समुदपद्यत ॥ २५ ॥ दिनेषु परिपूर्णेषु, साऽसूत सुतमुत्तमम् । जनताजनितानन्दं, राकारात्रिरिवोडुपम् ॥२६॥ तस्योग्रभागधेयस्य, नामधेयं पिता व्यधात् । दामन्नक इतिख्यातं, कृत्वा जन्ममहोत्सवम् ॥ २७ ॥ पाल्यमानः स यत्नेन, सार्द्धं पित्रोर्मनोरथैः । क्रमादासादयन् वृद्धिं, समजन्यष्टहायनः ॥ २८ ॥ इतश्च तत्पितुर्गेहेऽभवत् मारिर्भयङ्करी । ज्ञात्वैतत्तद्गृहद्वारे, राजा वृत्तिमकारयत् ॥ २९ ॥ तया वर्द्धितया मार्या, तत्कुलं क्षयमासदत् । प्राग्जन्मकृतकारुण्यपुण्यं दामन्नकं विना ॥ ३० ॥ ततोऽसौ श्वकृतद्वाराान्निरियायं स्वमन्दिरात् । प्राप्यान्तरं गुप्तिगेहादिव गुप्तिगतो नरः ॥ ३१ ॥ क्षुधार्त्तः स परिभ्राम्यन्, मुग्धबुद्धिर्गृहे गृहे । आगात्सागरपोताख्यमहेभ्यस्य गृहाङ्गणे ॥ ३२ ॥ तदा तत्रागमत्साधुयुगलं विमलाशयम् । तयोर्ज्येष्ठस्तु सामुद्रलक्ष-

१ जालं २ मत्स्यान् ३ गृहे ४ चित्तं ५ जनसमूहः ६ पूर्णिमा ७ चन्द्रं ८ वर्षम् ९ भषकः १० निर्ययौ ११ चारकं.

पेषु विचक्षणः ॥ ३३ ॥ सोऽपि दामन्नकं वीक्ष्य, द्वितीयं मुनिमूचिवान् । खल्वसौ वर्द्धमानोऽस्य, गेहस्य भविता विभुः ॥ ३४ ॥ कुड्यान्तरस्थितस्तत्तु, सर्वमाकर्ण्य सागरः । वज्राहत इवोत्पन्नविषाद इति दध्यकौ ॥३५॥ पोएण सागरं गाहिऊण गहिऊण जेण रयणाइं । नूणं तिमिकुलसंकुलसेसो सो सागरो विहिओ ॥३६॥ अये! यो विभवोऽनेकैर्महाकष्टैर्मयाऽर्जितः । विभुस्तस्य समस्तस्य, ही रङ्कोऽयं भविष्यति ॥ ३७ ॥ तदेनं शिशुमद्यैव, केनचिन्मारयाम्यहम् । नष्टे बीजे कुतो भावी, प्रादुर्भावोऽङ्कुरस्य हि ? ॥ ३८ ॥ ध्यात्वेति सागरश्रेष्ठी, बालधीर्बालकं तकम् । प्रलोभ्य मोदकैर्मुग्धं, निन्ये श्वपचपाटके ॥ ३९ ॥ तत्रैकः खङ्गिलाभिख्यो, मातङ्गोऽर्थवशीकृतः । तद्वधाय समादिष्टोऽभिज्ञानं च स याचितः ॥ ४० ॥ ततः सोऽपसरद्वेलसागर इव सागरः । स्वस्थानमगमत्तूर्णं, पूर्णप्रायमनोरथः ॥ ४१ ॥ अथ तं बालकं वीक्ष्य, मृगार्भमिव[1] मुग्धकम् । अध्यासीत्सौतिकोऽप्येवं, संजातकरुणो हृदि ॥ ४२ ॥ श्रेष्ठिनः शिशुनाऽनेन, दुष्कृतं हन्त किं कृतम् ? । यदेतस्य निपातार्थं, पाप्येष यततेतराम् ॥ ४३ ॥ यद्वा मत्तोऽपि कः पापी, परस्वलवलोलुपः ? । ईदृक् कर्माणि यः कर्तुमुद्यतोऽस्मि हहाऽल्पधीः ॥ ४४ ॥ तस्मादस्य वधेनेवाऽनेन स्वेनापि मे कृतम् । यदिवा जीवतादेष, गृहीष्यामि धनं पुनः ॥ ४५ ॥ मत्वेति कर्त्तिकां कृष्ट्वा, विद्युल्लेखासखीं क्षणात् । तत्कनिष्ठाङ्गुलीं छित्त्वा, प्रत्यूचे तमिदं वचः ॥ ४६ ॥ अरे द्रुतमितो नश्य, यदि जीवितुमिच्छसि । अन्यथा त्वां हनिष्यामि, नूनं कर्त्तिकयाऽनया ॥४७॥ तच्छ्रुत्वा कम्पमानाङ्गो, वातोद्धूत इवाङ्घ्रिपः । ततोऽनश्यत् झगित्येव, मृगारातेरिवैणकः[2][3][4] ॥ ४८ ॥ स गच्छन् भोगिनो[5] बिभ्यद्दर्भूरिव[6] सत्वरम् । प्राप सागरपोतस्य, गोकुलं गोकुलाकुलम् ॥ ४९ ॥ नन्दाभिधो विभुस्तत्र, भद्राकारं निरीक्ष्य तम् । प्रत्यप-

१ मृगशिशुं २ मातंगः ३ सिंहात् ४ मृगः ५ सर्पात् ६ दर्दुरः

द्यत पुत्रत्वेनापुत्रः परितोषभाक् ॥ ५० ॥ तद्गृहेऽथ निराबाधं, वर्धमानः क्रमेण सः । द्वैतीयीकं वयः प्रापाद्वैतसौन्दर्यसंयुतः ॥ ५१ ॥ स मातङ्गोऽप्यभिज्ञानहेतोश्छिन्नां तदङ्गुलीम् । सागरायार्पयत्तां तु, दृष्ट्वाऽसौ मुमुदेतमाम् ॥ ५२ ॥ अन्यदा सागरः श्रेष्ठी, गोष्ठं[1] याति स्म तत्र च । दामन्नकं निरैक्षिष्ट, च्छिन्नाङ्गुल्या सुलक्षितम् ॥ ५३ ॥ तं दृष्ट्वा सोऽपि साशङ्कं, नन्दं पप्रच्छ तत्कथाम् । सोऽपि तस्मै यथाज्ञातं, तद्वृत्तान्तमचीकथत् ॥५४॥ तच्छ्रुत्वा सागरो दध्यावभूतसत्यं मुनेर्वचः । यथा ह्यविभवस्यायमधुनैवाधि[2]भूरभूत् ॥ ५५ ॥ परं कार्यो न निर्वेदः, कार्यो नित्यमुपक्रमः[3] । अनिर्वेदः श्रियो मूलं, यस्मात्सर्वत्र गीयते ॥ ५६ ॥ एवं विमृश्य स श्रेष्ठी, चचाल स्वपुरं प्रति । स्वामिन् ! किमुत्सुकोऽसीत्यपृच्छत्तं गोकुलेश्वरः ॥ ५७ ॥ श्रेष्ठ्यूचे तत्र मे कार्यं, महत्संप्रति संस्मृतम् । नन्दो जगाद तत्रार्थे, मत्सुतोऽयं गमिष्यति ॥ ५८ ॥ तच्छ्रुत्वा सागरस्तूर्णं[4], लिखित्वा लेखमात्मना । तस्यार्पयत् स तं लात्वा, द्रुतं राजगृहं ययौ ॥ ५९ ॥ तत्पुरोद्यानमध्यस्थे, स्मर[5]देवकुलेऽथ सः । विशश्राम स निश्रान्तो[6], रूपेणान्य इव स्मरः ॥६०॥ सुष्ठुवेषा विषाभिख्या, श्रेष्ठिसागरपुत्रिका । वरार्थिन्यागमत्तत्र, रतिनाथमथार्चितुम् ॥ ६१ ॥ दामन्नकेऽथ निद्राणे, मुद्रितं तातमुद्रया । लेखमालोक्य सा सद्यो, लघुहस्ता तमाददे ॥ ६२ ॥ विमुद्र्य च विमुद्राब्[7]जनेत्रा तल्लिखितं पितुः । इत्यवाचयत स्पष्टवर्णैः सा वरवर्णिनी[8] ॥ ६३ ॥ स्वस्तिश्रीगोकुलात्कल्यं[9], श्रेष्ठी सागरपोतकः । पुत्रं समुद्रदत्तं सस्नेहमादिशते यथा ॥६४॥ पुंसोऽस्याधौतपादस्य, विषं वत्स ! प्रदीयताम् । नात्रार्थे कोऽपि संदेहो, विधेयो धीनिधे ! त्वया ॥ ६५ ॥ वाचयित्वेति निष्ठ्यू[10]तादथाञ्जनशलाकया । विलोक्य बिन्दुमाकारं, विषंशब्दे विषां व्यधात् ॥६६॥ मुद्रयित्वा ततोऽगच्छत्सा स्वगेहे ससंमदा[11] । प्रबुद्धः

१ गोकुलं २ स्वामी ३ उद्यमः ४ शीघ्रं ५ कामदेवः ६ परिश्रान्तः ७ विकस्वरकमलवत् ८ कुमारी ९ नीरोगः १० लालायाः ११ सहर्षा

सोऽपि गत्वाऽऽशु, सागरं लेखमार्प्पयत् ॥६७॥ बुद्ध्वा लेखार्थमाश्वेव, विवाहोत्सवहेतवे । सागरिर्गिरिमाम्भोधि[1]मौहूर्त्तान[2]भ्यजूहवत् ॥ ६८ ॥ तेऽवोचन्नद्य सन्ध्यायां, यादृशं लग्नमस्ति हि । तादृक्षमैषमो[3] वर्षे, सकलेऽपि न विद्यते ॥ ६९ ॥ हृष्टः समुद्रदत्तोऽथ, विवाहं विदधे तयोः । कुलांगनाजनैर्गीयमानैर्धवलमंगलैः ॥ ७० ॥ इतश्च वलितो गोष्ठात्, सागरो जनवार्त्तया । तमुद्वाहोत्सवं श्रुत्वा, दध्याविति विषण्णधीः ॥ ७१ ॥ ही व्यचिन्त्यन्यथाऽस्माभिर्विधिना त्वन्यथा कृतम् । त्यक्त्वा लभ्यं यथा द्रव्यं, दातव्यं प्रत्युताभवत् ॥ ७२ ॥ यद् गृहस्य गृहिण्येवेश्वरी तस्याः स वल्लभः । जामाता मद्गृहस्यातो, जज्ञेऽयं रंकको विभुः ॥ ७३ ॥ तथापि खंगिलेनामुं, मारयाम्यधुना ध्रुवम् । दुःखिता दुहिता त्वेवं, भविष्यति भवत्वपि ॥ ७४ ॥ एवं विमृश्य दुष्टात्मा, ययौ खंगिलवेश्मनि । स किं न मारितो रे रे, वंचकेति ततर्ज तम् ॥ ७५ ॥ प्रत्यूचे खांगिलः श्रेष्ठिन्निदानीमपि दर्शय । करोमि येन तं हत्वा, सफलांस्त्वन्मनोरथान् ॥ ७६ ॥ दत्त्वाथ तस्य तद्घातसंकेतं मातृकागृहे । आजगाम ततः श्रेष्ठी, दुष्टबुद्धिः स्ववेश्मनि ॥ ७७ ॥ स तत्रैकालवाल[4]स्थौ, लताद्रू इव संगतौ । तौ वधूवरकौ वीक्ष्य, साक्षेपमिदमब्रवीत् ॥ ७८ ॥ रे युवाभ्यां किमद्यापि, पूज्यन्ते मातृका न ताः । यत्प्रसादादयं जज्ञे, संगमो भवतोर्ननु ? ॥ ७९ ॥ इत्युक्ते तेन पुष्पाद्यैर्भृत्वा पटलिकां द्रुतम् । प्रचेलतुस्तदर्चार्थं, सूर्यास्तसमयेऽथ तौ ॥ ८० ॥ वीक्ष्य सागरिरट्टस्थस्तौ यान्तौ मातृकालये । एवं दध्यावये कोऽयं, पूजायाः समयो ननु ? ॥ ८१ ॥ यदेतौ नूतनोद्वाहावस्तं जिगमिषू रविः । बहुदोषः प्रदोषश्च, तथासन्नतमं तमः ॥ ८२ ॥ एवं विमृश्य तौ तत्र, संस्थाप्य स्वयमीयिवान् । पूजापटलिकां लात्वा, ततो भट्टारिकागृहे ॥ ८३ ॥ तदन्तः प्रविशन्नेव, जघ्ने कर्त्तिकया हृदि ।

१ गरिष्ठतासमुद्रः २ ज्योतिषिकान् ३ अस्मिन् ४ केदारः

खंगिलेन स दुर्गायै, बलिं कर्तुमिवाग्रतः ॥ ८४ ॥ मृतमात्मजमाकर्ण्य, वक्षःस्फोटेन सागरः। पंचत्वमासदत् पुत्रवियोगो हि सुदुस्सहः ॥ ८५ ॥ ततो राजाज्ञया श्रेष्ठिपुंगवैस्तुष्टमानसैः। दामन्नकः प्रभुश्चक्रे, श्रेष्ठिसागरवेश्मनः ॥ ८६ ॥ स सुधीर्वर्त्तमानोऽपि, यौवनेऽतीव पावने। व्यधात्कामेषु नासक्तिं, बाधते नार्थधर्मयोः ॥८७॥ स चक्रे न खलैः संगं, दातृभिः कलहं सताम्। सत्संगाम्भोजसेवायां, ययौ तु कलहंसताम्[1] ॥ ८८ ॥ एवं तस्य विशिष्टाध्वाध्वनीनस्य महात्मनः। पुरोऽन्यदाऽपठत्कोऽपि, भट्टो गाथामिमां यथा ॥ ८९ ॥ 'अणुपुंखमावहंतावि आवया तस्स संपया हुंति। सुहदुक्खकच्छपुडओ, जस्स कयंतो वहइ पक्खं ॥ ९० ॥' तच्छ्रुत्वा तस्य भट्टस्य, दीनाराणां ददौ मुदा। लक्षत्रयीं यथावृत्तवृत्तशंसनरंजितः[2] ॥ ९१ ॥ अनेनान्यधनान्धेन, कियद्दत्तमितीर्ष्यया। ज्वलन्तो नागरा राज्ञे, तं वृत्तान्तं व्यजिज्ञपन् ॥ ९२ ॥ नरवर्मनृपेणाथ, समाहूय स्वपुरुषैः। त्रिलक्षीदानवृत्तान्तं, पप्रच्छे मणिकारसूः ॥९३॥ मूलतोऽपि स्ववृत्तान्तं, यथावृत्तमचीकथत्। दामन्नको नृपस्याग्रे, प्रौढपुण्यप्रगल्भवाक् ॥९४॥ नृपेणाथ मुदोत्फुल्लमुखेन सकले पुरे। स एव विदधे मुख्यो, मार्गाभिज्ञोऽध्वगेष्विव ॥ ९५ ॥ एवं पूर्वभवोपात्तपुण्यप्राग्भारयोगतः। पितेव सर्वलोकानां, संमतः समजायत ॥ ९६ ॥ संप्राप्य सुगुरोर्वक्त्राज्जैनं धर्मं प्रपाल्य च। आसाद्य च क्रमान्मृत्युं, बभूव प्रवरः सुरः ॥ ९७ ॥ भूयो मर्त्यभवं प्राप्य, जैनीं दीक्षां प्रपद्य च। निष्ठापिताष्टकर्मा च, क्रमान्मोक्षं स यास्यति ॥ ९८ ॥ इति दामन्नकचरितं भो भव्यजना ! निशम्य निजशक्त्या। कुरुत प्रत्याख्यानं, गतप्रमादा यदायत्तम् ॥ ९९ ॥ ( आर्या ) इति सामान्यफलं, विशेषस्तु यथा- 'पच्चक्खाणंमि कए, आसवदाराइं हुंति पिहियाइं। आसववुच्छेएण य, तण्हावुच्छेयणं होइ ॥ १ ॥ तण्हावुच्छे-

१ हंसतां २ यथाजातवृत्तान्तकथनेन

एण य, अउलोवसमो भवे मणुस्साणं । अउलोवसमेण पुणो, पच्चक्खाणं हवइ सुद्धं ॥ २ ॥ तत्तो चरित्तधम्मो, कम्मविवेगो अपुव्वकरणं तु । तत्तो केवलनाणं, तत्तो मुक्खो सयासुक्खो ॥ ३ ॥ एवं वन्दनकविधिः ॥

साम्प्रतं प्रतिक्रमणविधिः कथ्यते—तत्र दैवसिकादिप्रतिक्रमणविधिरमूभ्यो गाथाभ्योऽवसेयः, तत्रेदं दैवसिकम्-जिणमुणिवंदणअइआरुस्सग्गो पुत्ति वंदणालोए । सुत्तं वंदण खामण, वंदण तिन्नेव उस्सग्गा ॥१॥ चरणे दंसण नाणे, उज्जोया दुन्नि इक्क इक्को अ । सुअदेवयादुसग्गा, पुत्ती वंदण तिथुइ थुत्तं ॥२॥ अथ रात्रिकम्—इरिया कुसुमिणुसग्गो, जिणमुणिवंदण तहेव सज्झाओ । सव्वस्सवि सक्कथओ, तिण्णि उ उस्सग्ग कायव्वा ॥१॥ चरणे दंसण नाणे, दुसु लोगुज्जोय तइअ अइयारा । पुत्ती वंदण आलोय, सुत्त तह वंद खामणयं ॥२॥ वंदण तह उस्सग्गो, पुत्ती वंदणय पच्चक्खाणं तु । अणुसट्ठी तिन्नि थुई, वंदण बहुवेल पडिलेहा ॥ ३ ॥ इति, तथा पाक्षिकादीनि—मुहपत्ती वंद खामणय, संबुद्धाखामणं तहाऽऽलोए । वंदण पत्तेयक्खामणाणि वंदणय सुत्तं च ॥१॥ सुत्तं अब्भुट्ठाणं, उस्सग्गो पुत्ति वंदणं तह य । पज्जंते खामणया, तह चउरो छोभवंदणया ॥ २ ॥ एस विही पक्खियपडिक्कमणे । पक्खिय तिन्नि सयाइं, उस्सासा पण सया उ चउमासे । अट्ठसहस्सं चरिमे, सिज्जसुरीए तहुस्सग्गो ॥ १ ॥ प्रतिक्रमणं च कृतसामायिकेनैव कर्त्तव्यं, अतः तत्सूत्रं व्याख्यायते, तदिदम्—

**करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि जाव नियमं पज्जुवासामि दुविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि, तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ॥**

करोमि-विदधामि, भद्र ! सुखकल्याणहेतुत्वात्, भयान्त ! सप्तविधभयस्यान्तकृत्त्वात्, भवान्त भवान्तकरत्वात्, [ तथा

चतुर्गतिरूपसंसारोच्छेदकत्वात्] । इदं चामन्त्रणं गुर्वनुज्ञातं सर्वमेव कार्यमिति दर्शनपरं, **समानां-ज्ञानादीनामायो-लाभः** समायस्तत्र भवं सामायिकम्, एतच्च देशसर्वसावद्ययोगप्रत्याख्यानभेदात् द्विधा, तत्र श्रावकस्य सामान्येन सर्वत्राप्यनुमतिसंभवात् सर्वशब्दवर्जं, सहावद्येन- पापेन यः स **सावद्यो योगो**-व्यापारस्तं, **प्रत्याचक्षे**-निषेधामि, यावज्जीवाल्पकालभेदान्निषेधोऽपि द्विधा इतिकृत्वाऽऽह-**यावन्नियमं पर्युपासयामि** यावन्तं कालं व्रते तिष्ठामि, व्रतावस्थानकालश्च जघन्येनापि अन्तर्मुहूर्त्तकालमात्रः, प्रत्याख्यानस्य त्रिविधत्रिविधेनेत्यादिनवभङ्गीसंभवात् अत्राधिकृतचतुर्थभंगमाश्रित्याह-**द्विविधं त्रिविधेनेति**, अयमपि भंगकस्त्रिभेदतोऽतो नियमनायाह—**मनसा वाचा कायेन**, प्रत्युत्पन्नसावद्ययोगविरतिरूपेण **न करोमि** स्वयं **न कारयामि** चान्यैः, व्यत्ययनिर्देशस्तु योगस्य करणाधीनताज्ञापनार्थः । अत्र च करोमि भदन्त ! सामायिकमित्यनेन प्रत्युत्पन्नसावद्ययोगविरतिरुक्ता, सावद्यं योगं प्रत्याख्यामीत्यनेन त्वनागतस्येति, अतीतप्रतिक्रमणार्थमाह—**तस्यापि**, अपिशब्दलोपाद्, अत्र षष्ठी द्वितीयार्थे प्राकृतत्वात्, अतीतं सावद्यं योगं भदन्त ! **प्रतिक्रमामि**-मनसा मिथ्यादुष्कृतकरणेन निवर्त्तयामि, **निन्दामि** स्वसाक्षिकं, **गर्हे** गुरुसाक्षिकं, पुनर्भदन्तग्रहणं सर्वमपि कार्यं कृत्वा तस्मै निवेदनीयमितिज्ञापनार्थं, तथाऽऽ**त्मानम**तीतसावद्ययोगकारिणं तदनुमतित्यागेन **व्युत्सृजामि** त्यजामीति ॥ कृतसामायिकेन च प्रतिक्रमणमनुष्ठेयं, तस्य च सर्वातिचारविशोधकत्वेन विशिष्टश्रेयोभूतत्वान्मङ्गलाद्यभिधानार्थं प्रथमगाथामाह—

**वंदित्तु सव्वसिद्धे, धम्मायरिए अ सव्वसाहू अ । इच्छामि पडिक्कमिउं, सावगधम्माइआरस्स ॥ १ ॥**

**वंदित्वा**-नत्वा, सर्वं वस्तु विदंति सर्वेभ्यो हिता । वेति **सार्वाः**-तीर्थकृतः, सिध्यन्ति स्म-सर्वकर्मक्षयान्निष्ठितार्था भवन्ति

स्मेति सिद्धाः, सार्वाश्च सिद्धाश्च २ तान्, तथा धर्माचार्यान् श्रुतचारित्रधर्माचारसाधून् वा, चशब्दादुपाध्यायान् श्रुताध्यापकान्, तथा सर्वसाधूंश्च-स्थविरकल्पिकादिभेदभिन्नान् मोक्षसाधकान्मुनीन्, चः समुच्चये, एवं च विघ्नव्रातोपशान्तये कृतपंचनमस्कार इदमाह—इच्छामि अभिलषामि, प्रतिक्रमितुं-निवर्त्तितुं, कस्मादित्याह-श्रावकधर्मातिचारात्, जातावेकवचनं, पंचम्यर्थे षष्ठी, ततो ज्ञानाद्याचारपञ्चकस्य चतुर्विंशशतसंख्यातिचारेभ्यः प्रतिक्रमितुमिच्छामीतिगाथार्थः ॥१॥ सामान्येन सर्वव्रतातिचारप्रतिक्रमणार्थमाह—

जो मे वयाइयारो, नाणे तह दंसणे चरित्ते अ। सुहुमो अ बायरो वा, तं निंदे तं च गरिहामि ॥ २ ॥

य इति सामान्येन, मे· मम, सर्वव्रतातिचारः- अणुव्रतादिमालिन्यरूपः पञ्चसप्ततिसंख्यः, संजात इति शेषः, तथा ज्ञाने-ज्ञानाचारे कालविनयाद्यष्टप्रकारे वितथाचरणरूपः,तथा दर्शने-सम्यक्त्वे शंकादीनां पञ्चानामासेवनाद्वारेण निःशंकिताद्यष्टविधे वा दर्शनाचारेऽनासेवनाद्वारेण, तथा चारित्रे- समितिगुप्तिलक्षणेऽननुयोगरूपः, चशब्दात्तपोवीर्याचारयोः संलेखनायां च, तत्र बाह्याभ्यन्तरभेदात्तपो द्वादशधा, यथा—अनशन १ मूनोदर्यं २, वृत्तेः संक्षेपणं ३ रसत्यागः ४। कायक्लेशः ५ संलीनतेति ६ बाह्यं तपः षोढा ॥ १ ॥ प्रायश्चित्तं १ ध्यानं २ वैयावृत्य ३ विनया ४ वथोत्सर्गः। स्वाध्याय ६ इति तपः षट्प्रकारमाभ्यन्तरं भवति ॥२॥ वीर्यं मनोवाक्कायैस्त्रिधा, अतिचारता चानयोर्द्धर्मे स्वशक्तिगोपनात्, संलेखनायास्तु पञ्चातिचारा अग्रे वक्ष्यन्ते। एवं चतुर्विंशत्यधिकशतसङ्ख्यातिचारमध्ये यः सूक्ष्मो वा-अनुपलक्ष्यो बादरो वा-व्यक्तः, तं निन्दामि, मनसा पश्चात्तापेन, तं गर्हे गुरुसाक्षिकमिति ॥ २ ॥ प्रायोऽन्यव्रतातिचारा अपि परिग्रहात्प्रादुर्भवन्ति अतः सामान्येन तत्प्रतिक्रमणायाह—

दुविहे परिग्गहंमी, सावज्जे बहुविहे अ आरंभे । कारावणे अ करणे, पडिक्कमे देसिअं सव्वं ॥ ३ ॥

द्विविधे परिग्रहे सचित्ताचित्तरूपे, सावद्ये-सपापे, बहुविधे अनेकप्रकारे, आरम्भे च-प्राणातिपातादिरूपे, कारणे-अन्यैर्विधापने करणे-स्वयं निवर्त्तने, चशब्दात् क्वचिदनुमतावपि, यो ममातिचारस्तामित्यनुवर्त्तते, तं निरवशेषं, देसियंति-आर्षत्वाद्दैवसिकं, एवं रात्रिकपाक्षिकाद्यपि स्वस्वप्रतिक्रमणे, अशुभभावात्प्रातिकूल्येन क्रमामि प्रतिक्रमामि-निवर्त्तेऽहमित्यर्थः, उक्तं च—"स्वस्थानाद्यत्परस्थानं, प्रमादस्य वशाद्गतः । तत्रैव क्रमणं भूयः, प्रतिक्रमणमुच्यते ॥१॥" इति । अत्र च महापरिग्रहारम्भनिवृत्तयोर्गुणदोषाविर्भावकं श्रेष्ठिद्वयज्ञातामिदम्—

नासिक्ये नगरेऽभूतां, वणिजौ नन्दनामकौ । वणिक्कलासु निष्णातौ, विख्यातौ सकले पुरे ॥ १ ॥ गृहिधर्मे रतोऽत्यर्थं, व्यवहारविशुद्धिभूः । तत्रैकः स्वगुणैर्लोके, धर्मनन्द इति स्मृतः ॥ २ ॥ लोभाभिभूतचित्तत्वात्कूटवाणिज्यतोऽपरः । लोभनन्द इति ख्यातो, जनो हि बलवान् खलु ॥ ३ ॥ एकदा तत्पुराधीशोऽमात्येनाखानयत्सरः । खन्यमानेऽन्यदा तस्मिन् , भूयांसो निर्ययुः कुशाः ॥ ४ ॥ आयसांस्तांश्च मन्वानः, खनकानां च मन्त्र्यदात् । कुशौ द्वौ तैश्च नीत्वाऽट्टे, धर्मनन्दस्य दर्शितौ ॥ ५ ॥ भणितं चानयोर्मूल्यात्तिलान्नादि प्रयच्छ नः । अतिभारादिना श्रेष्ठी, सौवर्णौ तावलक्षयत् ॥ ६ ॥ उवाचाभ्यां न मे कार्यं, ततस्तैस्तौ प्रदर्शितौ । लोभनन्दस्य तेनापि, जज्ञाते तौ यथास्थितौ ॥ ७ ॥ क्षिप्त्वा तौ क्षिप्रमट्टान्तस्तेभ्यस्तैलाद्यदाद्बहु । श्रेष्ठी पृष्ट्वा कुशोत्पत्तिं, तान् मर्त्यानित्युवाच च ॥ ८ ॥ ममास्त्ययःकुशैः कार्यमतोऽत्रैव च नित्यशः । युष्माभिस्ताः समानेयास्ततस्ते तत्प्रपेदिरे ॥ ९ ॥ आनयन्ति कुशद्वन्द्वमन्वहं तेऽपि तत्र सः । श्रेष्ठी झगित्यसंतुष्टस्तुच्छमूल्यात्तदग्रहीत् ॥ १० ॥ अतीव मूर्छया सोऽथ,

पुत्राणां पृच्छतामपि । कुशव्यतिकरं तं न, समाचख्याववविश्वसन् ॥ ११ ॥ विवाहे सोऽन्यदाऽऽसन्नग्रामे मित्रनिमन्त्रितः । शिक्षां दत्त्वा कुशादाने, पुत्राणां कथमप्यगात् ॥ १२ ॥ खनकैस्तैरथानीतौ, दृष्ट्वा श्रेष्ठिसुतैः कुशौ । तैस्तौ हस्ते गृहीत्वोर्व्यामास्फाल्य स्फोटितौ क्रुधा ॥ १३ ॥ प्रेक्ष्य स्वर्णमयावेतौ, जनो भूयानमीमिलत् । श्रेष्ठ्यप्यथागतस्तत्र, तं वृत्तान्तमवेत्य सः ॥ १४ ॥ विषद्य ताड्यमानः स्वौ, पादावाहत्य सानुना । अभाङ्क्षीन्मंक्षु तौ ध्यायन्, धिगेतौ ग्रामग्रामिणौ ॥ १५ । सर्वमेतदथो राजनरै राज्ञे निवेदितम् । राज्ञाप्याकार्य तत्पृष्टाः, खनका मूलतोऽभ्यधुः ॥ १६ ॥ धर्मनन्दं ततो राजा, वेत्रिणानाययन्मुदा । लोभनन्दं पुनर्बद्ध्वारक्षकैश्चौरवत्क्रुधा ॥ १७ ॥ कृतानतिमथाप्राक्षीद्धर्मनन्दं नराधिपः । कुशाः किं न त्वयोपात्ताः, कथिताश्च न काञ्चनाः ? ॥ १८ ॥ सोऽवोचत व्यथां भूरि, व्रतभङ्गभयादिति । तत्रालीकवचोवर्जी, कथं स्वर्णमयौ ब्रुवे ? ॥ १९ ॥ स्तेयत्यागी च गृह्णामि, तदयोमूल्यतः कथम् ? । स्वव्रतादतिरिक्तं तु, परिगृह्णामि तत्कथम् ? ॥ २० ॥ अनर्थदण्डभीरुश्च, कथयामि कथं हि तत् ? । ततः पृथ्वीपतिः प्रोचे, तद्गुणग्रामरञ्जितः ॥ २१ ॥ श्रेष्ठिन्नहो विवेकोऽयमहो निर्लोभता तव । अहो सावद्यभीरुत्वमहो पैशून्यवर्जनम् ॥ २२ ॥ इति प्रशस्य सत्कृत्य, वस्त्रालङ्करणादिभिः । स्वस्थानं व्यसृजद्राजा, धर्मनन्दं महामनाः ॥ २३ ॥ लोभनन्दमिति प्रोचे, किं रे ! त्वं पश्यतोहरः ? । यदेवं मुषिता मुग्धा, वराका खनकास्त्वया ॥ २४ ॥ इत्युक्त्वा तस्य कृत्वा च, सर्वस्वहरणादिकाम् । विडम्बनां महीनाथः, कथञ्चित्तं व्यमुञ्चत ॥ २५ ॥ धर्मनन्दो महारम्भपरिग्रहविवर्जकः । प्रेत्यात्रापि भवे जज्ञे, भाजनं कीर्त्तिधर्मयोः ॥ २६ ॥ लोभनन्दो महारम्भपरिग्रहपरः पुनः । इहामुत्रापि दुःखौघभाजनं समजायत ॥ २७ ॥ उच्चैर्महारम्भपरिग्रहस्य, विपाकमेवं विरसं निशम्य । संसारभूमीरुहबीजभूते, तदत्र भव्या ! दधतां निवृत्तिम् ॥ २८ ॥ ( उपेन्द्रवज्रावृत्तम् ) अधुना ज्ञाना-

तिचारनिन्दनायाह—

**जं बद्धमिंदिएहिं चउहिं कसाएहिं अप्पसत्थेहिं । रागेण व दोसेण व, तं निंदे तं च गरिहामि ॥ ४ ॥**

'जं बद्धमिंदिएहिं' यद् बद्धं-यत्कृतमशुभं कर्म प्रस्तावाद्विरतिप्रतिबन्धकाप्रशस्तेन्द्रियकषायवशगेन ज्ञानातिचारभूतं, यदुक्तम्- "तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः । तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम्? ॥१॥" 'इन्द्रियैः' स्पर्शनेन्द्रियादिभिः,स्पर्शादिविषयसम्बन्धसम्भूतसाधुसोदासराजघ्राणप्रियकुमारमथुरावणिक्सुभद्राश्रेष्ठिन्यादिवत्, तथा 'चतुर्भिः कषायैः' क्रोधादिभिरप्रशस्तैस्तीव्रौदयिकभावमुपगतैर्मण्डूकीक्षपकपरशुरामधनश्रीमम्मणादिवत् चतुर्भी 'रागेण' दृष्टिरागादिरूपेण गोविन्दवाचकोत्तराभ्यामिव द्वेषेण अप्रीतिरूपेण गोष्ठामाहिलादिवत् । वाशब्दौ विकल्पार्थे, तं निन्दे इत्यादि प्राग्वत् ॥४॥ साम्प्रतं सम्यग्दर्शनस्य चक्षुर्दर्शनस्य च प्रतिक्रमणायाह—

**आगमणे निग्गमणे, ठाणे चंकमणे अणाभोगे । अभिओगे अ निओगे, पडिक्कमे देसिअं सव्वं ॥ ५ ॥**

'आगमने' मिथ्यादृष्टिरथयात्रादेः संदर्शनार्थं कुतूहलेनासमन्ताद्गमने निर्गमे च, यद्बद्धमित्यनुवर्त्तते, तथा 'स्थाने' मिथ्यादृष्टिदेवकुलादावूर्ध्वस्थाने 'चंक्रमणे' च तत्रैवेतस्ततः परिष्वष्कणे, क्व सतीत्याह-'अनाभोगे' अनुपयोगे 'अभियोगे' राजाभियोगादिके 'नियोगे' श्रेष्ठिपदादिरूपे । शेषं पूर्ववत् ॥ ५ ॥ साम्प्रतं सम्यक्त्वातिचारप्रतिक्रमणायाह—

**संका १ कंख २ विगिच्छा ३ पसंस ४ तह संथवो कुलिंगीसु । सम्मत्तस्सइआरे, पडिक्कमे देसिअं सव्वं ॥६॥**

तत्र तावद्दर्शनमोहनीयकर्मोपशमादिसमुत्थोऽर्हदुक्ततत्त्वश्रद्धानरूपः शुभ आत्मपरिणामः सम्यक्त्वं, तद्गुणाविर्भाविका नरव-

र्म्मकथोच्यते—

जम्बूद्वीपेऽस्ति भरते, देशेषु मगधेष्विह । पुरी विजयवत्याख्या, श्रीभिः सर्वपुरीविजित् ॥ १ ॥ **नरवर्म्मनृपस्तत्र, नरेन्द्रा-ऽऽलिनतक्रमः । अभूदेतस्य पत्नी च, सुरूपा रतिसुन्दरी ॥ २ ॥ पुत्रश्च हरिदत्ताख्यो, बलेन हरिसन्निभः । मतिसागरमुख्यास्तु, मन्त्रिणो मन्त्र[3]वित्तमाः ॥ ३ ॥ राज्ञस्तस्येति साम्राज्यं, प्राज्यं पालयतोऽन्यदा । सभासीनस्य संलाप, इत्यभूद्धर्मगोचरः ॥ ४ ॥ तत्रैकेनोदितं धर्मो, दाक्षिण्यौदार्यधैर्यतः । परोपकरणाल्लोकविरुद्धत्यागतस्तथा ॥ ५ ॥ अन्येनोक्तं श्रुतिप्रोक्तः, सोऽग्निहोत्रादिकः खलु । अपरेण पुनः प्रोक्तं, कुलक्रमागतो हि सः ॥ ६ ॥ इतरेण पुनः प्रोक्तं, धर्माधर्मौ कथञ्चन । प्रत्यक्षानुपलभ्यत्वान्न स्तो व्योमारविन्दवत् ॥ ७ ॥ धर्मे विवदमानांस्तान्, विलोक्यैवमिलापतिः । स्वचित्ते चिन्तयत्येवं, चेत[5]नावच्छिरोमणिः ॥ ८ ॥ न दाक्षिण्यादिना धर्मः, किं तु तत्पुरुषव्रतम् । श्रुतिप्रोक्तोऽथ तर्ह्येष, हिंसाद्यैः कलु[6]षीकृतः ॥ ९ ॥ क्र[8]मागतोऽपि नैष स्यात्, चेत्स्या-त्तत्कस्य कस्य नो ? । नास्तिकोक्तं तु नैव स्याज्जगद्वैचित्र्यदर्शनात् ॥ १० ॥ परं को नाम धर्मः स्यात्, सर्वोपाधिविशुद्धिकः ? । इतश्चैत्य प्रतीहारो, नत्वा भूपं व्यजिज्ञपत् ॥ ११ ॥ देवद्वारेऽस्ति वो बालवयस्यः चिरमागतः । क्षिप्रं **मदनदत्तोऽसौ**, प्रवेश्यो-ऽथ नृपोऽवदत् ॥ १२ ॥ सोऽथ प्रवेशितस्तेन, नमन्नालिङ्ग्य भूभुजा । पृष्टः कालमियन्तं त्वं, कुत्रास्थाः ? किमुपार्जय ? ॥१३॥ सोऽपि नत्वा नृपं प्रोचेऽभ्रामं देशेषु भूरिषु । भूयांस्यद्राक्षमाश्चर्याण्यर्जयं च धनं बहु ॥ १४ ॥ अयं चैकावलीहारो, नक्षत्रश्रेणिसो-दरः । मया प्राप्तो महाराज !, विश्वत्रयमनोहरः ॥ १५ ॥ राजाऽऽख्यत्तावदाख्याहि, लाभं मङ्क्षु सखेऽस्य मे । स प्रोवाच तदा

१ श्रेणिः २ विष्णुः ३ गुप्तविचारज्ञोत्तमाः ४ राजा ५ विद्वत्सु ६ मलिनः ७ पारंपर्यं ८ मित्रम्

देव !, निर्गतोऽहमितः पुरात् ॥१६॥भ्रमन्नुर्वीमविश्रान्तं, प्रापद् द्रुपदिकाटवीम् । तृषार्त्तस्तत्र मध्याह्ने, जलार्थीतस्ततो भ्रमन्॥१७॥ इन्दुवत्समुं[2]निव्रातं, क्ष्माधारं च शे[3]षवत् । गणधराख्यमद्राक्षमाचार्यममरैर्वृतम् ॥ १८ ॥ तेषु चैकावलीहारसारालङ्कारधारकः । दृष्टो देवः सदेवीको, धर्ममाकर्णयन्मया ॥ १९ ॥ तदा च भगवद्वाक्यं, ममापि शृण्वतो मुदा । तृष्णा द्विधाऽपि तत्कालं, दुश्छेदाऽपि हि चिच्छिदे ॥ २० ॥ गुरुपादांस्ततो भक्त्या, वन्दित्वाऽहं निषेदिवान् । स्वबान्धवमिव प्रीत्या, प्रेक्षांचक्रे सभासुरः ॥ २१ ॥ पप्रच्छ स्वच्छधीः सूरिं, किमस्मिन् भगवन्मम । प्रमोदातिशयः पुंसि, ततः सूरिवरोऽवदत् ॥ २२ ॥ इतः पूर्वभवेऽभूतां, [1] कोशाम्ब्यां जयभूभुजः । विजयो वैजयन्तश्च, पुत्रौ ज्येष्ठकनिष्ठकौ ॥ २३ ॥ तयोश्च दैवयोगेन, माता कालगता ततः । पाल्यमानौ च तौ धात्र्या, क्रमाद्यौवनमाश्रितौ ॥ २४ ॥ ज्ञात्वान्यदा तयोर्यौवराज्यसंस्थापकं नृपम् । प्रदापितं विमात्राऽथ, विषमुद्यानमीयुषो[5]: ॥२५॥ तत्राशोकतरोर्मूले, दिवाकरमुनिस्तदा । गुणयामास गरुडाध्ययनं ध्याननिश्चलः ॥२६॥इतश्चासनकम्पेन, वेगेन गरुडध्वजः । महर्द्धिरुपतस्थेऽथ, तमृषिं रचिताञ्जलिः ॥२७॥ गरुडेशप्रभावाद् द्राक्, तत्तयोर्विषमं विषम् । क्षयमाप तमस्तोममिव मार्त्त[6]ण्डमण्डलात् ॥ २८ ॥ प्राञ्जलिर्गरुडः सोऽथ, नत्वा तं मुनिसत्तमम् । तुष्टस्तत् श्रुतमश्रौषीत् . गुण्यमानं महात्मना ॥ २९ ॥ विषापहारमाहात्म्यात्, विस्मितौ राट्सुतावपि । प्रणिपत्य मुनेः पादौ, तत्पुरस्तौ निषेदतुः ॥ ३० ॥ सुपर्णः स्माह यद्येष, ऋषिर्नायास्यदत्र तत् । भो विमातृविषाक्रान्तौ, भवन्तावमरिष्यताम् ॥ ३१ ॥ तदिदानीमिदं सम्यक्, सेवेथां विश्वसेवितम् । इत्युदीर्य मुनिं नत्वा, सुपर्णः स्वाश्रयं ययौ ॥ ३२ ॥ तौ तु विज्ञातसत्तत्त्वौ, विरक्तौ भवतो भृशम् । निष्क्रम्य तन्मुनेः पार्श्वे, तेपाते दुस्तपं तपः ॥३३॥

---

१ वत्संयमाः सप्तर्षयश्च २ क्षेधशांतिः पृथ्वी च ३ शेषनागः ५ गच्छतोः ६ सूर्यबिम्बात्

तयोर्मृत्वाऽऽद्यनाकेऽभूत्, ज्येष्ठो विद्युत्प्रभः सुरः। कनिष्ठस्त्वं तु तत्रैव, विद्युत्सुन्दर इत्यभूः ॥ ३४ ॥ च्युत्वा विजयवत्याख्य-पुर्यां ज्येष्ठो वणिक्सुतः। मित्रं मदनदत्तोऽभून्नरवर्म्ममहीपतेः ॥ ३५ ॥ सोऽयमर्थार्जनायाटंस्त्वया दृष्टोऽद्य तत्तव। स्नेहः पूर्वभ-वाभ्यासादस्मिन्नुज्जृम्भते भृशम् ॥ ३६ ॥ श्रुत्वेति विबुधः सोऽदात्, तं हारं हर्षितो मम। अपृच्छच्च गुरून् किं मे, भावा निद्रादयोऽप्यमी ? ॥ ३७ ॥ ते प्रोचुस्तेऽन्तिको मृत्युः, सोऽप्यप्राक्षीत्पुनर्गुरून्। कुत्रोत्पत्तिः ? कथं वा मे, बोधिलाभो भवि-ष्यति ? ॥ ३८ ॥ तेऽभ्यधुर्नरवर्म्मेशगृहे पुत्रत्वमाप्स्यसे। हरिदत्ताभिधो हारममुं दृष्ट्वा च भोत्स्यसे ॥ ३९ ॥ इत्यस्तसंशयः सूरिं, नत्वाऽसौ स्वर्गमीयिवान्। मया पृष्टः पुनर्नत्वा, हारोत्पत्तिं गुरुर्जगौ ॥४०॥ पुरा यदा नवोत्पन्नश्चमरेन्द्रो हरिं प्रति। योद्धुं गतस्ततो भीतोऽधोमौलिर्द्राक् पलायत ॥ ४१ ॥ नश्यतस्तस्य हारोऽयं, कण्ठतो लुठितो भुवि। इतोऽसङ्ख्यतमे द्वीपे, प्राप्तोऽनेन स नाकिना ॥ ४२ ॥ इति श्रुत्वा गुरून्नत्वा, पञ्चविंशतिवत्सरीम्। भ्रान्त्वा भुवं धनं भूरि, समुपार्ज्याहमागमम् ॥ ४३ ॥ स्वा-मिंस्तदेष वः पुत्रः, सोऽभून्नो वेति चिन्त्यताम्। राजाऽऽख्यत्तर्हि हे मित्र !, स हारस्तस्य दर्श्यताम् ॥ ४४ ॥ हरिदत्तमथाहूय, हारस्तस्यैव दर्शितः। ततस्तद्दर्शनात्तस्य, जातिस्मृतिरजायत ॥ ४५ ॥ राज्ञा पृष्टोऽथ सोऽवादीत्तथैव प्राग्भवादिकम्। यथा मदन-दत्तेनाख्यातमग्रे महीपतेः ॥ ४६ ॥ दध्यौ नृपोऽथ योऽग्रेऽभूद्विवादो धर्मगोचरः। सुतस्यामुष्य वृत्तेन, चिच्छिदे सोऽधुना स्वयम् ॥ ४७ ॥ विश्वस्मिन्नपि विश्वेऽस्मिन्नार्हतो धर्म एव तत्। भव्यानां भवभिच्छेत्ता, दाता स्वःशिवशर्मणाम् ॥ ४८ ॥ इतश्चोद्यानपा-लेन, विज्ञप्तो नृपतिर्यथा। देवाद्य बहिरुद्याने, नाम्ना पुष्पावतंसके ॥ ४९ ॥ बहुशिष्यश्चतुर्ज्ञानी, सुरासुरनमस्कृतः। गुणन्धरगुरु-

र्नाम्ना, गुणैश्च समवासरत् ॥५०॥ श्रुत्वेति मुमुदे राजा, केकीवाम्भोधरध्वनिम् । ददौ दानं मुदा तस्मै, पारितोषिकमुच्चकैः ॥५१॥ सिन्धुरस्कन्धमारुह्य, पुत्रमित्रादिभिः समम् । सर्वर्ध्याथ तमाचार्यं, नृपतिर्वन्दितुं ययौ ॥५२॥ विधिवत्तत्र वन्दित्वा, यथास्थानं निषद्य च । अश्रौषीच्छ्रुतिपीयूषदेशीयां देशनामिति ॥ ५३ ॥ भो भव्याः ! सर्वधर्मस्य, मूलं द्वारं प्रतिष्ठितिः । आधारो भाजनं चैव, निधिः सम्यक्त्वमेव हि ॥ ५४ ॥ देवे गुरौ च धर्मे च, सम्यक्त्वं देवतादिधीः । वैपरीत्यं तु मिथ्यात्वं, ते तु मुक्तिभवप्रदे ॥ ५५ ॥ तत्र देवो जिनो वीतरागद्वेषो गुरुः पुनः । महाव्रतधरो धर्मो, दयामूलो जिनोदितः ॥ ५६ ॥ सत्यस्मिन् प्राणिनो न स्तः, श्वभ्रतिर्यग्गती क्वचित् । स्युः स्वर्मनुजनिर्वाणसुखानि स्ववशानि तु ॥ ५७ ॥ अन्तर्मुहूर्त्तमप्येतत्, सम्यक्त्वं ये तु बिभ्रति । तेऽप्यर्द्धपुद्गलावर्त्तमध्ये सिध्यन्ति निश्चितम् ॥ ५८ ॥ श्रुत्वेति नृपतिः पुत्रयुतः सम्यक्त्वपूर्वकम् । गृहिधर्मं प्रपद्याथ, प्रहृष्टः स्वपुरं ययौ ॥ ५९ ॥ अन्यदा दिवि देवेन्द्रो, वर्णयामास तं तथा । नृपोऽयं चाल्यते नैव, सम्यक्त्वात् त्रिदशैरपि ॥६०॥ आकर्ण्यैतत्सुवेगाख्योऽनिमिषोऽश्रद्दधानकः । तत्परीक्षार्थमत्रागाद्वैक्रियाद्यर्धिभाक् ततः ॥ ६१ ॥ तेनादर्शि तथा राज्ञे, कार्यं कुर्वन् यतिव्रजः । यथाऽन्यस्य ध्रुवं धर्मात्, सर्वथा स्यात्पृथग् मनः ॥ ६२ ॥ नरवर्म्मनृपस्त्वेवं, दध्यौ धीमानिदं हृदि । कषादिशुद्धहेमेव, निर्दोषं जिनशासनम् ॥ ६३ ॥ किंत्वमी गुरुकर्मत्वात्, कुर्वते तत्र लाघवम् । रक्षणीयं तु तत्सर्वं, प्रयत्नेनापि धीधनैः ॥६४॥ चिंतयित्वेति सोऽत्रैव, वारयामास तान् नृपः । देवोऽथ निश्चलं ज्ञात्वा, तं च नत्वेत्यवोचत॥ ६५ ॥ धन्यस्त्वं यस्य ते श्लाघां, सदःस्थो मघवा व्यधात् । इत्युक्त्वा स्वकिरीटं च, दत्त्वा तस्मै तिरोदधे ॥ ६६ ॥ सम्यक्त्वमूलमाचर्य,गृहिधर्मं नृपश्चिरम् । पुत्राद्यैः सह निष्क्रम्य, क्रमात्सुगतिभागभूत् ॥ ६७ ॥ इत्यवेत्य नरवर्म्मभूपतेः, सत्फलं विशददर्शनोद्भवम् । स्वर्गमर्त्यशिवसौख्यदं जनास्तत्सदा भवत

तत्र सादराः ॥ ६८ ॥ ( रथोद्धता ) **सम्यक्त्वे नरवर्म्मकथा** ॥

तस्मिंश्च सम्यक्त्वे श्रमणोपासकेन शंकादयः पञ्च अतीचारा ज्ञातव्याः, न समाचरितव्याः, तत्र 'संक'त्ति' जीवादितत्त्वेषु अस्ति नवेति संशयकरणं शंका १ क्षमादिगुणलेशदर्शनादन्यान्यदर्शनाभिलाषः **कांक्षा** २ ' **विगिंछ**'त्ति दानादौ फलं प्रति संदेहो विचिकित्सा, **विउंछा**त्ति पाठे तु मलाविलगात्रोपधीन् साधून् दृष्ट्वा जुगुप्समानस्य विद्वज्जुगुप्सा ३ अहो महातपस्विन इत्यादि कुलिंगिषु वर्णनं **प्रशंसा** ४ विभक्तिव्यत्ययात्तैरपि सह परिचयः **संस्तवः** ५,दृष्टान्ताश्च पेयापायिनौ १ राजामात्यौ २ जिनदत्त-मित्रदुर्गंधि ३ शकडालः ४ सुराष्ट्रश्रावकश्च ५ इति स्वयमूह्याः । एतांश्च सम्यक्त्वस्यातिचारानाश्रित्य यद्बद्धमित्यादि प्राग्वत् ॥ ६ ॥ इदानीं चारित्रातिचारप्रतिक्रमणमभिधित्सुः प्रथमं सामान्येनारंभनिर्देशनार्थमाह—

**छक्कायसमारंभे, पयणे अ पयावणे अ जे दोसा । अत्तट्ठा य परट्ठा, उभयट्ठा चेव तं निंदे ॥ ७ ॥**

**षट्कायानां**–भूदकाग्निवायुवनस्पतित्रसरूपाणां **समारंभे**·परितापने,तुलादण्डन्यायात्संरंभारंभयोःसंकल्पापद्रावणलक्षणयोः, एतेषु सत्सु **ये दोषाः**–पापानि, न त्वतीचाराः, अनंगीकृते मालिन्याभावात्, क्व सति?- **पचने च पाचने च**, चशब्दादनुमतौ च, किमर्थमित्याह–**आत्मार्थ**-स्वभोगार्थं,**परार्थ**-प्राघूर्णकाद्यर्थं, **उभयार्थं च** स्वपरार्थं,चशब्दोऽनर्थकद्वेषादिदोषसूचकः एवमादिप्रकारेयत्तादर्शकः यद्वा आत्मार्थं मुग्धमतित्वात् साध्वर्थमशने कृते मम पुण्यं भविष्यति, एवं परार्थोभयार्थावपि, अथवा षट्कायसमारंभादिष्वयतनापरिशुद्धजलादिना ये दोषाः कृतास्तान् निंदामीति ॥७॥ सांप्रतं सामान्येन चारित्राचारप्रतिक्रमणायाह-

**पंचण्हमणुवयाणं, गुणव्वयाणं च तिण्हमइयारे । सिक्खाणं च चउण्हं पडिक्कमे देसिअं सव्वं ॥ ८ ॥**

सुगमा । नवरं अनु-सम्यक्त्वप्रतिपत्तेः पश्चात् अणूनि-महाव्रतापेक्षया लघूनि वा व्रतानि अणुव्रतानि,तानि च पंचेति मूलगुणाः,तेषामेव विशेषगुणकारकाणि दिग्व्रतादीनि त्रीणि गुणव्रतानि, एतानि यावत्कथितानि, शिक्षाव्रतानि पुनरित्वरकालिकानि शिक्षकस्य विद्याग्रहणमिव पुनः पुनरभ्यसनीयानि चत्वारि सामायिकादीनि ॥ ८ ॥ अधुना प्रथममाह—

**पढमे अणुव्वयंमि, थूलगपाणाइवायविरईओ । आयरिअमप्पसत्थे, इत्थ पमायप्पसंगेणं ॥ ९ ॥**

प्रथमे-सर्वव्रतानां सारत्वादादिमेऽणुव्रतेऽनन्तरोक्तस्वरूपे स्थूलको-बाह्यैरुपलक्ष्यत्वाद्बादरो गत्यागत्यादिव्यक्तलिङ्गद्वित्रिचतुःपञ्चेन्द्रियजीवसम्बन्धिनां प्राणिनां-द्वीन्द्रियादीनामस्थ्याद्यर्थमतिपातो-विनाशस्तस्य विरतिः—निवृत्तिस्तस्याः सकाशादतिचरितम्-अतिक्रान्तं,एतच्च सर्वविरतिसंक्रमेऽपि स्यात् न च तत्प्रातिक्रमणार्हमत आह-अप्रशस्ते-क्रोधादिनौदयिकभावे सति 'इत्थ' त्ति अत्रैव प्राणातिपाते प्रमादप्रसङ्गेन,प्रमादो-मद्यादिः पचधा तत्र प्रसजनं-प्रकर्षेण प्रवर्त्तनं प्रसंगस्तेन,एकग्रहणेन तज्जातीयग्रहणादाकुट्ट्याद्यैरपि, यद्वा विरतिमाश्रित्य यदाचरितं वक्ष्यमाणं वधबन्धादिकमसाध्वनुष्ठितमिति ॥ ९ ॥ तदेवाह—

**वह १ बंध २ छविच्छेए३ अइभारे ४ भत्तपाणवुच्छेए ५ । पढमवयस्सइआरे, पडिक्कमे देसिअं सव्वं॥१०॥**

वधो-द्विपदादीनां निर्दयताडनं बन्धो-रज्ज्वादिभिः संयमनं छविच्छेदः-कर्णादिकर्त्तनं,अतिभारः-शक्त्यनपेक्षं गुरुभारारोपणं, भक्तपानव्यवच्छेदः-अन्नपाननिरोधः, सर्वत्र क्रोधादिति गम्यते, एतांश्च प्रथमव्रतातिचारानाश्रित्य यद् बद्धं,शेषं प्राग्वत् ॥ आह-केऽमी वधादयोऽतिचाराः ?, तेषामनंगीकृतत्वेन मालिन्याभावात्, अंगीकृतप्राणातिपातविरतेश्चाखण्डितत्वात् अतिचारतानुपपत्तिः, अत्रोच्यते, मुख्यतया प्राणातिपात एव प्रत्याख्यातो, न वधादयः, परमार्थतस्तेऽपि प्रत्याख्याता एव द्रष्टव्याः, प्राणातिपातहेतु-

त्वात्तेषां, यद्येवं तर्हि तत्करणे व्रतभंग एव, नातिचारो, नियमस्यापालनात्, नैवं, द्विविधं हि व्रतं- अन्तर्वृत्त्या बहिर्वृत्त्या च, तत्र यदा कोपाद्यावेशात् वधादौ प्रवर्तेत तदा दयाशून्यत्वाद्भग्नमन्तर्वृत्त्या व्रतं, आयुर्बलीयस्त्वादिना त्वमृते जन्तौ बहिर्वृत्त्या पालितं, ततो भंगाभंगस्वरूपोऽतिचारः, तदुक्तं--" न मारयामीति कृतव्रतस्य, विनैव मृत्युं क इहातिचारः ?। निगद्यते यः कुपितो वधादीन्, करोत्यसौ स्यान्नियमानपेक्षः ॥ १ ॥ मृत्योरभावान्नियमोऽस्ति तस्य, कोपाद्दयाहीनतया तु भग्नः। देशस्य भंगादनुपालनाच्च, पूज्या अतीचारमुदाहरन्ति ॥ २ ॥" इति । अनाभोगातिक्रमादिना वा सर्वत्रातिचारताऽवसेया । अस्मिंश्च व्रते यज्ञदेवकथा--

भरतेऽत्र कलिंगेषु, सुवेलायामभूत्पुरि । सुमित्रो नृपतिस्तस्य, देवी ताराभिधेति च ॥ १ ॥ बन्धुदेवस्तथा मन्त्री, तत्पत्नी महिमेति च । यज्ञदेवस्तयोः पुत्रो, विनयादिगुणान्वितः ॥ २ ॥ शिवदेवोऽनुजस्तस्य, प्रकृत्या त्वेष निष्ठुरः । उद्यौवनौ वरे कन्ये, पितृभ्यां तौ विवाहितौ ॥ ३ ॥ सिषेवाते च तौ नित्यं, नृपं तेनापि लक्षितम् । शीलं तयोस्ततो जज्ञे, यज्ञदेवोऽस्य सम्मतः ॥४॥ महीधराख्यसेनान्यः, पुत्री मदनमंजरी । सुरूपा शिवदेवेन, दृष्टा तत्र पुरेऽन्यदा ॥ ५ ॥ तद्रूपमोहितः शून्यचित्तः सोऽथ गृहं गतः । पृष्टः पित्रा सनिर्बन्धमाख्याच्छून्यत्वकारणम् ॥ ६ ॥ ततस्तां याचितुं प्रैषीन्मंत्री तत्र स्वपूरुषान् । तैर्याचितोऽथ सेनानीः, प्रत्यूचे रचितांजलिः ॥ ७ ॥ भव्यमेतत्परं किन्तु, मया दत्तेयमग्रतः । नन्दिघोषाभिधानाय, सन्धिपालस्य सूनवे ॥ ८ ॥ अद्यापि यदि नैनां स, कथंचित्परिणेष्यति । शिवदेवाय तद्दास्येऽवश्यं मदनमंजरीम् ॥ ९ ॥ ततः पुम्भिर्निवृत्योक्ते, वृत्तान्तेऽस्मिन् स मंत्रिसूः । वैमनस्यमगाद्गाढं, कामक्रोधविबाधितः ॥ १० ॥ श्रुत्वैतन्नंदिघोषोऽपि, विशेषेण कृतादरः । तामुद्वोढुमढौकिष्ट, ज्ञात्वेत्यूचेऽथ मंत्रिसूः ॥ ११ ॥ यद्येनामेष दुष्टात्मा, वयस्याः ! परिणेष्यति । हंहो नष्यामि तन्नूनमेनमंतकवेश्मनि ॥ १२ ॥ मंत्री

श्रुत्वेति तन्मंत्रं, यज्ञदेवमदोऽवदत् । कथं निवर्त्तनीयोऽयं, मयाऽस्मात् पापकर्मणः ॥ १३ ॥ हुं ज्ञातमेनमाचार्या, बोधयिष्यन्ति तं ततः । वज्रसेनगुरोः पार्श्वे, निन्यतुस्तौ कथंचन ॥ १४ ॥ मंत्री नत्वा सपुत्रोऽपि, गुरूनेवं व्यजिज्ञपत् । गृहिधर्मस्वरूपं मे, समाख्याहि फलान्वितम् ॥ १५ ॥ गुरुरूचे दयामूलो, धर्मः सर्वत्र गीयते । सुमहार्घ्यफलज्ञातादभयेन विचारितात् ॥ १६ ॥ तत्र द्वैधंत्रिधोपेत्य, निरागस्त्रसजन्तुषु । निषेधो यो वधस्यैतद्, व्रतं धर्मोऽयमेव हि ॥ १७ ॥ वृत्तिकल्पानि शेषाणि, व्रतान्यस्यैव गुप्तये । नृस्वःसौख्यं फलं त्वस्य, मोक्षोऽपि क्रमयोगतः ॥ १८ ॥ व्रतेऽस्मिन्नवगन्तव्या, वर्जनीयास्तु यत्नतः । वधबन्धादयः पंचातिचाराः क्रोधसम्भवाः ॥ १९ ॥ व्रतमेतन्न गृह्णन्ति, गृहीत्वाऽतिचरन्ति ये । ते दुर्गदुर्गतौ दुःखं, सासह्यन्ते ध्रुवं चिरम् ॥२०॥ श्रुत्वेति यज्ञदेवेन, व्रतमेतत्समाददे । न पुनः शिवदेवेनानुशयान्वितचेतसा ॥ २१ ॥ गुरुपादांस्ततो नत्वा, ते सर्वे स्वाश्रयं ययुः । श्रुत्वाऽथ शिवदेवस्तां, तेनोढामूचिवानिदम् ॥ २२ ॥ सन्धिपालतनूजेऽस्मिन्, द्विर्नाश्नाम्यहते ध्रुवम् । शय्यायां नो शये नो वा, मानयामि स्रजादिकम् ॥ २३ ॥ मंत्री श्रुत्वेति वैराग्यान्महात्मा व्रतमाददे । यज्ञदेवस्तु तं सर्वं, गत्वा राज्ञे न्यवेदयत् ॥ २४ ॥ तेनापि परितुष्टेन, स्थापितोऽसौ पितुः पदे । आहूय शिवदेवस्तु, वारितः कर्मणस्ततः ॥ २५ ॥ ओमित्युक्त्वोपरोधेन, सोऽपि च्छिद्राणि मार्गयन् । भोगीव गमयामास, क्रूरात्मा कतिचिद्दिनान् ॥ २६ ॥ अथानंगत्रयोदश्यां, वसन्तसमयेऽन्यदा । पुरीजनो ययौ सर्वः, सर्वर्ध्या क्रीडितुं वने ॥ २७ ॥ तदा चागत्य विज्ञप्तं, शिवदेवस्य हेरिकैः । सायमल्पपरीवारः, सोऽद्योद्यानं गमिष्यति ॥ २८ ॥ ततोऽसौ तत्र सन्नह्य, गत्वा प्रच्छन्नमास्थितः । नन्दिघोषोऽथ तत्रागाद्वने मदनमर्चितुम् ॥ २९ ॥ मंत्रिसूस्तेन बद्ध्वा तं, हत्वा चावर्मितांगकम् । प्रणश्यन् सन्धिपालेन, प्रेक्ष्याग्राहि प्रहृत्य सः ॥ ३० ॥ राज्ञे निवेदितं तच्च, तेनान्यायीत्युपेक्षि सः ।

ततोऽसौ सन्धिपालेन, हतोऽगाद् दुर्गदुर्गतिम् ॥ ३१ ॥ यज्ञदेवोऽथ पूर्लोकैः, प्रेर्यमाणोऽप्यनेकशः । वैरनिर्यातनायोच्चैश्चिन्तयामास चेतसि ॥ ३२ ॥ सर्वेषां प्राणिनां सर्वे, प्राणिनोऽनन्तशोऽभवन् । मित्राण्यमित्रास्तत्कोऽत्र, स्वजनो दुर्जनोऽपि वा ? ॥ ३३ ॥ किं च यो येन हन्येत, स तेनामित्रतां व्रजेत् । जन्मान्तरेष्वदभ्रेषु, तत्प्राणी हन्यते कथम् ? ॥ ३४ ॥ यज्ञदेवो विदन्नेवं, वचोभिरविवेकिनाम् । विरतेर्जीवघातस्य, नाचालीदचलाचलः ॥ ३५ ॥ स्वधर्मं निरतीचारमाचर्य सुचिरं सुधीः । इहैव प्राप सत्कीर्तिं, प्रेत्य स्वर्गादिभागभूत् ॥ ३६ ॥ एवं जना बहुलदूषणसद्गुणालीं, प्राणातिपातकरणाकरणे निशम्य । स्वर्गापवर्गफलदानविधौ पटिष्ठां, तत्सर्वदेहिषु दयां सततं कुरुध्वम् ॥ ३७ ॥ (वसन्ततिलका) प्राणातिपातव्रते यज्ञदेवकथा ॥ १० ॥ द्वितीयव्रतमाह---

**बीए अणुव्वयंमि, परिथूलगअलिअवयणविरईओ । आयरिअमप्पसत्थे, इत्थ पमायप्पसंगेणं ॥ ११ ॥**

द्वितीयेऽणुव्रते, परीत्यतिशयेन स्थूलकम्-अकीर्त्यादिहेतु अलीकवचनं- कन्यालीकादि पञ्चधा, तत्र द्वेषादिभिरविषकन्यां विषकन्यादि वदतः कन्यालीकम् १ एवमल्पक्षीरां बहुक्षीरां गामित्यादि वदतो गवालीकम् २ परसत्कां भूमिमात्मसत्कां वदतो भूम्यलीकम् ३उपलक्षणानि चैतानि सर्वद्विपदचतुष्पदादीनां, न्यासस्य-धनधान्यादिस्थापनिकाया(अप)हरणम्-अपलापो न्यासापहारः ४ अत्र पूर्वत्र चादत्तादानत्वे सत्यपि वचनस्यैव प्राधान्यविवक्षणात् मृषावादत्वं , लभ्यदेयविषये प्रमाणीकृतस्योत्कोचमत्सराद्यभिभूतस्य कूटसाक्षिदानात्कूटसाक्षित्वम् ५, अनयोश्च द्विपदाद्यलीकान्तर्भावेऽपि लोकेऽतिगर्हितत्वात् पृथगुपादानं, एतस्य पंचविधालीकस्य यद्वचनं-भाषणं तस्य विरतेः, 'आयरिय' इत्यादि प्राग्वत् ॥ ११ ॥ अस्यातिचारप्रतिक्रमणायाह—

**सहसा रहस्स दारे, मोसुवएसे अ कूडलेहे अ । बीयं वयस्सइआरे, पडिक्कमे देसिअं सव्वं ॥ १२ ॥**

तत्र 'सहसि' त्ति सूचनात् सूत्रमिति सहसा- अनालोच्याभ्याख्यानम्-असद्दोषाधिरोपणं चौरोऽयमित्याद्यभिधानं सहसाभ्याख्यानं १ रहसि- एकान्ते मन्त्रयमाणान्वीक्ष्य इदं चेदं च राजविरुद्धादिकमेते मन्त्रयन्ते इत्यादेश्चाभिधानं रहोऽभ्याख्यानं १ स्वदाराणां विश्रब्धभाषितस्यान्यस्मै कथनं स्वदारमन्त्रभेदः,ततो द्वन्द्वं कृत्वा तस्मिन् ३ अज्ञातमन्त्रौषध्याद्युपदेशनं मृषोपदेशस्तस्मिन् ४ अन्यमुद्राक्षरादिना कूटस्यार्थस्य लेखनं कूटलेखस्तस्मिंश्च ५, शेषं प्राग्वत् ॥ अत्र व्रते भ्रातृद्वयकथा—

अत्रैव भरतक्षेत्रेऽभूत्कांचनपुरेश्वरः । राजा समरसिंहाख्यः, सिंहतुल्यपराक्रमः ॥ १ ॥ तत्र चाध्यापकौ वेदपारगौ च सहोदरौ । सागराग्निशिखाभिख्यौ, छात्रव्रजसमावृतौ ॥ २ ॥ तौ च शुक्तिमतीपुर्यां, पुरा क्षीरकदम्बकः । अध्यापयदुपाध्यायो, धीधनानां धुरन्धरः ॥ ३ ॥ अन्यदा श्रुतमेताभ्यां, यथा क्षीरकदम्बकः । प्राप मृत्युं ततस्तस्य, पदे पर्वतकोऽभवत् ॥ ४ ॥ वस्वाख्यो नृपतेः पुत्रः, तत्पुर्यां च नृपोऽजनि । सहाध्यायी तयोश्चागान्नारदोऽतिथिरन्यदा ॥ ५ ॥ अजैर्यष्टव्यमित्येतत् , वाक्यं पर्वतकस्तदा । व्याचक्रे पशुभिर्यागो,विधेय इति मन्दधीः ॥६॥ अथोचे नारदो मैवं, व्याख्यासीस्त्वं सखे! मृषा । त्रिवर्षा अजशब्देन, व्रीहयोऽत्र शिरःपणः ॥ ७ ॥ एवं विवदमानौ तौ, वसुक्षोणीशपर्षदि । गत्वा शशंसतुस्तस्मै,स्वस्वव्याख्यानमुच्चकैः ॥८॥ अथाध्यापकपुत्रस्य, दाक्षिण्याद्धरणीधरः। अजैर्यष्टव्यमित्यत्र, छागैरित्यूचिवान् मृषा॥९॥ततश्चपेटया रोषाद् , वसुर्वसुमतीपतिः । हतो देवतया क्लेशभागी पर्वतकोऽप्यभूत्॥ १० ॥श्रुत्वेति लोकतो वार्त्तां,सागरः प्रोचिवानिदम् । हहा पर्वतकः कस्माद्धेतोर्व्याख्यातवान् मृषा?॥११॥उवाचाग्निशिखोऽथैवं,को दोषस्तेन यद्यसौ । मुख्योऽर्थः ख्यापितो लोके?,प्रत्यूचे सागरोऽथ तम्॥१२॥हं हो मुख्योऽयमर्थश्चेत्तत्ताभ्यां तादृशं फलम् । किमवाप्समथो गाढद्वेषादग्निशिखोऽवदत् ॥१३॥ द्विधापि दृश्यते दण्डो,न्यायादन्यायतोऽपि च । किं न श्रुतः पुराणेषु,माण्डव्यर्षि-

स्तथाहि सः॥१४॥एकाग्रमानसोऽरण्ये,तपः कुर्वन् सुष्करम्। दृष्टोऽन्यदा सलोप्त्रेण,चौरेण द्रुतमियूता ॥१५॥ पृष्ठतस्त्वियूतां राजपुरुषाणां भयादसौ ।तस्करस्तद्दपेः पार्श्वे, लोप्त्रं मुक्त्वा ययौ क्वचित् ॥१६॥ पश्चादापतितैस्तैस्तद्, दृष्ट्वेदं हृदि चिन्तितम्। हृतमेतदनेनैव,बत दम्भोऽस्य कीदृशः!॥१७॥बद्धस्ततःसलोप्त्रोऽसौ,निन्ये तैर्नृपतेः पुरः। तेनापि रभसाऽऽदिष्टं,वध्योऽयं दुष्टचेष्टितः ॥ १८ ॥ तैरारोप्य खरे सोऽथ,तथैवासननिश्चलः ।नीत्वा वध्यभुवं तत्र,शूलिकां चिक्षिपे क्षणात् ॥१९॥ उरो भित्त्वाऽस्य सा यावन्निर्ययौ सोऽथ पीडितः । ध्यानाद् भ्रष्टस्तथास्थं स्वं, दृष्ट्वा दध्याविति क्रुधा ॥ २० ॥ हन्म्येतान् किंकरान् यद्वा, किमेतैः किंकरैर्हतैः!। हन्म्येनं नृपतिं यो हि, शिष्टाशिष्टाविचारकृत् ॥ २१ ॥ एषोऽपि न वधार्हो मे, धर्मराजनियोगकृत् । तमेव भस्मसादद्य, करोम्युग्रतपोऽग्निना ॥ २२ ॥ स ऋषिर्यावदेतस्योदस्थाद् घाताय तत्क्षणात् । चित्रगुप्तयुतो धर्मराजोऽथैत्याब्रवीदिदम् ॥ २३ ॥ मुने ! किं किमहं कस्योद्दालयामि ददामि वा ? । किन्तु स्वकृतकर्मानुरूपो व्यापार एव मे ॥ २४ ॥ दध्यौ सोऽथ मुनिः पूर्वं, किं मयाऽकारि दुष्कृतम् ? । वत्सपालभवे यूकां, शूलायां विद्धवानहम् ॥ २५ ॥ ज्ञात्वेति प्राक्तनं ज्ञानात्, स्वकृतं दुष्कृतं तत । ऋषिः प्रदीपवन्नागदर्शनात् द्राग् शमं गतः ॥ २६ ॥ युग्मम् । तदेवं सर्वजीवानां, भ्रातः ! स्वकृतकर्मणाम् । न मोक्षस्तेन तौ प्राप्तौ, विप्लवं वसुपर्वतौ ॥ २७ ॥ भ्रातस्तत्तस्य को दोषो, मुख्यव्याख्याजुषः खलु ? । प्रत्यूचे सागरोऽथैवं, मा वोचस्त्वं कदाग्रहात् ॥ २८ ॥ यत्र हिंसा ध्रुवं तत्र, धर्मो नास्तीति युक्तिमत् । ततश्चाग्निशिखो रोषादूचे किं न त्वया श्रुतम्? ॥ २९ ॥ पुराणं १ मानवो धर्मः २, सांगो वेद ३ श्चिकित्सितम् ४ । आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥ ३० ॥ सागरः पुनरप्युवाच--अस्ति वक्तव्यता काचित् , तेनेदं न विचार्यते । निर्दोषं कांचनं चेत्स्यात् , परीक्षाया बिभेति किम्? ॥ ३१ ॥ श्रुत्वेत्यग्निशिखः

साक्षादग्निवत् प्रज्वलन् क्रुधा । बभाषे भाषितेनालं, त्वया सार्द्धमतः परम् ॥ ३२ ॥ अयोग्योऽयमिति ज्ञात्वा, तूष्णीं चक्रेऽथ सागरः । अन्यदैयुः पुरे तत्र, सूरयो गुणसागराः ॥ ३३ ॥ सागरः सादरस्तत्र, गत्वा नत्वा गुरूनथ । पप्रच्छ स्वच्छधीः सत्यस्वरूपं गृहमेधिनाम् ॥ ३४ ॥ गुरुर्जगाद कन्यादिस्थूलालीकान्यगारिभिः । यावज्जीवं न वाच्यानि, पंचापि द्विविधंत्रिधा ॥ ३५ ॥ पंचास्मिन् सहसाभ्याख्यानादिदोषा मनीषिभिः । परिहार्याः प्रयत्नेन, निर्व्याजसुकृतार्थिभिः ॥ ३६ ॥ व्रतमेतत्सदा सम्यग् , ये बिभ्रति परत्र ते । विश्वस्यापि च पूज्याः स्युरादेयवचसस्तथा ॥ ३७ ॥ व्रतमेतन्न गृह्णन्ति, गृहीत्वाऽतिचरन्ति ये । ते स्युर्भवे भवे मूकाः, काहला मुखरोगिणः ॥ ३८ ॥ तदा चाग्निशिखः सोऽपि, तत्रायातो जनैः सह । सूरिं प्रोवाच नो किंचिदस्ति सत्यव्रते फलम् ॥ ३९ ॥ सूरिरूचे मनःशुद्धिसम्भवं क्लेशनाशनम् । ब्रह्मत्वहेतुकं सत्यं, तथा च गदितं श्रुतौ ॥ ४० ॥ यदा सर्वानृतं त्यक्तं, मृषाभाषाविवर्जितम् । अनवद्यं च भाषेत, ब्रह्म सम्पद्यते तदा ॥ ४५ ॥ सोऽथ प्रत्युत्तरं दातुमशक्तो मौनमाश्रयत् । सागरेण पुनस्तत्र, शिश्रिये सूनृतं व्रतम् ॥ ४२ ॥ जिनधर्मरतो जज्ञे, ततःप्रभृति सागरः । द्वितीयो गुरुकर्मत्वात्तन्निन्दातत्परः पुनः ॥ ४३ ॥ अन्यदा तत्पुरेशेन, प्रारब्धे यज्ञकर्मणि । निष्णातत्वान्नियुक्तोऽसौ, यागहोमादिकर्मसु ॥ ४४ ॥ अन्येऽप्यध्यापका राज्ञा, मिलिताः शास्त्रपारगाः । सागरस्तत्र दृष्ट्वाऽजान्, वधाय प्रगुणीकृतान् ॥ ४५ ॥ विज्ञप्तस्तेन राजा किं, वध्यन्तेऽमी वराककाः? । अजशब्देन गृह्यन्ते, त्रिवर्षा व्रीहयो न किम् ? ॥४६॥ वसुराजस्य वृत्तान्तः, किं न पर्वतकस्य च । श्रुतो देवेन ? यन्मिथ्याभाषणात्तौ क्षयं गतौ ॥ ४७ ॥ राजाऽऽख्यन्न श्रुतं व्यक्तं, ततोऽसौ सागरोऽवदत् । अत्रार्थे मा स्म शंकिष्ठाः, शिष्टोऽत्रान्योऽपि पृच्छ्यताम् ॥ ४८ ॥ पृष्टास्तेऽध्यापकाः प्रोचुः, श्रुतमस्माभिरप्यदः । ततः सोऽग्निशिखोऽवादीत् , क्रोधाहंकारपूरितः॥४९॥

किमस्य कथ्यतां देव !, त्यक्तो येन कुलक्रमः । अयं शूद्रान् प्रणन्ता च, श्रूयतां मे तु निश्चितम् ॥ ५० ॥ चेत्तौ क्षयं गतौ मिथ्याभाषणात्तर्हि मे ध्रुवम् । भ्रंशः स्याद्गाढदिव्येन, नृपोऽप्यामेत्युवाच तम् ॥ ५१ ॥ कदाग्रहगृहीतेन, फालोऽथ जगृहेऽमुना । निर्दग्धस्तेन राज्ञाऽसौ, देशान्निष्काशितस्ततः ॥ ५२ ॥ सत्यवादीति पूर्लोकैः, पूजितो भूभुजाऽपि च । सागरः सुचिरं धर्मं, चरित्वा सुगतिं गतः ॥ ५३ ॥ इत्यवधार्य मृषावदनेऽन्तर्दूषणजालमतीव भवन्तः । भाषत भव्यजना इह सत्यं, धर्मयशःसुखदं खलु नित्यम् ॥ ५४ ॥ (दोधकवृत्तम्) मृषावादव्रते भ्रातृद्वयकथा ॥ १२ ॥ इदानीं तृतीयव्रतमाह--

तइए अणुव्वयंमी, थूलगपरदव्वहरणविरईओ । आयरिअमप्पसत्थे, इत्थ पमायप्पसंगेणं ॥ १३ ॥

तृतीयेऽणुव्रते स्थूलकं-राजनिग्रहादिहेतुः परद्रव्यहरणं तस्य विरतेः इत्यादि प्राग्वत् ॥१३॥ अस्यातिचारप्रतिक्रमणायाह-

तेनाहडप्पओगे, तप्पडिरूवे विरुद्धगमणे अ । कूडतुलकूडमाणे, पडिक्कमे देसिअं सव्वं ॥ १४ ॥

स्तेनाः-चौरास्तैराहृतं-देशान्तरादानीतं किंचित् कुंकुमादि तत्समर्घमितिलोभाद् यत्काणक्रयेण गृह्यते तत्स्तेनाहृतं१ 'पयोगि'-त्ति सूचनात्तस्करप्रयोगः, तदेव कुर्वन्तीति तस्कराः- चौरास्तेषामुद्यतकदानादिना हरणक्रियायां प्रेरणं प्रयोगः २ 'तप्पडिरूवि'त्ति तस्य-प्रस्तुतकुंकुमादेः प्रतिरूपं-सदृशं कुसुम्भादि कृत्रिमकुंकुमादि वा तत्प्रक्षेपेण व्यवहारस्तत्प्रतिरूपव्यवहारः ३ विरुद्धयोर्नृपयो राज्यं तत्र ताभ्यामननुज्ञाते वाणिज्यार्थमतिक्रमणं गमनं विरुद्धगमनं ४ कूटतुलाकूटमानं न्यूनाधिकाभ्यां व्यवहारः५, यदाह- "उचियं मुत्तूण कलं, दव्वाइकमागयं च उक्करिसं । निवडियमवि जाणंतो, परस्स संतं न गिण्हिज्जा ॥ १ ॥" एतेषु क्रियमाणेषु यद्बद्धमित्यादि प्राग्वत् । तत्र पर्शुरामकथा—

काम्पिल्यपुरमत्रास्ति, तत्र चक्रेश्वरो नृपः। वसुन्धरा प्रिया तस्यार्जुननामा च मंत्र्यभूत् ॥ १ ॥ तत्पत्नी देवकी तस्याः, पर्शुरामाभिधः सुतः। यौवनस्थोऽप्यसौ विद्या, अभ्यस्यन्नस्ति नित्यशः ॥ २ ॥ पित्रोक्तः सोऽथ किं न त्वं, गृहकार्याण्यवेक्षसे? । सेवसे विषयान्नापि, विद्याव्यसनदूषितः? ॥ ३ ॥ एवमुक्तोऽप्यसौ नादात्किंचित्प्रत्युत्तरं पितुः। केवलं तस्थिवान्नित्यं, विद्याभ्यासकृतादरः ॥ ४ ॥ न्यासायालंकृतिर्वर्या, प्रैषि राज्ञाऽथ मंत्रिणः। तेनापि पर्शुरामाय, हस्ते न्यासार्थमर्पिता ॥ ५ ॥ ययौ मंत्री क्वचित्कार्ये, पर्शुरामस्तदा पुनः। सूत्रार्थं विषमं किंचिच्चिन्तयन्नस्ति निश्चलः ॥ ६ ॥ व्यग्रचित्तमथ ज्ञात्वा, दासस्तं कालिकासुतः। अलंकारं तमादाय, नंष्ट्वा कुत्राप्यगाद् द्रुतम् ॥ ७ ॥ ज्ञाते तस्मिंश्च सूत्रार्थेऽलंकारं तस्य मार्गतः। मंत्र्यागात्सोऽपि तं ज्ञात्वा, नष्टं रुष्टोऽब्रवीदिदम् ॥ ८ ॥ सुतव्याजात् त्वमस्माकं, ध्रुवं जातोऽसि रे रिपुः। राज्ञे किमुत्तरं देयं ?, नष्टेऽस्मिन् कुत्र नः स्थितिः ? ॥ ९ ॥ अविद्यामिव चेद्विद्याभ्यासमेनं न मोक्ष्यसि। क्षयं नेष्यसि तन्नूनमचिरात्सकलं कुलम् ॥ १० ॥ एवं निर्भर्त्सितः पित्रा, पर्शुरामो व्यचिन्तयत्। किं ममात्र निवासेन, पित्रोरुद्वेगकारिणा ? ॥ ११ ॥ ध्यात्वेति निशि निर्गत्य, स गच्छन्नुत्तरापथम्। इन्द्रप्रस्थपुरोद्याने, मुनिमेकमुदैक्षत ॥ १२ ॥ भक्त्याऽभिवन्द्य तत्पादयमलं विमलाशयः। पप्रच्छ हेतुना केन, भवता जगृहे व्रतम् ? ॥ १३ ॥ सोऽवादीत्तगरापुर्यामिन्द्रदत्ताभिधः सुतः। श्रेष्ठिनः सुरदत्तस्याभूवं भाग्यविवर्जितः ॥ १४ ॥ पितृभ्यां प्रवरां कन्यां, यौवनस्थो विवाहितः। नियुक्तो गृहकार्येषु, विभवोपार्जनेषु च ॥ १५ ॥ पंचत्वमथ संप्राप्तौ, पितरौ तदनु क्षयम्। धनं नीतं समन्ताच्च, जलाग्नितस्करादिभिः ॥ १६ ॥ दारिद्र्योपद्रुतः शून्यचित्तो निर्गत्य तत्पुरात्। भ्राम्यन् दृष्ट्वा मुनिं नत्वाऽप्राक्षं दारिद्र्यकारणम् ॥ १७ ॥ ऋषिः सोऽतिशयज्ञानी, प्रोवाचेह पुराऽभवत्। कौशाम्ब्यां शाम्बनामाद्याणुव्रतद्वयभृ-

द्रविक् ॥ १८ ॥ गुरुं नत्वाऽन्यदाऽप्राक्षीत्तृतीयाणुव्रतं स तु । ऊचे येन गृहीतेन, जायते राजनिग्रहः ॥१९॥ द्वैधं त्रैधं न तद् ग्राह्यं, सुधीभिर्गृहमेधिभिः । अस्मिन् पंचातिचाराश्च, वर्ज्याः स्तेनाहृतादयः ॥ २० ॥ इदं ये निरतीचारमाचरन्ति चिरं व्रतम् । संचरन्त्यचिरात्तेषु, सुचिरं प्रचुराः श्रियः ॥ २१ ॥ व्रतमेतन्न गृह्णन्ति, गृहीत्वाऽतिचरन्ति ये । तेऽङ्गच्छेदादिभाजः स्युरिहामुत्र तु नारकाः ॥ २२ ॥ शम्बः श्रुत्वेति जग्राह, तृतीयाणुव्रतं ततः । विशुद्धं पालयामास, कियत्कालमनाकुलः ॥ २३ ॥ क्रमाच्च जज्ञिरे तस्य, पुत्र्योऽष्टौ तत आश्वगात् । तद्धनं निधनं तासां, विवाहादिभिरन्वहम् ॥ २४ ॥ तत्रानिर्वहमाणोऽसौ, पर्यन्तग्राममाश्रयत् । अतिचारांस्ततस्तत्र, तृतीयाणुव्रतेऽकरोत् ॥ २५ ॥ तान् पर्यन्तेऽप्यनालोच्य, मृत्वा किल्विषिकोऽभवत् । देवः सोऽथ ततश्च्युत्वाऽभूस्त्वमत्रेन्द्रदत्त ! भोः ॥ २६ ॥ तत्ते व्रतातिचारैस्तैर्द्धनं क्षयमगादिह । पूर्वजोपार्जितं वित्तं, नव्यं चार्जयसे नहि ॥ २७ ॥ श्रुत्वेति प्राग्भवं स्मृत्वा, स्वां जातिं जातभावनः । प्राव्रजं तन्मुनेः पार्श्वे, व्रतहेतुः स एष मे ॥ २८ ॥ निशम्येति मुनेर्वृत्तं, पर्शुरामोऽपि रञ्जितः । ततो जग्राह शुद्धात्मा, तार्तीयीकमणुव्रतम् ॥ २९ ॥ साधुनेत्यनुशिष्टोऽसौ, यच्चैवं भद्र ! मा व्रतम् । अतिचारैस्ततः सोऽपि, तथेति प्रत्यपद्यत ॥ ३० ॥ मुनिं नत्वा पुरस्यान्तः, पर्शुरामोऽथ जग्मिवान् । वणिजो जयदेवस्य, विपणौ निषसाद सः ॥ ३१ ॥ जज्ञे परिचयस्तेन, नित्यं तत्र निषीदतः । तौ द्वावप्यन्यदा स्नातुं, पुष्करिण्यामुपेयतुः ॥ ३२ ॥ श्रेष्ठिनः क्रीडतस्तत्रापप्तत्तीरेऽङ्गुलीयकम् । स्नात्वा च तदविज्ञाय, प्रतस्थे स्वगृहं प्रति ॥३३॥ पर्शुरामोऽथ तद् दृष्ट्वा, गृहीत्वा यावदन्वगात् । तावत् तत्पतितं ज्ञात्वा, श्रेष्ठी गाढं विषेदिवान् ॥ ३४ ॥ पश्चादापतितः पर्शुरामो ज्ञात्वा तमातुरम् । मया लब्धमिदं श्रेष्ठिन् !, ब्रुवन्नित्येतदार्प्पयत् ॥ ३५ ॥ तुष्टः श्रेष्ठी जगादैवं, कुत्र त्वमिदमासदः? । स स्माहासादितं ह्येतत्, मया वाप्यास्तटे ननु ॥ ३६ ॥ जय-

देवोऽथ तं ज्ञात्वा, परस्वविगतस्पृहम् । शशंसेति त्वयैवेयं, रत्नगर्भा ध्रुवं धरा ॥३७॥ युतस्य पर्शुरामेण, श्रेष्ठिनस्तस्य सोऽन्यदा । अदीदृशदलंकारं, तं गुप्तं कालिकासुतः ॥ ३८ ॥ तमालोक्य जगादैवं, जयदेवो विशारदः । महामूल्यमदो लातुमलमेतन्महीभृतः ॥ ३९ ॥ प्रच्छन्नं श्रेष्ठिने प्रोच्य, वृत्तान्तं तस्य मन्त्रिभूः । कुतस्त्वमागा इत्यूचे, संभ्रमात्कालिकासुतम् ॥ ४० ॥ अजानन्निव सोऽप्यूचे, किमेतत्प्रच्छनं तव? । स्मित्वोचे पर्शुरामस्तं, व्यस्मार्षीराचिरेण किम् ? ॥ ४१ ॥ मन्त्रिणोऽर्जुनसंज्ञस्य, भोः काम्पिल्यपुरे किल । कालिकासुतनामा त्वं, दासोऽसि ननु मत्पितुः ॥ ४२ ॥ धार्ष्ट्यमालम्ब्य दासस्तं, प्रत्यूचे तरलेक्षणः । भ्रान्तोऽसि भद्र ! सादृश्यान्ननु विज्ञोऽपि साम्प्रतम् ॥ ४३ ॥ अथोचे जयदेवस्तं, कुत्रत्योऽसि ? किमाह्वयः ? । अलङ्कारश्च कस्यायं ?, मूल्यं किं वाऽस्य कल्पितम् ?॥ ४४ ॥सोऽप्यूचे सेवको गंगनामाहं रोहणेशितुः। तदीयोऽयमलंकारो, लक्षमूल्यो हि निश्चितम् ॥ ४५ ॥ श्रेष्ठ्युवाच मृषाप्यज्ञ!,वक्तुं नो वत्सि रे ननु। एकैकमपि येनास्य, माणिक्यं लक्षमूल्यकम् ॥४६॥ एतत्तु घटते यत्स्युरीदृग्रत्नानि रोहणे । दासः प्रोचे कृतं मूल्येनार्प्यतामेष मङ्क्षु मे ॥ ४७ ॥ श्रेष्ठी तु नार्प्पयत्तेऽथ, ययुः सर्वे नृपान्तिके । सोऽपि पक्षद्वयं पृष्ट्वालंकारं प्रेक्ष्य चाब्रवीत् ॥ ४८ ॥ भो दिव्योऽयमलंकारो, दिव्यादानेन लभ्यते । चण्डिकायाः पुरो वाप्याः, कमलाकर्षणात्तु तत् ॥ ४९ ॥ ततोऽतिधृष्टताग्रस्तो, विधिवत्कालिकासुतः । वाप्यन्तः प्राविशत् क्रूरग्राहाद्यैर्द्राक् स भक्षितः ॥ ५० ॥ राज्ञोचे मन्त्रिसूर्लोभात्कुरु दिव्यं त्वमप्यदः । कृत्वा पञ्चनमस्कारं, यावत्तत्राविशत्सकः ॥ ५१ ॥ तावत्पृष्ठमधः कृत्वा, मकरस्तस्य तस्थिवान् । लात्वोत्पलानि तत्स्थः स, निर्ययौ जयसंयुतः ॥ ५२ ॥ लुब्धो राजाप्यलंकारं, न तस्मै यावदार्प्पयत् । सर्वोऽपि श्रेष्ठिना तावद्, वृत्तान्तोऽशंसि भूपतेः ॥ ५३ ॥ राजाप्युवाच तर्ह्येष, समये वोऽर्प्पयिष्यते । नृपं नत्वेयतुर्गेहे, श्रेष्ठिमन्त्रिसुतावथ ॥ ५४ ॥ राज्ञाऽ-

क्षेपि बहिर्भूमिमार्गे मुद्रादिकं स्वकम् । नियुक्ताश्च तदन्वेष्टुं, प्रच्छन्नं चरपूरुषाः ॥ ५५ ॥ दृष्ट्वा तं मन्त्रिसर्वमुद्रादिकं नादत्त निःस्पृहः । चरैर्निवेदिते तस्मिन्, वृत्तान्ते रञ्जितो नृपः ॥ ५६ ॥ पर्शुरामं तमाहूयालंकारं तस्य सोऽर्प्पयत् । सत्कृतस्तेन लोकैश्च, ततः स्वपुरमाययौ ॥ ५७ ॥ पितुः समर्प्पयामासालंकारं स्वस्य सद्व्रतम् । कालिकासुतवृत्तं च, सप्रपञ्चमचीकथत् ॥ ५८ ॥ ततः पिता तुतोषोच्चैः, पूर्लोको नृपतिस्तथा । सचक्रे पर्शुरामं तं, निर्लोभत्वेन रञ्जितः ॥५९॥ पालयित्वा परद्रव्यापहारविरतिं चिरम् । पर्शुरामस्ततो जज्ञे, स्वर्गादिश्रीनिकेतनम् ॥ ६० ॥ एवं भो भो भव्यलोका अदत्तं, गृह्णानानां दुःखमत्रैव वीक्ष्य । तत्त्यागे च स्वर्गसिद्धी यशश्चादत्तादाने मा स्म कृध्वं मनोऽपि ॥ ६१ ॥ (मालिनी) स्तैन्यव्रते पर्शुरामकथा॥ १४ ॥ तुर्यव्रतमाह—

**चउत्थे अणुव्वयंमी, निच्चं परदारगमणविरईओ । आयरिअमप्पसत्थे, इत्थ पमायप्पसंगेणं ॥ १५ ॥**

चतुर्थेऽणुव्रते नित्यं-सदा परे-आत्मव्यतिरिक्तास्तेषां दाराः-परिणीतसंगृहीतभेदाभिन्नानि कलत्राणि तेषु गमनम्-आसेवनं तस्य विरतेः, इत्यादि प्राग्वत् ॥ १५ ॥ अस्यातिचारप्रतिक्रमणायाह----

**अपरिग्गहिया इत्तर अणंग वीवाह तिव्वअणुरागे । चउत्थवयस्सइआरे, पडिक्कमे देसिअं सव्वं ॥ १६ ॥**

‘अपरिग्गहिया’ अपरिगृहीता-विधवा तस्यां गमनमपरिगृहीतागमनं १‘इत्तर’त्ति इत्वरम्-अल्पकालं भाटीप्रदानतः केनाचित्स्ववशीकृता वेश्या तस्यां गमनमित्वरपरिगृहीतागमनं २ ‘अणंग’त्ति अनंगः- कामस्तत्प्रधानाः क्रीडा- अधरदशनालिंगनाद्याः परदारेषु कुर्वतोऽनंगक्रीडा, वात्स्यायनाद्युक्तचतुरशीतिकरणासेवनं वा३ ‘विवाहि’त्ति परकीयापत्यादीनां स्नेहादिना विवाहस्य करणं परविवाहकरणं, स्वापत्येष्वपि संख्याभिग्रहो न्याय्यः ४ ‘तिव्वअणुरागि’त्ति कामभोगतीव्रानुरागः, कामेषु--शब्दादिषु

भोगेषु--रसादिषु तीव्रानुरागः-अत्यन्तं तदध्यवसायः ५, स्वदारसंतोषिणश्च त्रय एवान्त्यातिचाराः, आद्यौ तु भङ्गावेव, स्त्रिया अपि तथैव, यद्वाऽतिक्रमादिभिरतिचारताऽवसेया, उक्तं च-"परदारवज्जिणो पंच हुंति तिन्नि उ सदारसंतुट्ठे। इत्थीइ तिन्नि पंच व, भंगविगप्पेहि नायव्व ॥ १ ॥" त्ति, एतानाश्रित्य यद् बद्धमिति प्राग्वत् ॥ अत्र सुरप्रियकथा---

मगधेषु पुरं राजगृहं तत्र द्विजोऽभवत् । प्रभासगणभृद्भ्राता, श्राद्धो यज्ञप्रियाभिधः ॥ १ ॥ प्रिया यज्ञयशास्तस्य, तनयश्च सुरप्रियः । रूपसौभाग्यशीलाद्यैः, यः सुराणामपि प्रियः ॥ २ ॥ आयातमन्यदा राजगृहे धर्मरुचिं मुनिम् । प्रभासः स्माह तत्रानुशिष्ट्यै यज्ञप्रियं द्विजम् ॥ ३ ॥ अगान् मुनिः क्रमाद्यज्ञप्रियौकः सोऽपि वीक्ष्य तम् । ससंभ्रममथोत्थाय, डुढौके स्वयमासनम् ॥ ४ ॥ तत्रासीनं ववन्दे तं, विप्रस्तत्स्वजनास्तथा । मुनिस्तान् वन्दयामास, श्रीवीरं सपरिच्छदम् ॥ ५ ॥ तानूचे चानुशास्त्येवं, प्रभासो मन्मुखेन वः । मनुष्यत्वादिसामग्रीं, युष्माभिः प्राप्य दुर्लभाम् ॥ ६ ॥ धर्मकार्येषु नो कार्यो, भोः प्रमादो मनागपि । द्विजोऽपि तन्मुनेर्वाक्यं, तथेति प्रत्यपद्यत ॥ ७ ॥ मुनिर्जगाद किं स्वानि, निर्वहन्ति व्रतानि वः । त्वत्प्रसादादियत्कालं, निर्व्यूढानीति सोऽवदत् ॥ ८ ॥ अतः परं तु नो वेद्मि, यत्पुत्रो मे सुरप्रियः । सौभाग्यातिशयात् स्त्रीभिः, प्रार्थ्यतेऽसौ पदे पदे ॥ ९ ॥ भगवन्निर्मलं शीलं, यद्ययं खण्डयिष्यति । भावी ध्रुवं कलङ्को मे, शरच्चन्द्रोज्ज्वले कुले ॥ १० ॥ मुनिरूचे विषादीर्मा, नैत्राकृत्यं करिष्यति । पुण्यानुबन्धिपुण्यानुभावादेष महामतिः ॥ ११ ॥ श्रुत्वेति परितुष्टोऽसौ, नत्वाऽप्राक्षीत्पुनर्मुनिम् । किं कृतं सुकृतं पूर्वभवेऽनेनेति कथ्यताम् ॥ १२ ॥ मुनिराख्यदसौ वाराणसीपुर्यां पुरा भवे । राज्ञोऽरिमर्दनस्याभूज्जयमालीति नन्दनः ॥ १३ ॥ सोऽगात्क्रीडार्थमुद्याने, वसन्ततिलकेऽन्यदा । चारणश्रमणं तत्रैक्षिष्टाशोकतरोस्तले ॥ १४ ॥ नत्वा तं भक्तितस्तस्य, पुरो यावन्नि-

षेदिवान् । तावत्तत्रागमयौ स्त्रीयुक्, खेचरोऽनंगकेतुकः ॥ १५ ॥ वन्दित्वाऽथ निषण्णं तं, मुनिः पप्रच्छ खेचरम् । सुरूपा दृश्यते केयमबला बलशालिका ॥ १६ ॥ मुनिं नत्वाऽथ सोऽवादीत्, त्रपावनतकन्धरः । ताराचन्द्राभिधानस्य, सुतेयं खेचरेशितुः ॥१७॥ मातंगीपुत्रिकासक्तमियं ज्ञात्वा निजं पतिम् । ततस्तस्मिन् विरक्तत्वात्, स्वीचक्रे मयका प्रभो ! ॥ १८ ॥ मुनिराख्यदथो भद्र !, परस्त्रीगमनं नृणाम् । कलङ्कः स्वकुलस्यात्र, वैराकीर्त्योश्च कारणम् ॥१९॥ अमुत्र तु तदासक्ता, नरके दुःखमुज्ज्वलम् । सासह्यन्ते ज्वलत्ताम्रपुत्रिकालिंगनादिकम् ॥ २० ॥ अत्रान्तरे स्त्रियस्तस्याः, पतिरागादुदायुधः, । उच्चैरनंगकेतुं तं, तर्जयन् वीक्ष्य सोऽप्यथ ॥ २१ ॥ रे मातङ्गीपते ! नूनं, मृतोऽस्यद्य स्वकर्मभिः । क्षिपन्नेत्रमढौकिष्टानंगकेतुर्युधे द्रुतम् ॥ २२ ॥ तौ द्वावपि चिरं युद्ध्वा, मिथो घातान् मृतिं गतौ । स्त्री साप्युपपतेर्देहं, गृहीत्वाऽग्निमसाधयत् ॥ २३ ॥ शोचन्तं तमथो वीक्ष्य, चारणश्रमणं मुनिम् । जयमाली जगादैवं, किं यूयं शोकसंकुलाः ? ॥ २४ ॥ सोऽवादीदेष मे भ्राता, नमस्कारविवर्जितः । पापादस्मादकस्माद्धि, मृत्युमापेति शुक् मम ॥ २५ ॥ जयमाली मुनिं नत्वा, परस्त्रीगमनव्रतम् । ययाचे सोऽप्युवाचास्य, स्वरूपं प्रथमं शृणु ॥ २६ ॥ परेषामात्मभिन्नानां, स्त्रियस्ताश्च पुनर्द्विधा । वैक्रियौदारिकभेदाद्देवतिर्यग्नरस्त्रियः ॥ २७ ॥ द्विधा ताः परिणीताश्च, संगृहीताश्च तासु या । यथागृहीतभङ्गेन, विरतिस्तदिह व्रतम् ॥ २८ ॥ युग्मम् ॥ अत्रापरिगृहीताद्या, वर्ज्याः पञ्चातिचारकाः । फलमस्य यशःकीर्त्तिसौभाग्यस्वर्गितादिकम् ॥ २९ ॥ व्रतमेतन्न गृह्णन्ति, गृहीत्वाऽतिचरन्ति ये । लभन्ते ते हि दौर्भाग्यं, षण्ढत्वं दुर्गदुर्गतिम् ॥ ३० ॥ श्रुत्वेति नृपपुत्रोऽपि, ज्ञाततत्त्वो विशेषतः । जग्राह तन्मुनेः पार्श्वे, तुरीयं तदणुव्रतम् ॥ ३१ ॥ मुनिस्तार्क्ष्य इवोत्पत्य, व्योम्नाऽन्यत्र ततो ययौ । मन्यमानः कृतार्थं स्वं, राजपुत्रोऽप्यगाद् गृहम् ॥ ३२ ॥ सोऽथापरिगृहीतादिदोषाणां विषयीकृतः ।

सौभाग्यात्पुरनारीभिर्नातिचारीन्निजं व्रतम् ॥ ३३ ॥ सभासीनेऽन्यदा तस्मिन्, प्रवृत्तं वर्णवर्णनम् । वर्णेषु सर्ववर्णानां, रक्षणात् क्षत्रियो वरः ॥ ३४ ॥ श्रुत्वेति स मदं जातः, कृत्वा मृत्वा च नाक्यभूत् । आद्यस्वर्गे ततश्च्युत्वा, सोऽयं ते तनयोऽजनि ॥३५॥ तदेष प्राग्भवे सम्यक्, तुर्याणुव्रतपालनात् । सुभगोऽपि सुरूपोऽपि, शीलं न स्खलयिष्यति ॥ ३६ ॥ सुरप्रिय इति श्रुत्वा, जातजातिस्मृतिर्जगौ । व्रतायास्य मुनेः पार्श्वे, द्राग् विसर्जय मां पितः ! ॥ ३७ ॥ यज्ञप्रियो जगादैवं, कियत्कालं विलम्बय । प्रस्तावे प्रव्रजिष्यावः, श्रीप्रभासस्य संनिधौ ॥ ३८ ॥ ततो धर्मरुचेः पार्श्वे, यतिधर्मप्रियोऽपि हि । गृहिधर्मं पितुर्वाक्यात्, प्रतिपेदे सुरप्रियः ॥ ३९ ॥ मुनिस्ताननुशिष्यैवं, विजहार ततः पुरात् । सुरप्रियस्तु तं धर्मं, पालयामास शुद्धधीः ॥ ४० ॥ गत्वोद्यानेऽन्यदा सोऽथ, प्रसुप्तः कदलीगृहे । कुतश्चिदथ तत्रागात्, व्यन्तर्येका सुरूपिका ॥ ४१ ॥ तद्रूपमोहिता साऽथ, तत्पत्नीरूपधारिणी । सविकारवचांस्युच्चैर्वदन्ती तमुपस्थिता ॥ ४२ ॥ दध्यौ सुरप्रियोऽप्येवं, नूनमेषा न मे प्रिया । निस्त्रपाऽनिमिषाक्षीति, त्यक्त्वा तां स्वगृहं ययौ ॥ ४३ ॥ गत्वा पत्ये शशंसैषा, यथाऽनेन द्विजन्मना । प्रार्थिताऽहं ततो दुष्टान्नष्टा कष्टेन धाष्टर्यतः ॥ ४४ ॥ क्रुद्धस्तं व्यन्तरो हन्तुं, यावदागाद्दिनात्यये । वासागारं ययौ तावत्, सप्रियोऽपि सुरप्रियः ॥ ४५ ॥ स्वप्रिया तेन पृष्टाऽथ, किमद्य त्वं वनेऽगमः ?। कर्णौ पिधाय साऽवोचदाः किमेवमिहोच्यते ? ॥ ४६ ॥ न यान्त्यन्या अपि स्वामिन्नेकाकिन्यः कुलस्त्रियः। स्नुषाऽपि श्रीप्रभासस्य, कथं यास्याम्यहं वने ? ॥ ४७ ॥ परमाख्याहि मे सत्यं, किमत्र प्रश्नकारणम् ? । यथावृत्तमथाचख्यौ, व्यन्तर्याश्चेष्टितं ततः ॥४८॥ श्रुत्वेति व्यन्तरो ज्ञात्वा, स्वपत्न्या दुष्टचेष्टितम् । दध्यौ धिगस्तु नारीणां, दुःशीलत्वकुलौकसाम् ॥ ४९ ॥ ततः सुरप्रियं प्रोचे, वृत्तान्तं स्वं निवेद्य सः । तुष्टोऽस्मि तव शीलेन, महासत्त्व ! वरं वृणु ॥ ५० ॥ सोऽप्यूचे यन्मया प्राप्तो, धर्मस्तदपरेण किम् ? ।

भूयोऽपि व्यन्तरोऽवादीदमोघं देवदर्शनम् ॥ ५१ ॥ सोऽवदत्तर्हि मे ब्रूहि, स्फुटमायुः कियच्चिरम्? । व्यन्तरोऽथ जगादैवं, मासमात्रमतः परम् ॥ ५२ ॥ श्लाघमानस्ततस्तस्मै, तथा तस्य गृहांगणे । स्वर्णवृष्टिं विधायोच्चैर्व्यन्तरोऽसौ तिरोदधे ॥ ५३ ॥ सुरप्रियोऽर्हतोऽर्चित्वा, लात्वा संस्तारकव्रतम् । मासं संलिख्य मृत्वा च, देवोऽभूदच्युते दिवि ॥ ५४ ॥ उत्कृष्टस्थितिरुत्कृष्टान्, भोगांस्तत्रानुभूय सः । च्युत्वोत्कृष्टव्रतात्सर्वोत्कृष्टस्थानमवाप्स्यति ॥ ५५ ॥ इति निशम्य सुरप्रियवृत्तकं, विदुरचित्तचमत्कृतिकारकम् । सुखयशःशिवभूरुहकाननं, कुरुत तुर्ययमप्रतिपालनम् ॥५६॥ (द्रुतविलम्बितम्) इति सुरप्रियकथानकम् ॥१६॥ पंचमाणुव्रतमाह-

**इत्तो अणुव्वए पंचमंमि आयरिअमप्पसत्थंमि । परिमाणपरिच्छेए, इत्थ पमायप्पसंगेणं ॥ १७ ॥**

इतस्तुर्याणुव्रतानन्तरं धनधान्यादिनवविधपरिग्रहप्रमाणलक्षणे पंचमे अणुव्रते यद् आचरितमप्रशस्तभावे सति, क्व विषये?-'परिमाणपरिच्छेदे' परिग्रहप्रत्याख्यानकालगृहीतप्रमाणोल्लंघने, अत्रेत्यादि प्राग्वत् ॥१७॥ अस्यातिचारप्रतिक्रमणायाह-

**धणधन्न खित्तवत्थू, रूप्पसुवन्ने अ कुविअपरिमाणे । दुपए चउप्पयंमि पडिक्कमे देसिअं सव्वं ॥ १८ ॥**

धनं-गणिमादि चतुर्द्धा, तत्र गाणिमं पूगफलादि धरिमं गुडादि मेयं घृतादि पारिच्छेद्यं माणिक्यादि, धान्यं-व्रीह्यादि चतुर्विंशतिधा, एतयोरतिक्रमोऽतिचारः, अत्र धनधान्यस्य प्रमाणप्राप्तस्याधमर्णादिभ्योऽधिकलाभे समुपस्थिते यावन्नाग्रेतनं विक्रीणीते तावत्तद्गृह एव स्थापयतः सत्यंकारेण वा स्वीकुर्वतः कुशूलमूटकादिबन्धनेन वा धनधान्यातिक्रमरूपः प्रथमोऽतिचारः १ क्षेत्रं सेतुकेतूभयात्मकं वास्तुखातोच्छ्रितोभयात्मकं वा तयोराधिकसंभवे ध्यादियोजनेनातिचारः२ रूप्यं-रजतं सुवर्ण-कनकमेतयोः पत्न्यादिभ्यः प्रदानेन ३ कुपितं-स्थालकच्चोलकादि स्थूलत्वादिविधापनेन ४ द्विपदं दास्यादि चतुष्पदं गवाश्वादि, तत्र द्विपद-

चतुष्पदगर्भापणनेनेति, शेषं प्राग्वत् ॥ ५ ॥ अत्र व्रते क्षेमादित्यधरणयोः कथा—

रम्यमस्ति महाराष्ट्रेष्वरिष्ठपुरपत्तनम् । तत्र त्रिलोचनो राजा, बभूव भुवि विश्रुतः ॥१॥ क्षेमादित्याभिधस्तस्य, प्रधानपुरुषोऽभवत् । वसुन्धरा प्रिया तस्य, पुत्रश्च धरणाभिधः ॥ २ ॥ क्षेमादित्योऽन्यदांकस्थधरणः स्वगृहांगणे । भीमर्षिं वीक्ष्य नत्वोचे, किमकार्षीः प्रभो ! ह्यदः ॥३॥ वक्ष्यन्त्येतन्ममाचार्या, अत्रोद्याने स्थितास्तव । इत्युक्त्वा भक्तमादाय, भीमर्षिर्निर्ययौ गृहात् ॥४॥ गत्वोद्यानवने मंत्री, स याम्यमथुरेश्वरान् । पंचापि पंचधाचाररतान् भक्त्या नमोऽकरोत् ॥५॥ तेषु ज्येष्ठमुवाचैवं, विनयेन कृतांजलिः । युष्माभिस्तादृशी सम्पत्, तत्यजे केन हेतुना ? ॥६॥ धर्माचार्यो बभाषैवं, दग्धा द्वीपायनर्षिणा । पुरी द्वारवती तस्या, निर्गतौ रामकेशवौ ॥७॥ तौ पाण्डुमथुरां यान्तौ, कौशाम्ब्यरण्यमध्यतः । हते जराकुमारेण, हरौ रामोऽगृहीत्तपः ॥८॥ ज्ञात्वेति यादवध्वंसमस्माभिश्चिन्तितं ततः । विद्युत्संपातसंकाशां, धिग् लक्ष्मीं क्षणभंगुराम् ॥ ९ ॥ प्रव्रज्या शिश्रियेऽस्माभिस्ततो भवविरागतः । क्षेमादित्यस्ततो भूयो, गुरून्नत्वा व्यजिज्ञपत् । परिग्रहप्रमाणं मे, तत् प्रसद्य प्रयच्छत ॥ ११ ॥ गुरुर्जगाद भोः ! पूर्वं, सप्रपंचमिदं शृणु । नवधा धनधान्यादिर्भवेत्तावत्परिग्रहः ॥ १२ ॥ प्रमाणमिच्छया तस्य, कार्यं द्वैधांत्रिधादिना । फलमस्य श्रियः सर्वाः, स्वर्मनुष्यादिकाः खलु ॥ १३ ॥ धनधान्यप्रमाणातिक्रमाद्याः पंच दोषकाः । वर्ज्या निर्व्याजपुण्यार्थं, तीव्रलोभोदयोद्भवाः ॥१४॥ व्रतमेतन्न गृह्णन्ति, गृहीत्वाऽतिचरन्ति ये । भवे भवे भवेत्तेषां, नैःस्वं प्रेष्यत्वमेव च ॥ १५ ॥ इत्याचार्यवचः श्रुत्वा, क्षेमादित्योऽग्रहीत्ततः । पंचमाणुव्रतं सम्यक्, सम्यक्त्वादानपूर्वकम् ॥ १६ ॥ मुनीन्नत्वा ययौ गेहे, मुनयस्ते तु भूतले । विहृत्य पुण्डरीकाद्रौ, शिश्रियुर्निर्वृतिश्रियम् ॥ १७ ॥ धरणो यौवनस्थोऽथ, लग्नो द्रव्यमुपार्जितुम् । उपायै राजसेवाद्यैरादरेण दिवानिशम् ॥ १८ ॥

ततोऽसौ भणितः पित्रा, किमेवं वत्स ! खिद्यसे ? । अर्थस्यार्थे वृथाऽत्यर्थं, सर्वथाऽनर्थवेश्मनः ॥ १९ ॥ सोऽवादीत्तात ! निर्द्रव्यः, पुमान् चंचापुमानिव । लोकेऽकिंचित्करो यस्मात्पुमर्थो व्यर्थ एव तत् ॥ १९ ॥ अयोग्योऽयमिति ज्ञात्वा, स पित्रोपेक्षितस्ततः । प्रावर्त्तत विशेषेण, द्रव्योपार्जनकर्मसु ॥ २० ॥ अन्यदा पूर्जनै राज्ञे, विज्ञप्तं पुरसंनिधौ । निघ्नन्नास्ति जनं श्रित्वा, पंचास्यः पंचयोजनीम् ॥ २१ ॥ राज्ञा स्वं चिक्षिपे चक्षुः, सेवकेष्वखिलेष्वपि । क्षीणोत्साहाः क्षणे तस्मिन्, ते तस्थुर्भूगतेक्षणाः ॥ २२ ॥ नत्वाऽथ धरणोऽवादीदादेशं देव ! देहि मे । ततस्तस्मै स्वहस्तेन, बीटकं नृपतिर्ददौ ॥ २३ ॥ सन्नह्य सोऽपि तत्रागात् , कतिचित्पुरुषान्वितः । वनान्तर्वीक्ष्य हर्यक्षं, हक्कयामास निष्ठुरम् ॥ २४ ॥ सज्जन्तं तं क्रमं वीक्ष्याविध्यद्बाणेन चक्षुषोः । तथाप्यभिपतन्तं च, शरश्रेण्या जघान सः ॥ २५ ॥ लोकैश्चमत्कृतैस्तत्र, चक्रे जयजयारवः । गत्वा च नृपतेः पार्श्वे, वृत्तान्तोऽयं निवेदितः ॥ २६ ॥ तुष्टेन तेन सच्चक्रे, धरणस्तत्पिता पुनः । न्यमंत्रि रजतस्वर्णग्रामाकरपुरादिभिः ॥ २७ ॥ स तु स्वर्णादिकं किंचिल्लात्वा नतु पुरादिकम् । गृहेऽगाद्धरणेनाथ, जगदे मन्दबुद्धिना ॥ २८ ॥ ग्रामादीन्नाग्रहीः किं त्वं ?, हुं ज्ञातोऽसि कदाग्रही। सोऽवादीत् वत्स ! नाग्राहि, व्रतभंगभयान्मया ॥ २९ ॥ ततोऽस्मै धरणः क्रोधात् , प्रत्यूचे निष्ठुरं वचः । वयं दग्धास्त्वदीयेन, श्रद्धामौग्ध्येन नित्यशः ॥ ३० ॥ किं न वेत्सि जरन्मूर्ख !, कृतान्तवदने मया । प्रविश्य तोषितो राजा ?, स त्वया विफलीकृतः ॥ ३१ ॥ तत्कृतं सहवासेन, सदाऽनर्थकृता त्वया । इत्युक्त्वा भागमादाय, विभिन्नो धरणोऽभवत् ॥ ३२ ॥ वीरंमन्योऽन्यदा सोऽथ, राज्ञा प्रैषि जलाध्वना । चौडेशं प्रति पोतेन, प्रभूतप्राभृतान्वितः ॥ ३३ ॥ ज्ञात्वेत्यपत्यस्नेहार्त्तं, क्षेमादित्योऽब्रवीद्यथा । किमेवं प्राणसंदेहे, वत्सात्मा ! क्षिप्यतेऽम्बुधौ ? ॥३४॥ आजन्म बहुभिः क्लेशैर्भूयानपि हि मीलितः । केनापि सह नो याति, भो !

भद्रार्थो भवान्तरे ॥ ३५ ॥ स्वाधीनं स्वजनादीनां, धनं यत्तव दुष्कृतम् । तत्पुनर्दुर्गतौ गत्वा, वेद्यं स्वेनैव निश्चितम् ॥ ३६ ॥
धरणोऽथ क्रुधोत्थाय, बभाषे पितरं प्रति । विभिन्नस्यापि मे पृष्ठं, किमद्यापि न मुंचसि ? ॥ ३७ ॥ इत्युक्त्वा धरणः कर्मबहुलो
बहुलोभभृत् । पोतमारुह्य चौडेशपुरं प्राप क्रमेण सः ॥ ३८ ॥ तत्पुरेशो नतस्तेन, प्रतिप्राभृतदानतः । सत्कृतो व्यवहृत्याथ,
व्यावर्त्तत तथैव सः ॥ ३९ ॥ ततश्च चौरपोतेन, रुद्धे लग्ने युधि क्षणात् । धरणस्य तरी भग्ना, निममज्जाम्बुधौ धनम् ॥ ४० ॥
ततः फलकमादाय, धरणः सप्तभिर्दिनैः । कृच्छ्रेणोत्तीर्य पाथोधिमरण्यानीमथासदत् ॥ ४१ ॥ प्राणवृत्तिं फलैः कृत्वा, तत्र भ्राम्य-
न्नितस्ततः । खनन्तं मेषशृंगेण, ददर्शैकं नरं भुवम् ॥ ४२ ॥ गत्वा तदन्तिके भक्तिं, कुर्वता तेन रंजितः । धातुवादी ततोऽवादी-
दपास्ये तव निःस्वताम् ॥ ४३ ॥ ध्मात्वा तौ धातुपाषाणान् , रात्रावनिमिषेक्षणौ । क्षिप्तौषधी रसं स्वर्णं, पातयामासतुस्ततः
॥४४॥ पुनः पातयितुं लग्नौ, क्षेत्रपालेन तौ क्रुधा । उद्दाल्य प्राक्तनं स्वर्णं, दूरं क्षिप्तौ पृथक् पृथग् ॥४५॥ धरणोऽथ विषण्णात्मा,
दध्यौ धिग् मामधन्यकम् । सर्वत्र निष्फलारम्भः, प्रत्युतानर्थभाजनम् ॥४६॥ तमेवमतिशोचन्तं, तत्रैत्यैकोऽमरोऽब्रवीत् । शृणु भो !
धरण ! प्राच्यं, निःस्वताहेतुमात्मनः ॥ ४७ ॥ बभूव मिथिलापुर्यां, त्वं चाहं चातिकोविदौ । सहोदरौ वणिक्पुत्रावन्योऽन्यमनु-
रागिणौ ॥४८॥ कर्म यद्यद् व्यधावावां, तत्तन्निष्फलतां ययौ । निर्द्धनत्वात्ततो जातौ, तूलादपि लघू जने ॥४९॥ ततोऽपमानदा-
रिद्र्यदुःखसंतापतापितौ । निर्गत्य स्वगृहाद्भ्रान्तौ, वनादौ सैरभाविव ॥५०॥ तत्र च प्रेक्ष्य संभूतमुनिं नत्वा च भक्तितः । तद्दुः-
खकारणं स्वस्यापृच्छाव स्वच्छमानसौ ॥ ५१ ॥ मुनिर्जगाद लोभो हि, सर्वदुःखखनिः खलु । त्यक्त्वा तदेनमाधत्तं, संतोषं
सौख्यकारणम् ॥ ५२ ॥ श्रुत्वेति प्रत्यपद्याव, पंचमाणुव्रतं ततः । शुद्धं धर्मं विधायाहं, सौधर्मे त्रिदशोऽभवम् ॥ ५३ ॥ पंचमा-

णुव्रतं त्वं तु, विराध्य बहुशो मृतः । भ्रान्त्वा तिर्यक्ष्वियत्कालं, भवेऽस्मिन् धरणोऽभवः ॥ ५४ ॥ श्रुत्वेति धरणः स्मृत्वा, स्वां जातिं जातभावनः । गाढं लोभाग्रहं त्यक्त्वा, विरतिं देशतोऽग्रहीत् ॥ ५५ ॥ अवधिज्ञानतो ज्ञात्वा, सर्वमेतत्तवाधुना । प्रतिबोधार्थमत्रागां, मा प्रमादीर्वृथा भवान् ॥ ५६ ॥ इत्युक्त्वा परितुष्टात्मा, स्वर्गी स्वर्गमगात्तथा । धरणोऽपि सुसंतुष्टिपुष्टोऽरिष्टपुरं क्रमात् ॥ ५७ ॥ सत्कृतो भूभुजा सोऽपि, पित्राद्यैरभिनन्दितः । कुर्वन् धर्मोद्यमं पृष्टः, पित्रोचे प्राग्भवादिकम् ॥ ५८ ॥ ततः पिताऽस्य सर्वस्वं, दत्त्वा प्रव्रज्य च स्वयम् । कृत्वा कर्मक्षयं प्राप, विमलाद्रौ महोदयम् ॥ ५९ ॥ धरणेऽथ पुनर्लोभाल्लोभे गृद्धिमुपेयुषि । विराध्य विरतिं रोगग्रस्तो मृत्वा भवेऽभ्रमत् ॥ ६० ॥ परिग्रहाधिक्यभवं सुदारुणं, फलं निशम्येति विवेकिनो जनाः ! । अनन्तसौख्यस्पृहयालवो यदि, स्फुटं कुरुध्वं प्रमितिं तदत्र भोः ॥ ६१ ॥ (वंशस्थम्) पंचमव्रते क्षेमादित्यधरणकथा ॥ १८ ॥

साम्प्रतं त्रीणि गुणव्रतानि, तत्राद्यप्रतिक्रमणायाह—

**गमणस्स य परिमाणे, दिसासु उड्ढं अहे अ तिरिअं च । वुड्ढि सइअंतरद्धा, पढमंमि गुणव्वए निंदे ॥१९॥**

**गमनस्य परिमाणे-**गतेरियत्ताकरणे, चशब्दाद्यदतिक्रान्तं, क्व विषये ?- दिक्षु, तदेवाह-'उड्ढं' ति ऊर्ध्वं योजनद्वितयादिना गृहीतप्रमाणस्यानाभोगादिनाऽधिकगमनमूर्ध्वदिक्प्रमाणातिक्रमरूपः प्रथमोऽतिचारः १ एवमधस्तिर्यग्दिशोश्चातिचारद्वयं वाच्यं २।३ 'वुड्ढि'त्ति क्षेत्रवृद्धिः, कोऽर्थः ?- सर्वासु दिक्षु योजनशतादिना गृहीतप्रमाणस्यान्यतरस्यां दिशि योजनशतादेः परतः कार्योत्पत्तावन्यदिक्सम्बन्धीनि कानिचिद्योजनानि जिगमिषितायां दिशि वर्द्धयतो दिग्द्वयमीलने त्वंगीकृतप्रमाणस्यानतिक्रमाद्भंगाभंगलक्षणः क्षेत्रवृद्धिरूपस्तुर्योऽतिचारः ४ 'सइअंतरद्ध'त्ति स्मृत्यन्तर्द्धा, स्मृतेर्भ्रंश इत्यर्थः, यथा-पूर्वस्यां दिशि कृतयोजनशतप्रमा-

णस्य गमनकाले च किं शतं पंचाशद्वा कृतमिति संदेहे व्यक्तमस्मरतः पंचाशत उपरि गच्छतः पंचमोऽतिचारः, शतात्परतो भंग एव ५, तदेवं प्रथमे नियमितकतिपयभूभागं मुक्त्वा चतुर्दशरज्जुप्रमाणलोकगतजन्तुजातयातनारक्षणरूपाय गुणाय व्रतं तस्मिन् यदतिचरितमित्यादि प्राग्वत् ॥ अत्र भ्रातृद्वयकथा–

माकन्दी पूः कलिंगेषु, तत्रेशः शिवपालकः । प्रिया भानुमती तस्य, देवपालश्च तत्सुतः ॥१॥ विष्णुश्रेष्ठिसुतौ तस्य, वयस्यौ श्राद्धवंशजौ । शिवभूतिस्तथा स्कन्दः, परमप्रीतिभाजनम् ॥ २ ॥ राजपुत्रः सहैताभ्यां, संयुक्तोऽसौ दिवानिशम् । प्रश्नोत्तरादिभिः कार्यैर्गमयामास वासरान् ॥ ३ ॥ कुमारः सोऽन्यदैकान्ते, भणितः शिवभूतिना । निरास्वादविनोदेन, किमेवं जन्म हार्यते ? ॥४॥ अकृतश्रेयसां पुंसां, नरत्वं खलु दुर्लभम् । अम्भोधिमध्यनिर्मग्नचिन्तारत्नमिवामलम् ॥ ५ ॥ कुमारः स्माह धर्मो हि, मतः कस्यापि कश्चन । संदिग्धेऽत्र न तत्त्याज्यमसंदिग्धमिदं सुखम् ॥ ६ ॥ तन्मित्र ! मेदृशं भूयश्चीकथः कथमप्यहो । तूष्णीं भूत्वा ततः सोऽगाद्विषण्णः श्रेष्ठिसद्गृहम् ॥ ७ ॥ कुमारोऽपि विना तेन, न रतिं प्राप कुत्रचित् । तमाहूय ततः सोचे, मन्तुर्मे क्षम्यतामयम् ॥ २८ ॥ किं च ते ज्ञाततत्त्वस्य, न युक्तं मामुपेक्षितुम् । इत्युक्त्वा भोजयित्वा तं, गोष्ठीचक्रे तथैव सः ॥ ९ ॥ प्रस्तावे पृच्छतः प्रश्नोत्तरं तेन वणिक्प्रसूः । मिषं कृत्वा ययौ पार्श्वे, सिद्धसेनगुरोस्ततः ॥ १० ॥ नत्वोचे यादृशेनासौ, कुमारः प्रतिबुध्यते । ज्ञात्वा ज्ञानेन तादृग्मे, किञ्चित्प्रश्नोत्तरं वद ॥ ११ ॥ शिवभूतिस्ततः सम्यक्, तदाऽधीत्य गुरूदितम् । विद्वद्गोष्ठ्यां द्वितीयेऽन्हि, राजपुत्रान्तिकं ययौ ॥ १२ ॥ तेनापि कृतसन्मानो, निषण्णः सोऽथ धीमतः । केनाप्युक्तमिदं प्रश्नोत्तरं व्यस्तसमस्तकम् ॥ १३ ॥ प्रियं केन कृतं सर्वे ?, का सहेन्नाम ? किं समम् ? । ब्रह्मार्हतोऽथवाख्या का ?, को वाऽम्भोनिधिरन्तिमः ?

॥ १४ ॥ द्रुतमुक्तं कुमारेण, स्वयंभूरमणस्ततः । मुक्त्वाऽन्यान् पठतोऽनेन, राजपुत्रः सुधीरपि ॥ १५ ॥ ( पृष्टः ) पाण्डवाः कति ? कः शब्दो नतौ शब्द्यः ? कथं विधिः ?। किंनामा भूसुतः ? को वा, मन्त्रेषु परमो मतः ? ॥ १६ ॥ ततश्चिरं विमृश्योचे, राजपुत्रः सुधीरपि । सखे ! पञ्चनमस्कार ( मंगलं ) इति संभावयाम्यहम् ॥ १७ ॥ शिवभूतिस्ततः प्रोचे, किं विलम्बोऽत्र मित्र ! ते ?। स प्रोचेऽद्यापि भावार्थं, मन्त्रस्यास्य न वेद्म्यहम् ॥ १८ ॥ तन्मित्र ! मन्त्रमेनं मे, पुरोऽधीष्व सकृत्ततः । तेनापि पठिते तस्मिन्, जातिस्मृतिमवाप सः ॥ १९ ॥ केशान् क्लेशानिवोत्खाय, मुष्टिभिः पञ्चभिस्ततः । राजपुत्रः प्रवव्राज, देवतादत्तलिंगभृत् ॥ २० ॥ निर्गत्य तत्क्षणाद्गेहाद्, गुहाया इव केसरी । स महापुण्डरीकाख्यवने गत्वाऽथ तस्थिवान् ॥ २१ ॥ राजा ज्ञात्वेति वृत्तान्तं, तत्रैत्य सपरिच्छदः । शोकार्त्तो वीक्षितुं नेशस्ततो नत्वा न्यवर्त्तत ॥ २२ ॥ प्रोल्लसद्भक्तिसंभारोद्भूतरोमांचकंचुकः । शिवभूतिस्तु तं नत्वा, पप्रच्छ व्रतकारणम् ॥ २३ ॥ अथोवाच कुमारर्षिः, पुरा कोल्लपुरेऽभवत् । श्रेष्ठिनः सिन्धुदत्तस्य, नन्दनो नाम नन्दनः ॥२४॥ त्रिमासवयसस्तस्य, दन्तान् वीक्ष्याथ सोऽब्रवीत् । किमेतदिति साशंकः, पृष्टो नैमित्तिकोऽवदत् ॥२५॥ प्रथमे मासि संजातदन्तो हन्ति कुलं ततः । द्वितीये जातदन्तस्तु, स्वं तातं वा निहन्ति सः ॥ २६ ॥ तार्तीयीके पुनर्मासे, पितरं वा पितामहम् । तुर्यमासेषु जातेषु, निजभ्रातॄन् विनाशयेत् ॥२७॥ हस्त्यश्वकरभान् वर्यान्, पंचमे पुनरानयेत् । मासे करोति षष्ठे तु, संतापं कलहं कुले ॥ २८ ॥ नाशयेत् सप्तमे मासे, धनधान्यगवादिकम् । ज्ञात्वेति सिन्धुदत्तात्र, यद्युक्तं तद्विधेहि भोः ! ॥२९॥ नैमित्तिकं विसृज्याथ, श्रेष्ठी तं भिन्नमंदिरे । अस्थापयत्तथाप्याशु, तस्करैस्तत्पिता हतः ॥ ३० ॥ ततोऽसौ ज्ञातिभिस्त्यक्तोऽप्यजीवीत्कुष्ठयोगतः । भिक्षां भ्रमन् जनाद् वृत्तं, स्वं श्रुत्वा न्यषदद् भृशम् ॥ ३१ ॥ तेन पर्यटतोद्याने, सुधर्मा गुरुरन्यदा । दृशोः

सुधांजनं दृष्टः, प्रारब्धा यः श्रुताम्बुधेः ॥ ३२ ॥ निशम्य तन्मुखाख्यातं, धर्मं दुःखविमोक्षणम् । दीक्षा कक्षीकृता मंक्षु, तेन
मोक्षसुखप्रदा ॥ ३३ ॥ अधीत्यैकादशांगानि, किंचित्पूर्वगतं तथा । मृत्वा मासैकभक्तेन, सौधर्मे त्रिदशोऽभवत् ॥ ३४ ॥ ततश्च्यु-
त्वा स जज्ञेऽहं, राजपुत्रोऽधुना पुनः । त्वत्तः श्रुत्वा नमस्कारं, बुद्धोऽहं जगृहे व्रतम् ॥ ३५ ॥ कथयित्वेति वृत्तान्तं, विजह्रेऽन्यत्र
यत्यसौ । समुत्पन्नावधिज्ञानो, माकन्द्यां पुनरीयिवान् ॥ ३६ ॥ तत्रायातं च तं ज्ञात्वा, स्कन्दभ्रातृयुतो ययौ । शिवभूतिर्नमस्कर्तुं,
नृपाद्या अपि भक्तितः ॥ ३७ ॥ नत्वा तेषूपविष्टेषु, तत्रागात्कोऽपि पूरुषः । गाढं यष्टौ विलग्नोऽथ, गुरून्नत्वेति पृष्टवान् ॥ ३८ ॥
यौवनेऽपि कुतो हेतोर्गतिभंगो मम प्रभो ! । गुरुरूचे पुराऽभूस्त्वमिहैव भरतावनौ ॥ ३९ ॥ कालिंजरनगासन्नदेशान्तर्वासिबल्लवः ।
आगाश्चारयितुं गास्त्वं, वैश्वदेवाभिधोऽन्यदा ॥ ४० ॥ निकुंजान्तर्गतं दृष्ट्वा, तत्रर्षिं प्रतिमास्थितम् । मत्वा बिभीषिकां क्षिप्रं,
ततो नंष्ट्वाऽगमद् गृहम् ॥ ४१ ॥ एवं दिने द्वितीयेऽपि, तृतीयेऽपि तथैव तम् । दृष्ट्वा शनैः शनैस्तत्र, गत्वा नत्वाऽब्रवीदिदम्
॥ ४२ ॥ किं त्वया स्थीयते नित्यं ?, निश्चलेनाथ सोऽभ्यधात् । संलीनतैव भोः ! श्रेष्ठा, विना कार्यं यतेरपि ॥ ४३ ॥ तप्तायो-
गोलकल्पस्य, स्वशक्त्या गृहिणः पुनः । गतिर्नियंत्रितुं युक्ता, कृपालोः सर्वदिक्ष्वपि ॥ ४४ ॥ ह्रैधंत्रैधादिना येन, दिग्व्रतं शिश्रि-
येऽङ्गिना । चराचराणां जीवानां, तेनाभयमनुष्ठितम् ॥ ४५ ॥ तेनोर्ध्वदिक्प्रमाणातिक्रमाद्याः पंच दोषकाः । परित्याज्याः सदा
देहभंगाद्यसुखहेतवः ॥४६॥ श्रुत्वेत्यवद्यभीतेन, गृहीतं दिग्व्रतं तदा । त्वयाऽतिचरितं पश्चात्, प्रमादादसकृत् पुनः ॥४७॥ मृत्वा
ततः कुदेवत्वं, प्राप्य च्युत्वाऽऽगतोऽपि च । अथोत्तमकुले जातोऽपीदृक् तेनार्ह ! मा भवः (अतीचारी)॥४८॥जातजातिस्मृतिः सोऽथ,
पुमांस्तस्य गुरोः पुरः । प्रपद्य दिग्व्रतं भूयोऽप्यगान्नत्वा यथागतम् ॥ ४९ ॥ शिवभूतिरपि स्कन्दयुतो दिग्व्रतमाश्रयत् । देवपाल-

षिरन्यत्र, विहर्तुमगमत्ततः ॥५०॥ अन्यदा वित्तहीनौ तौ, पृथक् पृथग् बभूवतुः । व्यवहर्तुं गतौ दैवयोगाद् द्रविडनीवृतिम्॥५१॥ शिवभूतिस्ततस्तस्थौ, तत्सीमन्यतिचारभिः। लोभाभिभूतः स्कन्दस्तु, पुरोऽगात्सार्थसंयुतः ॥ ५२ ॥ भिल्लैर्लुटितसर्वस्वो, निवृत्यागाद् गृहेऽथ सः । स्वपण्यं शिवभूतिस्तु, व्यक्रीणीत महार्घकम् ॥ ५३ ॥ समर्घं प्रतिपण्यं च, क्रीत्वा स्वगृहमागतः । लेभे लाभं स भूयांसं, तथा श्लाघां गरीयसीम् ॥ ५४ ॥ चरित्वाऽऽचरितं धर्मं, स्वर्गादिसुखभागभूत् । इहामुत्रापि दुःख्येव, स्कन्दस्तु व्रतखण्डनात् । ॥ ५५ ॥ दिग्व्रतमेवं भव्यजनौघाः, प्राणिगणैकत्राणविधायि । सम्यगवेत्य स्वच्छमनस्कास्तत्र सदा यत्नं प्रकुरुध्वम् ॥ ५६ ॥ (रुक्मवती) षष्ठव्रते भ्रातृद्वयकथा ॥ १९ ॥ साम्प्रतं द्वितीयं गुणव्रतं, तच्च द्विधा-भोगतः कर्मतश्च, भोगोऽपि द्विधा-उपभोगपरिभोगभेदात्, तत्र उप इति सकृद्भोगः- आहारमाल्यादेरासेवनमुपभोगः, परीत्यसकृद् भोगो- भवनांगनादीनामासेवनं परिभोगः, तत्र गाथामाह—

**मज्जंमि य मंसंमि अ, पुप्फे अ फले अ गंधमल्ले अ । उवभोगपरीभोगे, बीयंमि गुणव्वए निंदे ॥२०॥**

श्रावकेण तावदुत्सर्गतः प्रासुकैषणीयाहारिणा भाव्यं, असति अचित्ताहारिणा, तदसति बहुसावद्यान् मद्यादीन् वर्जयित्वा प्रत्येकमिश्रादीनां कृतप्रमाणेन भवितव्यं, भणितं च- "निरवज्जाहारेणं १ निज्जीवेणं २ परित्तमीसेणं ३ । अत्ताणुसंधणपरा, सुसावगा एरिसा हुंति ॥ १ ॥" (ग्रन्थाग्रम् २०००) तत्र मद्यं-मदिरा, अस्य च प्रथममुपन्यासो बहुदोषाश्रयत्वात् , यदाहुः—"गुरुमोहकलहनिद्दापरिभवउवहासरोसमयहेऊ । मज्जं दुग्गइमूलं, हिरिसिरिमइधम्मनासकरं ॥ १ ॥"तथा मांसं-पिशितं, एतदपि निन्द्यमेव, यदुक्तं—"पंचिंदियवहभूयं, मंसं दुग्गंधमसुइ बीभच्छं । रक्खसपरितुलियभक्खगमामयजणयं कुगइमूलं ॥ १ ॥" चशब्दाच्छेषाभ-

क्ष्यद्रव्याणामनन्तकायादीनां च परिग्रहः, तानि पंचोदुम्बर्यादीनि, पुष्पाणि-करीरमधूकादिकुसुमानि, चशब्दात् त्रससंसक्तपत्रादिपरिग्रहः, **फलानि**-जम्बूबिल्वादीनि, एषु च मद्यादिषु राजव्यापारादौ वर्त्तमानेन यत्किंचित्क्रापणादि कृतं तस्मिन्, एतैरन्तर्भोगः सूचितः, बहिस्त्वयं–'**गंधमल्ले य**' त्ति गन्धा-वासाः माल्यानि-पुष्पस्रजः, अत्रोपलक्षणत्वाच्छेषभोग्यवस्तुपरिग्रहः, (इत्येवं)रूपे उपभोगपरिभोगाख्ये द्वितीये गुणव्रतेऽनाभोगादिना यदतिक्रान्तं तन्निन्दामि ॥ अत्र भोगतोऽतिचारप्रतिक्रमणायाह–

**सच्चित्ते पडिबद्धे, अपोलदुप्पोलिअं च आहारे। तुच्छोसहिभक्खणया पडिक्कमे देसिअं सव्वं ॥ २१ ॥**

'**सचित्ते**'त्ति कृतसचित्तप्रत्याख्यानस्य कृततत्परिमाणस्य वा सच्चित्तमतिरिक्तमनाभोगादिनाऽभ्यवहरतः सच्चित्ताहारोऽतिचारः १ एवं वृक्षस्थं गुन्दादि राजादनादि वा सास्थिकं फलं मुखे प्राक्षिपतः **सचित्तप्रतिबद्धाहारः** २ **एवमपक्वस्य**-अग्निनाऽसंस्कृतस्यापरिणतकणिक्कादेर्भक्षणमपक्वौषधिभक्षणात् ३ एवं **दुष्पक्वस्य** पृथुकादेर्दुष्पक्वौषधिभक्षणतः४ तुच्छाः तृप्त्यहेतुत्वादसारा **औषधीः** कोमलमुद्गशिंगादिका भक्षयतस्तुच्छौषधेर्भक्षणात् ५ एतद्विषये **पडिक्कमे** इत्यादि प्राग्वत् ॥ २२ ॥ अत्र च व्रते भोगोपभोगोत्पादकानि बहुसावद्यानि कर्मतोऽगारकर्मादीनि पंचदश कर्मादानानि तीव्रकर्मोपादानानि श्रावकेण ज्ञेयानि, नतु समाचरणीयानि, अतस्तेषु यदनाभोगादिनाऽऽचरितं तत्प्रतिक्रमणायाह—

**इंगाली वणसाडी, भाडी फोडी सुवज्जए कम्मं। वाणिज्जं चेव य दंतलक्खरसकेसविसाविसयं ॥ २२ ॥**
**एवं खु जंतपीलणकम्मं निल्लंछणं च दवदाणं। सरदहतलायसोसं, असईपोसं च वज्जिज्जा ॥ २३ ॥**

'**इंगाली**'ति अंगारकर्म-अंगारकरणं, एवमन्यदपि वह्निसमारंभेण यज्जीवनं तदंगारजीविका १ एवं वनकर्मादीन्यपि वाच्यानि,

अत्रैताः गाथाः- इंगालविक्कयं इट्टवायकुम्भारलोहगाराणं । सोनारभाडभुंजाइआण कंमं तमिंगाली ॥ १ ॥ फुल्लफलपत्ततणकट्ठपणियकंदाइआण विक्किणणं । आरामकाच्छियाकरणयं च वणकम्ममाहंसु ॥ २ ॥ सगडाणं घडणघडावणेण तव्विकएण जा वित्ती । तं सागडियं कम्मं, तदंगविक्किणणमवि नेअं ॥ ३ ॥ नियएणुवगरणेणं, परकीयं भाडएण जो वहइ । तं भाडकम्ममहवा, वसहाइसमप्पणाऽन्नेसिं ॥ ४ ॥ जवचणयगोहुममुग्गमासकरडिप्पभिईण धन्नाणं । सत्तुअदालीकांगिकतंदुलकरणा य फोडणयं ॥ ५ ॥ अहवा फोडीकम्मं, सीरेणं भूमिफोडणं जं तु । सिलउट्टणउट्टन्तं, खणणं लवणागराईणं ॥ ६ ॥ नहदंतचम्मखल्ला, भरियकवाडा य सिप्पसंखा य । कत्थूरिपूयवसामाइयं च इह दन्तवाणिज्जं ॥ ७ ॥ लक्खाधाहाडिगुलिआमणसिलहरियालवज्जलेवाणं । विक्किणण लक्खवणियं, तुयरियसक्कुरडमाईणं ॥ ८ ॥ महुमज्जमंसमक्खण, चउण्ह विगईण जमिह विक्किणणं । रसवाणिज्जं तह दुद्धतिल्लघयदहिअपभिईणं ॥ ९ ॥ मणुयाणं तिरियाणं, विक्किणणं इत्थ अन्नदेसे वा । केसवणिज्जं भन्नइ, गोगद्दहअस्समाईणं ॥ १० ॥ विसवाणिज्जं भन्नइ, विसलोहप्पहरणाण विक्किणणं । धणुहसरखग्गछुरियापरसुअकुद्दालियाईणं ॥ ११ ॥ सिलउक्खलमुसलघरट्टकंकयाईण जमिह विक्किणणं । इच्छुतिलपीलणं वा, तं बिन्ती जंतपीलणयं ॥ १२ ॥ कन्नाणं फालणं नासवेह वद्धियय डंभणं तिरिसु । कंबलपुच्छच्छेयणपभिइ निल्लंछणं भणियं ॥ १३ ॥ वणदवदाणमरण्णे, दवग्गिदाणं च जीववहजणयं । सरदहतलायसोसो, बहुजलयरजीवखयकारी ॥ १४ ॥ मज्जारमोरमक्कडकुक्कुडसालहियकुक्कुराईणं । दुट्ठित्थिनपुंसाईण, पोसणं असइपोसणयं ॥ १५ ॥

सूत्रे च एवंखुशब्दौ गाथापर्यन्ते सम्बध्येते, ततश्चैवंप्रकाराणि खरकर्माणि गुप्तिपालादीनि च खु निश्चयेन सुश्रावको वर्जयतीति, अत्र भोगतः कर्मतश्च पितापुत्रयोर्ज्ञातम्–

कुरुदेशावतंसेऽभून्नगरे हस्तिनापुरे । महेभ्यो मेघ इत्याख्यो, मेघवज्जनताप्रियः ॥ १ ॥ देवकीति प्रिया तस्य, तनयः सुप्रभाभिधः। मेघः कुसुमखण्डेऽगात् , उद्याने रन्तुमन्यदा ॥ २ ॥ श्रीदेनाभ्यर्च्यमानांह्रिं,दृष्ट्वैकं तत्र कुष्ठिनम् । मुनिं ननाम यावत्तं, श्रीदस्तावत्तिरोदधे ॥ ३ ॥ मेघोऽप्राक्षीन्नमन्ति त्वां, ये ते स्युर्नीरुजः प्रभो ! । स्वयं तादृग्रुजाक्रान्तस्तदत्र किमु कारणम् ? ॥ ४ ॥ मुनिराख्यदवश्यं नो, नाशोऽस्ति कृतकर्मणाम् । प्राक्कृतं दुष्कृतं तन्मे, मेघानघमनाः शृणु ॥ ५ ॥ मगधेषु पुरा जज्ञे, पुरे राजगृहाभिधे । श्रेष्ठिनः कुरुचन्द्रस्य, नन्दनो मधुसूदनः ॥ ६ ॥ आगादव्यक्तलिंगयेको,भिक्षार्थं तद्गृहेऽन्यदा । ढौकितानि विरूढानि, तेन तस्य ततो मुदा ॥ ७ ॥ निषिध्य तानि निर्गच्छंस्तेन पृष्टोऽथ लिंगयसौ । किं नाग्रहीरिमानि त्वं ?, किं वा व्रतमशिश्रियः ? ॥ ८ ॥ अयं महाप्रबन्धोऽस्तीत्युक्त्वाऽसौ निर्गतस्ततः । अपराह्णे पुनर्गत्वा, तेन पृष्टोऽथ सोऽब्रवीत् ॥ ९ ॥ प्रव्रज्यां जगृहे पूर्वं, सूत्रार्थौ च मया ततः । पश्चात्पर्यत्यजं तां धिक्, परीषहपराजितः ॥ १० ॥ अव्यक्तलिंगभृद्बिभ्रच्छ्रावकद्वादशव्रतीम् । सिद्धपुत्र इति ख्यातोऽहं भोः समयभाषया ॥ ११ ॥ निषिद्धानि विरूढानि, यत्तु तत्कारणं शृणु । अस्ति भोगोपभोगाख्यं, सप्तमं गृहिणां व्रतम् ॥ १५ ॥ द्वाविंशतिरभक्ष्याणि, द्वात्रिंशदपि तत्र च । त्याज्यान्यनन्तकायानि, जन्तुमिश्रफलानि च ॥ १३ ॥ कार्यं शेषेषु संख्यानं, फलमस्यांगिनां पुनः । सर्वभोगांगसामग्री, पुष्कला स्याद्भवे भवे ॥ १४ ॥ त्याज्या दोषास्तु पंचास्मिन्, सच्चित्ताहारतादयः। घोररोगप्रदाः सर्वभोगविघ्नकृतः सदा॥ १५ ॥तस्मादनन्तकायान्तर्गतत्वात्पापभीरुणा। गृहीतानि विरूढानि, न मया मधुसूदन ! ॥ १६ ॥ श्रुत्वेत्यादत्त तत्पार्श्वे, स श्रेष्ठी सप्तमं व्रतम् । म्लेच्छैरुत्पाट्य नीतोऽसावन्यदाऽनार्यभूमिषु ॥ १७ ॥ अनार्यसंगतस्तत्रातिचर्य बहुशो व्रतम् । व्यन्तरेषु सुरोऽथाभूत्, मृत्वा स मधुसूदनः ॥ १८ ॥ आयुःक्षये ततश्च्युत्वा, विशालायां

महाश्रियः । सोऽहं पुरुषदत्ताख्यो, विजयस्यात्मजोऽभवम् ॥ १९ ॥ तेन व्रतातिचारेण, रोगोऽयं मेऽभवत्पुनः । अद्राक्षमन्यदोद्याने, केवलज्ञानिनं मुनिम् ॥ २० ॥ तत्पार्श्वे प्राग्भवं श्रुत्वा, स्मृत्वाऽऽत्मकृतदुष्कृतम् । निष्क्रान्तस्तादिदं मेऽघं, मेघ! व्याधिनिबन्धनम् ॥ २१ ॥ श्रेष्ठी श्रुत्वेति तत्पार्श्वे, भववैराग्यभृद् भृशम् । सप्तमं व्रतमादत्त, देवकीसुप्रभान्वितः ॥ २२ ॥ मेघोऽथ सपरीवारस्तं प्रणम्य महामुनिम् । धन्यंमन्यो ययौ गेहं, मुनिस्त्वन्यत्र सोऽगमत् ॥ २३ ॥ कियत्काले गतेऽनन्तभवाभ्यस्तप्रमादतः । साधुसाधर्मिकाणां च, संसर्गाभावतोऽपि च ॥ २४ ॥ तथा च गुरुकर्मत्वाद्देवकीसुप्रभौ भृशम् । शैथिल्यं चक्रतुः पूजानुष्ठाने निरतावपि ॥ २५ ॥ ततो मेघोऽभ्यधादेतौ, किमेवं भोः प्रमादिनौ ? । वरं विषं वरं वैरी, न त्वेषोऽनन्तदुःखकृत् ॥ २६ ॥ शिक्षितावपि तावेवं, ज्ञात्वा प्राग्वत्प्रमद्वरौ । श्रेष्ठी श्रेष्ठतमं धर्मं, विशेषेण व्यधत्त सः ॥ २७ ॥ तस्येर्ष्यया तु तौ धर्मे, प्रमाद्यन्तौ विशेषतः । वीक्ष्य श्रेष्ठी विषण्णात्मा, व्यरांक्षीद् गृहवासतः ॥ २८ ॥ किंचिच्छम्बलमादाय, तीर्थयात्रामिषात्ततः । निर्गत्य भुवनं भ्राम्यन्नमस्यंस्तीर्थभूमिकाः ॥ २९ ॥ ततो निरंकुशौ तौ तु, ववृताते धनान्धितौ । सर्वत्र यतनामुक्तौ, निःशंकौ खरकर्मसु॥३०॥ गृहसारेऽन्यदा दासभेदेन परमोषिभिः । मुषिते सुप्रभो गत्वा, राज्ञोऽग्रे तदचीकथत् ॥ ३१ ॥ राजाप्यारक्षकं प्रोचे, रे रे कोऽयमुपद्रवः ? । सोऽप्यूचे नास्ति गन्धोऽपि, चौरस्यान्यत् किमुच्यते ? ॥ ३२ ॥ राजाऽऽख्यत्तर्हि रेऽमुष्य, तातेनामोषि किं गृहम् ? । सोऽप्यूचे घटतेऽदोऽपि, मेलो नास्त्यनयोर्यतः ॥ ३३ ॥ श्रेष्ठ्यूचे स्तोकमेवैतत्त्वया तलवरेण भोः । आक्षिप्यारक्षकोऽप्याख्यत्तर्हि त्वं लाहि मे पदम् ॥ ३४ ॥ सुप्रभोऽथ स्फुरत्कोपः, प्रोचे यद्यस्मि कोऽप्यहम् । नूनमेवं करिष्ये तन्मा त्वरिष्ठास्त्वमत्र भोः ॥ ३५ ॥ इत्यहंकारपूर्णात्मा, प्रभूतप्राभृतान्वितः । उपतस्थौ पदाकांक्षी, सुप्रभः पृथिवीपतिम् ॥ ३६ ॥ वितीर्णे तत् नृपेणास्मै, ततःप्रभृति

सुप्रभः । निस्त्रिंशः सर्वकार्येषु, प्रावर्त्तत कृतान्तवत् ॥ ३७ ॥ चौरैर्विदिततद्वृत्तैः, किं करिष्यत्यसौ वणिक् ? । विचिन्त्येति गृहे रात्रौ, प्रविश्यासौ हतस्ततः ॥ ३८ ॥ देवक्यपि ततः शोकाद्विरक्ता धर्मतोऽधिकम् । कृतं विघ्नकृताऽनेन, धर्मेणेति निनिन्द तम् ॥ ३९ ॥ तस्या निश्यन्यदाऽश्नन्त्या, गच्छतोपरि भोगिना । मुक्तेन गरलेनैषा, विपेदे ताद्विषार्दिता ॥ ४० ॥ ततो देशान्तरस्थस्य, मेघस्य श्रेष्ठिनोऽन्यदा । ज्ञापिते ज्ञातिभिस्तस्मिन्, वृत्तान्तेऽसौ व्यचिन्तयत् ॥ ४१ ॥ हहा धर्मप्रमादोऽयमिहैवानेकदुःखकृत् । प्रमादहेतुनाऽनेन, गृहवासेन मे कृतम् ॥ ४२ ॥ मेघोऽनघमतिर्ध्यात्वा, गत्वा गुर्वन्तिके ततः। दीक्षां कक्षीकरोति स्म, दक्षो मोक्षसुखावहाम् ॥ ४३ ॥ अघौघरहितो मेघस्ततोऽसौ प्राप सद्गतिम् । देवकीसुप्रभौ तौ तु, भ्रमतुर्भवमेव हि ॥ ४४ ॥ इति सुनिपुणं ज्ञात्वा भोगव्रतस्य विराधनाप्रभवमसमं दुःखव्रातं चतुर्गतिके भवे । तदिह सततं भोगासंगं विवर्जयतादरात्, भवतः सुखिनो येनामुष्मिन्निहापि विवेकिनः ॥ ४५ ॥ (हरिणी) भोगव्रते मेघकथा ॥ २३ ॥ साम्प्रतमनर्थदण्डाख्यं तृतीयं गुणव्रतं, तत्रार्थो-देहस्वजनादीनां कार्यं तदभावोऽनर्थः, ततः प्राणी निष्प्रयोजनं पुण्यधनापहारेण दण्ड्यते पापकर्म्मणा विलुप्यते येन सोऽपध्यानाचरितादिकश्चतुर्द्धाऽनर्थदण्डस्तस्य मुहूर्त्तादिकालावधिना निषेधोऽनर्थदण्डव्रतं, तत्र पापध्यानाचरितं यथा-'वैरिव्रजोद्धन्धवधव्यथादेर्विद्याधरेन्द्रत्वनरेन्द्रतादेः । रौद्रार्त्तभावाकुलितस्य चिन्ताऽपध्यानमेतन्निगदन्ति तज्ज्ञाः ॥ १ ॥' पापोपदेशो यथा-- 'हुतभुजमिह देहि क्षेत्रभागे हयानां, कुरु वृषणविनाशं मुंच सस्येषु कुल्याम् । दमय वृषभवृन्दं घातय प्रत्यनीकानिति दिशति विवेकी को हि पापोपदेशम् ? ॥ १ ॥ हिंस्रप्रदानप्रमादाचरिते तु बहुसावद्यत्वात्साक्षात्सूत्रकृदेव द्विसूत्र्याऽऽह—

**सत्थग्गिमुसलजंतगतणकट्ठेमंतमूलभेसज्जे । दिन्ने दवाविए वा, पडिक्कमे देसिअं सव्वं ॥ २४ ॥**

**ण्हाणुव्वट्टणवण्णगविलेवणे सद्दरूवरसगंधे। वत्थासणआभरणे, पडिक्कमे देसिअं सव्वं ॥ २५ ॥**

शस्त्राग्निमुशलानि प्रतीतानि, यन्त्रकं- गन्त्र्यादि, तृणं व्रणकृमिशोधनं बहुकरी वा, काष्ठम्- अरघट्टयष्ट्यादि मन्त्रो-विषापहारादि, मूलं-नागदमन्यादि ज्वराद्युपशमनमूलिका वा गर्भशातनादि वा मूलकर्म भैषजं- सांयोगिकं द्रव्यमुच्चाटनादिहेतुः, एतच्छस्त्रादि प्रभूतभूतसंघातहेतुभूतं दाक्षिण्याद्यभावेऽन्येभ्यो यद्दत्तं दापितं वा तस्य पडिक्कमे इत्यादि प्रागवत्। स्नानम्-अभ्यङ्गपूर्वकं अङ्गप्रक्षालनं, तच्चायतनया त्रससंसक्तभूम्यां संपातिमसत्त्वाकुले वा काले वस्त्रापूतजलेन यत्कृतं, उद्वर्त्तनं-संसक्तचूर्णादिभिः, उद्वर्त्तनिकाश्च न भस्मनि क्षिप्ताः, ततस्ताः कीटिकाकुलाः श्वादिभिर्भक्ष्यन्ते पादैर्वा मृद्यन्ते, वर्णकः-कस्तूरिकादिः,विलेपनं-कुंकुमचन्दनादि, एतस्मिंश्च सम्पातिमसत्त्वाद्ययतनया कृते, शब्दो वेणुवीणादीनां कौतुकेन श्रुतः, शब्दो वा निश्युच्चैःस्वरेण कृतस्तत्र 'आउज्जोअणवणिए' इत्याद्यधिकरणं यदभूत्, रूपाणि नाटकादौ निरीक्षितानि, रसोऽन्येषामपि तद्गृद्धिहेतुर्वर्णितः, एवं गन्धादीन्यपि, अत्र विषयग्रहणात्तज्जातीयप्रमादस्य पञ्चविधस्यापि ग्रहः,यद्वाऽऽलस्येन तैलादिभाजनास्थगनं प्रमादाचरित्तं, तस्मिंश्च पडिक्कमे इत्यादि प्राग्वत्। अत्रातिचारप्रतिक्रमणायाह—

**कंदप्पे कुक्कुइए, मोहरि अहिगरण भोगअइरित्ते। दंडंमि अणट्ठाए, तइअंमि गुणव्वए निंदे ॥ २६ ॥**

कंदर्प्पो-मोहोद्दीपकं हास्यं १ कौकुच्यं-नेत्रादिविक्रियागर्भं हास्यजनकं विटचेष्टितं २ मौखर्यं-असम्बद्धबहुभाषित्वं ३ 'अधिकरण'त्ति संयुक्ताधिरणता, तत्राधिक्रियते नरकादिष्वात्माऽनेनेत्यधिकरणं- मुशलोदूखलादिकं संयुक्तं-तत्तत्क्रियायां प्रगुणीकृतं तच्च तदधिकरणं च४ तद्भावः संयुक्ताधिकरणता, इह विवेकिना संयुक्तं गन्त्र्यादि न धारणीयं, तद् दृष्ट्वा जनो गृह्णन्न निवारयितुं

शक्यते, वियुक्ते तु स्वत एव निवारितः स्यात्, 'भोगअइरित्ते'त्ति भोगपरिभोगातिरिक्तता, तदाधिक्यकरणे ह्यन्येऽपि तत्तैलामलकादि याचित्वा स्नानादौ प्रवर्तन्ते, 'दण्डंमि अणट्ठाए'त्ति अनर्थदण्डाख्ये, तइयंमीत्यादि प्राग्वत् ॥ अत्र चित्रगुप्तकथेयम्—



बभूव कोशलापुर्यां, भूपतिर्जयशेखरः। प्रिया मनोरमा तस्य, मनोरमगुणान्विता ॥ १ ॥ पुरुषदत्तपुरुषसिंहाख्यौ च तयोः सुतौ। तथा समस्तशास्त्रज्ञो, वसुनामा पुरोहितः ॥ २ ॥ तत्पुत्रश्चित्रगुप्ताख्यः, केलिकौतूहलप्रियः। स्वस्वस्थित्या कियत्कालं, ते सर्वेऽप्यतिचक्रमुः ॥३॥ सभाऽऽसीनोऽन्यदा राजाऽकस्माद्वातप्रकोपतः। प्रादुर्भूतेन शूलेन, पञ्चत्वं[1] प्राप तत्क्षणात् ॥ ४ ॥ तत्पुत्रौ सपरीवारौ, शोकशंकु[2]निपीडितौ। अकार्ष्टामग्निसंस्कारं, क्रन्दन्तौ नृपवर्ष्मणः[3] ॥ ५ ॥ ततो ज्येष्ठसुतो राज्येऽनिच्छन्नपि निवेशितः। यौवराज्ये कनिष्ठस्तु, मन्त्रिभिः कथमप्यसौ ॥ ६ ॥ राजा पुरुषदत्तोऽथ, स्मरन्निजपितुर्मृतिम्। शोकाक्रान्तमतिः प्रोचे, सदस्येवं[4] पुरोहितम् ॥ ७ ॥ मत्पितुर्योपकाराय, नाभून्मृत्युगतस्य हि। सुमहत्याऽपि तत्कार्यं, किं मे राज्यश्रियाऽनया ? ॥ ८ ॥ वसुर्वे-सुमतीनाथं, ततः प्रोचे पुरोहितः। देयं स्वर्णादि पुत्रेण, स्वपितुः श्रेयसे यतः ॥ ९ ॥ पुत्रदत्तं पिताऽऽप्नोतीत्येवं हि गदितं श्रुतौ[5]। अनेनैव हि कार्येण[6], प्रार्थ्यते तनयो[7] जनैः ॥ १० ॥ ततः पाखण्डिनः सर्वांस्तेनाहाप्य नृपः स्वयम्। तेभ्यो रैरूप्यगोऽयो[8]भूति[9]-लकर्पासकाद्यदात् ॥ ११ ॥ सीमन्धरगुरुं दृष्ट्वा, तमप्यानाय्य भूपतिः। न्यमन्त्रयत हेमाद्यैर्गीतार्थः सोऽब्रवीदिदम् ॥ १२ ॥ वदान्य[11] ! दानमेतत्ते, सर्वथाऽभयसत्रिणाम्[12]। जीवघातकृदादातुं, युज्यते न चरित्रिणाम् ॥ १३ ॥ तथाहि येन जायन्ते, क्रोधलो-



१ मृत्युं २ शल्यं ३ शरीरस्य ४ सभायां ५ वेदे ६ प्रयोजनेन ७ पुत्रः ८ द्रव्यं ९ लोहः १० क्षेत्रादि ११ दानी १२ दानशालावतां

भादयो भृशम् । स्वर्णरूप्यं न तद्देयं, चरित्रिभ्यश्चरित्रहृत् ॥ १४ ॥ याऽमेध्यमत्ति भृंगाद्यैर्हन्ति जन्तूनपि स्वकम् । वृषस्यति[1] सुतं तस्या, गोर्दानं श्रेयसे कथम् ? ॥ १५ ॥ कृतायोगोत्वसंकल्पाद्रूैरूप्याज्य[2]तिलैस्ततः । दीयते खण्डशः कृत्वा, तद्दानस्य तु का कथा ? ॥ १६ ॥ यस्यांशेनापि निष्पन्नैः, शस्त्रैराराादिकैर्हतः । देही दोदूयते तत्को, लोहं दद्याद्विचक्षणः ? ॥ १७ ॥ यस्यां विदार्यमाणायां, म्रियन्ते जन्तवः क्षितौ । योषितीव सगर्भायां, कथं तद्दानमिष्यते ? ॥ १८ ॥ तिलेषु येषु दृश्यन्ते, त्रसाः संख्यातिगाः सदा । तद्दानं कोऽनुमन्येत, मनुष्यश्चेन्न चाक्रिकः[3]? ॥१९॥ सर्वारम्भनिवृत्तानां, मुनीनां बीजघट्टनात् । ध्यानविघ्नाच्च नो दानं, कर्प्पासादिगतं मतम् ॥२०॥ किञ्चान्यन्निपुणं राजन् !, विचिन्तय सचेतनः । अपरेण कृते नान्यः,फलं प्राप्नोति तद्यथा ॥२१॥ एकस्मिन् भुक्तवत्यन्यः, साक्षादपि न तृप्यति । मृतस्य कल्प्यते यत्तु, तद्भस्मनिहुतोपमम्[4] ॥ २२ ॥ समग्रमपि तत्कर्म, कर्त्तारमनु[5]वर्त्तते । अन्यथा कृतनाशः स्यादकृताभ्यागमोऽपि च ॥ २३ ॥ श्रुत्वेति नृपतिः प्रीतः, पुनः प्रोवाच तर्हि वः । किं किं प्रदीयते हन्त ?, सोऽथ सूरिवरोऽवदत् ॥ २४ ॥ द्विचत्वारिंशता दोषैरदुष्टं दानमुत्तमम् । अन्नपानोपधिप्रख्यम्[6]आख्यातं धर्मसाधनम् ॥ २५ ॥ श्रुत्वेति सहितो भ्रात्रा, समोदं मेदिनीपतिः । प्रभूतं वस्त्रपात्रादि, ढौकयामास भक्तिभाक् ॥ २६ ॥ किंचित्स्वल्पं समादाय, तच्छ्रद्धाभङ्गभीरुकः । भक्त्या नमस्कृतस्ताभ्यां, स सूरिः स्वाश्रयं ययौ ॥२७॥ राजाप्यनुजमूचेऽथ, मुनयोऽमी मुनिःस्पृहाः । परोपकारकर्त्तारः, करुणारससागराः ॥ २८ ॥ युक्तास्तत्त्वविदोऽस्माकं, तदेते पर्युपासितुम्[7] । सोऽप्यूचे युक्तमेवैतदधुनैव विधीयताम् ॥ २९ ॥ सीमन्धरगुरोः पार्श्वे, ततो राजाऽनुजान्वितः । गत्वा नत्वा च तं तत्र, निषण्णेऽस्मिन् गुरुर्जगौ ॥३०॥ परीक्ष्यते

---

१ मैथुनायेच्छति २ घृतं ३ तैलिकः ४ क्षारे क्षिप्तं यथा घृतं ५ अनुगच्छति ६ सदृशं ७ सेवितुं

यथा स्वर्णं, कषच्छित्तापताडनैः । दयाश्रुततपःशीलैर्धर्मोऽपि विदुषा तथा ॥ ३१ ॥ निशम्यैतन्मुनेर्वाक्यं, कुमारो व्रतकाम्यया। पार्श्वाद्भ्रातुश्च मातुश्च, कथञ्चित्स्वं व्यमोचयत् ॥ ३२ ॥ ततः पुरुषसिंहोऽसौ, राजपुत्रशतान्वितः । प्रव्रज्य तत्पुरात्सार्धं, विजह्रे गुरुणाऽन्यतः ॥ ३३ ॥ अधीयन् सूत्रमर्थं च, तपस्यन् दुस्तपं तपः । क्रमेण सोऽवधिज्ञानमाससाद दुरासदम् ॥ ३४ ॥ ततो ज्ञातिजनं द्रष्टुमाययौ कोशलापुरीम् । नृपोऽथागान्नमस्कर्त्तुमशेषोऽपि पुरीजनः ॥ ३५ ॥ तेषु नत्वोपविष्टेषु, धर्मे च मुनिनोदिते । प्रतिबुद्धः प्रवव्राज, तत्रैकः काष्ठभारिकः ॥ ३६ ॥ चित्रगुप्तो जजल्पैनं, पुरोहितसुतस्ततः । अकार्षीः साधु साध्वेतद्दत्तो दुःखजलाञ्जलिः ॥ ३७ ॥ विनापि सर्वव्यापारं, निश्चिन्तोऽन्नादि लप्स्यसे । मुक्तोऽसि राजवेष्ट्याद्यैरहो वेषविजृम्भितम् ॥ ३८ ॥ ज्ञात्वा ज्ञानेन तद्वृत्तं, गुरुरूचे न मुच्यते । अद्याप्यनर्थदण्डस्ते, यः पुराऽपि विडम्बकृत् ॥ ३९ ॥ चित्रगुप्तस्ततो भीतो, गुरून्नत्वाऽवदत्प्रभो ! । कीदृशोऽनर्थदण्डोऽयं ?, का मे वाऽस्माद्विडम्बना ? ॥ ४० ॥ सोऽप्याख्यद्येन नैव स्यात्कृतेनापि हि किञ्चन । देहस्वजनकार्यं सोऽनर्थदण्डः प्रकीर्तितः ॥ ४१ ॥ पापध्यानादिभिर्भेदैश्चतुर्द्धाऽसौ निगद्यते । चतुर्गतिगतात्युग्रदुःखसंदोहमन्दिरम् ॥ ४२ ॥ कन्दर्प्पाद्या व्रते चास्मिंस्त्याज्याः पञ्चातिचारकाः । भवे भवे कुयोनित्वकुशीलत्वादिदायिनः ॥ ४३ ॥ इत्युक्तोऽनर्थदण्डस्तेऽधुना शृणु विडम्बनाम् । पुराऽऽसीत् जिनदत्ताख्यः, श्रावको भद्दिले पुरे ॥ ४४ ॥ तस्य सेनाभिधो जज्ञे, तनयः शैशवेऽपि सः । जग्राह सुगुरोः पार्श्वे, श्रावकद्वादशव्रतीम् ॥ ४५ ॥ व्रतेच्छुं तं प्रसूर्ज्ञात्वा, विटगोष्ठ्यामचिक्षिपत् । ततः सोऽभूत्कुसंसर्गात्प्रमादस्य वशानुगः ॥ ४६ ॥ मैत्रीं व्यधात्समं राजतुकों राजविराधिना । कन्दर्प्पाद्यांश्च तत्संगात्पापध्यानादिकांस्तथा

१ पंडितेन २ इच्छया ३ दुःखं ४ समुदायस्थानं ५ पुत्रेण

॥ ४७ ॥ अन्येन केनचित्सार्द्धं, मन्त्रयामास राजसूः । जरन्तं[1] पितरं हत्वा, राज्यं किं नाशु[2] गृह्यते ! ॥ ४८ ॥ मन्त्री ज्ञात्वेति तं मन्त्रं[3], नृपायाख्यन्नृपोऽभ्यधात् । सचिवेद्दग्मतेर्दाता, वध्योऽयं प्राग वणिक्सुतः ॥ ४९ ॥ ततो नृपनरैर्बद्ध्वा, क्षिप्तोऽसौ गुप्तिवेश्मनि[4] । तत्कुटुम्बं विडम्ब्योच्चैस्तस्यैव पुरतो हतम् ॥ ५० ॥ दुःखार्त्तः सोऽपि मृत्वाऽऽद्ये, नरके नारकोऽभवत् । तस्मादुद्धृत्य तिर्यक्षु, हिण्डित्वैकं भवं ततः ॥ ५१ ॥ जातो भाण्डकुले तत्र, कन्दर्प्पादिपरो मृतः । व्यन्तरोऽजनि स च्युत्वाऽभूस्त्वं पुत्रः पुरोधसः ॥ ५२ ॥ तद्भोः पूर्वभवाभ्यासाच्चित्रगुप्ताधुनापि हि । केलीकिलत्वमेतत्तेऽनर्थदण्डस्य कारणम् ॥ ५३ ॥ चित्रगुप्तो निशम्येति, जातजातिस्मृतिस्ततः । भृशं भवभ्रमेर्भीतो, भ्रान्तिभीतोऽग्रहीत्तपः ॥ ५४ ॥ गुरुं प्रणम्य राजाद्या, धर्मं लात्वा विशेषतः । ययुः स्वस्थानमन्यत्र, विहर्तुं मुनयोऽपि ते ॥ ५५ ॥ चित्रगुप्तमुनिः सोऽथ, सार्थकं वाप्यनर्थकम् । मनोवाक्कायजं दण्डं, दुस्त्यजं सर्वथाऽत्यजत् ॥ ५६ ॥ मनोवाक्कायजं वीर्यं, ज्ञानाद्याचारगोचरम् । अनिगूह्य ततो जज्ञे, इहामुत्र सुखास्पदम् ॥ ५७ ॥ एवं ज्ञात्वा भविकजन[5]तेऽनर्थदण्डं सुधर्मद्रव्यादीनां क्षयकरमहानर्थसार्थैकहेतुम् । तस्मात्सर्वं परिहर तकं स्वीयशक्त्या सदैवाक्षार्म[6]क्षेमप्रचय[7]पदवी स्यात्करान्तर्गता यत् ॥५८॥(मन्दाक्रान्ता) अनर्थदण्डव्रते **चित्रगुप्तकथा** ॥२६॥ साम्प्रतं शिक्षाव्रतानि, तत्र प्रथमं सामायिकं, तत्स्वरूपं च प्रतीतं, तस्यातिचारप्रतिक्रमणायाह—

**तिविहे दुप्पणिहाणे, अणवट्ठाणे तहा सइविहूणे । सामाइअ वितहकए, पढमे सिक्खावए निंदे ॥ २७ ॥**

**त्रिविधं-त्रिप्रकारं, दुष्प्रणिधानं-**कृतसामायिकस्य मनोवाक्कायानां दुष्प्रयुक्तता, तत्र मनसा गृहादिव्यापारचिन्तनं १ वाचा

१ वृद्धं २ शीघ्रं ३ विचारं ४ कारागृहे ५ भव्यजनसमूहः ६ अक्षीणं ७ समूहः

सावद्यकर्कशादिभाषणं २ कायेनाप्रत्युपेक्षिताप्रमार्जितस्थण्डिलादौ निषदनादिविधानं ३ अनवस्थानं-सामायिककालावधेरपूरणं, यथाकथञ्चिद्वाऽनादृतस्य करणं, सामायिकं हि किल क्षणिकेन कर्त्तव्यं, आह चूर्णिकृत्-"जाहे खणिओ ताहे करेइ तो से न भज्ज-इत्ति' ४ तथा स्मृतिविहीनं-निद्रादिप्रमादाच्छून्यतयानुष्ठितं ५, एतानाश्रित्य सामायिके-प्रथमे शिक्षाव्रते वितथकृते-सम्यगननु-पालिते योऽतिचारस्तं निन्दामीति ॥ आह—अत्र द्विविधंत्रिविधेन प्रत्याख्याने मनसो रोद्धुमशक्यत्वात् दुष्प्रणिधानसंभवे सामायिकाभाव एव, प्रत्याख्यानभंगजं च प्रायश्चित्तं स्यात्, अतस्तत्प्रतिपत्तेरप्रतिपत्तिर्गरीयसी, नैवं, अत्र च मनसा न करोमी-त्यादीनि षट् प्रत्याख्यानानि, तथाऽनाभोगादिनैकतरभंगेऽपि शेषसद्भावान्न सर्वथा सामायिकाभावः,मनोदुष्प्रणिधाने च मिथ्यादु-ष्कृतेनैव शुद्धिभणनान्न तदप्रतिपत्तिः सुन्दरेति, यच्चाविधिकृताद्वरमकृतमिति वचनं तदप्यसमीचीनं, यदुक्तम्—"अविहिकया वरमकयं असूयवयणं भणंति समयण्णू। पायच्छित्तं जम्हा, अकए गरुयं कए लहुयं ॥ १ ॥" अत्र मेघरथकथेयम्—

रम्यमस्ति कलिंगेषु,पुरं नरपुराभिधम्। राजा जयरथस्तत्र,बभूव परमार्हतः॥१॥विजयेति प्रिया तस्य,तयोर्मेघरथः सुतः। चण्ड-मार्त्तण्ड[1]वत्प्रौढप्रतापाक्रान्तविष्टप[2]ः॥२॥नृपोऽन्यदा निजावासमध्यवर्तिजिनौकसि[3]। अर्चा[4]श्चक्रे जिनार्चायां, महाभक्तिर्महीयसीम्[5] ॥३॥ प्रारब्धेऽथ प्रबन्धेन[6],प्रधाने प्रेक्षण[7]क्षणे। द्वाःस्थे[8]नागत्य विज्ञप्तः,प्रणम्यैवं महीपतिः॥४॥ भावदेवाभिधः श्राद्धो,देव! द्वारेऽस्ति सम्प्रति। आयातस्तीर्थयात्रायां,युष्मच्चैत्यं विवन्दिषुः॥५॥राजाऽऽख्यद् द्रुतमेत्वेष,ततस्तेन प्रवेशितः। देवमभ्यर्च्य नत्वा च,श्राद्धोऽसौ नृपम-भ्यधात् ॥६॥ तीर्थे संमतशैले त्वं,पुण्डरीकोज्जयन्तयोः। अन्येष्वपि च चैत्येषु, देवान् वन्दस्व मद्गिरा ॥७॥ साधवस्ते प्रयच्छ-

---

१ सूर्यः २ जगत् ३ चैत्ये ४ मूर्त्तेः ५ महतीं ६ विस्तारेण ७ नृत्यावसरे ८ वेत्रिणा।

न्ति, धर्मलाभाशिषस्तथा। ववन्दे तांस्ततो राजा, भक्त्या भून्यस्तमस्तकः ॥८॥ भावदेवोऽभ्यधाद् भूयो, वन्दन्ते श्रावकाश्च ते। रञ्जितस्तद्विवेकेन, राजा तेभ्यो नमोऽकरोत् ॥ ९ ॥ नृपोऽथाख्यत्कियत्कालोऽभूद् गृहान्निर्गतस्य ते। सोऽप्यूचे द्वादशाब्दानि, ततो राजाऽब्रवीदिदम् ॥१०॥ धन्यस्त्वं येन तीर्थानि, भूरि दृष्टान्यहं पुनः। अधन्यो येन नाद्राक्षं, तीर्थमेकमप्यहो ॥११॥ सोऽवादीद्वन्दमानाःस्थः, सदा यूयं सदाशयात्। ततो भूयोऽभ्यधाद् भूपो, महत्तीर्थं किमुत्तमम्? ॥१२॥ सोऽप्यूचे यत्र संप्राप्ता, विंशतिस्तीर्थनायकाः। निर्वाणं तेन शैलोऽसौ, संमेतस्तीर्थमुत्तमम् ॥१३॥ भावदेवं ततो नीत्वा, राजा निजनिकेतने। भोजयित्वा च सत्कृत्य, वस्त्राद्यैर्व्यसृजत्ततः ॥१४॥ संमेतासन्नभूनाथान्, दूतेनाथेत्यबीभणत्। यदि राज्यापहारादिशङ्का काचिन्न वो हृदि ॥१५॥ ततो जयरथोऽभ्येति, संमेते वन्दितुं जिनान्। प्रत्यूचुस्तेऽपि राजा यत्कुर्यात् क्षिप्रं यथेप्सितम् ॥ १६ ॥ ततो जयरथो राजा, जयश्रीकुलमन्दिरम्। नगरे कारयामास, नरैराघोषणामिति ॥ १७ ॥ सम्मेततीर्थयात्रायां, राजा यास्यति तत्समम्। व्रजत्यन्योऽपि यः कश्चित्तस्य सर्वं करोत्यसौ ॥१८॥ अग्रेऽप्युत्कण्ठितो लोकः, प्रमोदापूर्णमानसः। तामाकर्ण्य विशेषेण, तत्क्षणात्प्रगुणोऽभवत् ॥ १९ ॥ कृत्वा मेघरथं राज्यरक्षकं निजनन्दनम्। प्राचालीदचलानाथश्चतुरङ्गबलान्वितः ॥ २० ॥ स्थाने स्थाने समं श्राद्धैश्चैत्येष्वर्चां गरीयसीम्। सृजन्नर्थिजनानां च, ददद्दानं महाद्भुतम् ॥ २१ ॥ सत्साधर्मिकवात्सल्यं, कुर्वन् वस्त्रासनादिभिः। तन्वानोऽभयदानं च, क्रमात्सम्मेतमासदत् ॥ २२ ॥ ततश्च सम्मुखायातदेवार्चकनरानुगः। आरोहत्सपरीवारस्तं शैलं नृपतिर्मुदा ॥ २३ ॥ जिनायतनमालोक्य, नृत्यति स्म दधत्तनौ। असंमान्तमिवानन्दं, रोमाञ्चव्याजतो बहिः ॥ २४ ॥ चैत्यान्तर्विधिवद्गत्वा, कृत्वा तिस्रः प्रदक्षिणाः। स्नपयित्वा

जिनानुच्चैरर्चयामास सादरः ॥ २५ ॥ दत्त्वा महाध्वजादींश्च, कृत्वा चाष्टाहिकोत्सवम् । ततश्चाशातनाभीरुरुत्ततार नृपो नगात् ॥ २६ ॥ देवार्चकं च सत्कृत्य, विसृज्य च ततोऽचलत् । सम्मुखं स्वपुरस्याथ, रुद्धोऽसौ भिल्लसेनया ॥ २७ ॥ श्रुत्वा मेघरथोऽप्येतत्, तत्रायासीत् द्रुतं ततः । ताभ्यां भग्नेऽथ संग्रामे, नंष्ट्वा भिल्लपतिर्ययौ ॥ २८ ॥ इतश्चास्वामिकं देशं, ज्ञात्वा प्रत्यन्तभूपतिः । जयपाल उपद्रोतुं, प्रावर्त्तत सुदुर्मतिः ॥ २९ ॥ ततो मेघरथस्तातं, विसृज्य स्वपुरं प्रति । अगात्तेन समं योद्धुं, युद्धैकरसिकः स्वयम् ॥ ३० ॥ युद्धे लग्ने च तं बद्ध्वा, लात्वा च स्वपुरं प्रति । प्रतस्थे द्राक् ततो मेघरथः सिद्धमनोरथः ॥ ३१ ॥ पुरे प्राप्तस्य राज्ञोऽथ, पौरैः कृतमहस्य सः । एत्य नत्वा च तं भूपं, मूर्त्तं जयमिवार्प्पयत् ॥ ३२ ॥ राज्ञा च तद्दिने तत्र, गुप्तिमोक्षः कृतस्ततः । मुक्तः सत्कृत्य देशाय, स्वस्मै सोऽथ व्यसृज्यत ॥ ३३ ॥ सूरिर्विजयघोषोऽथ, तत्रातिशयसूत्रभृत् । रम्ये कुसुमखण्डाख्ये, उद्याने समवासरत् ॥ ३४ ॥ राजाद्यास्तत्र गत्वाऽथ, नत्वा च तमुपाविशत् । तीर्थयात्राफलं सूरिप्रवरोऽथैवमूचिवान् ॥ ३५ ॥ तीर्थयात्रादिकां नित्यं, ये कुर्वन्ति प्रभावनाम् । तेषां हि तीर्थकृत्त्वादिपदवी न दवीयसी ॥ ३६ ॥ अथैनं वन्दितुं तत्राजग्मतुर्भ्रातरावुभौ । तत्रैकः सुभगो नीरुक्, सुरूपश्च सुपर्ववत् ॥ ३७ ॥ द्वितीयो दुर्भगो दीनः, कुरूपः पापपुञ्जवत् । श्वासकासज्वराद्युग्रषोडशामयमन्दिरम् ॥ ३८ ॥ गुरुस्ताभ्यां ववन्देऽसौ, ततः सूरिं सुरूपकः । पप्रच्छ किं पुरा चक्रेऽनेनात्रायं यदीदृशः? ॥ ३९ ॥ गुरुराख्यत् पुराऽभूतामिहैव क्षितिपात्मजौ । सोमसिंहाग्निसिंहाख्यावन्योऽन्यं स्नेहसंयुतौ ॥ ४० ॥ तयोर्ज्येष्ठः स्वभावेन, कृपालुः शान्तमानसः। कनिष्ठकस्तु निर्द्धर्म्मा, निर्दयो निष्ठुराशयः ॥ ४१ ॥ पापध्यादौ प्रवृत्तं तं, ज्येष्ठोऽभीक्ष्णं न्यषेधयत् । सोऽपि तं प्रत्युवाचैवं, धर्माधर्मकथा वृथा ॥ ४२ ॥ अयोग्योऽयमिति ज्ञात्वा, सोमसिंहस्ततोऽधिकम् । सहजोपशमाज्जीवदयादौ

सादरोऽभवत् ॥ ४३ ॥ मृत्वा कालेन सौधर्मे, देवोऽजनि ततश्च्युतः । अभूः स त्वमिहात्यन्तं, प्राक्साम्याद्रूपसौख्यभाक् ॥ ४४ ॥ अग्निसिंहस्त्वशान्तात्मा, मृत्वा भ्रान्त्वा च दुर्गतौ । कासश्वासादिरोगार्त्तः, स जज्ञेऽयं तवानुजः ॥ ४५ ॥ निशम्येत्यल्पकर्मत्वा-ज्जातजातिस्मृतिः स तु । परं संवेगमापन्नः,सुरूपः शिश्रिये व्रतम् ॥ ४६ ॥ सत्यमेतन्न वा सत्यमित्याशंकाऽऽकुलाशयः। द्वितीयो गुरुकर्मत्वान्निवृत्यागाद्यथागतम् ॥ ४७ ॥ अथ मेघरथोऽवोचत्, भविष्यामः कथं प्रभो ! । राज्यराष्ट्रादिसावद्यपंकमग्ना दिवानिशम् ? ॥ ४८ ॥ गुरुरूचे न किं जग्मुः, सामायिकजुषः खलु । चन्द्रावतंसकाद्यास्ते, भूपा अपि सुरालयम् ? ॥ ४९ ॥ ततो मेघरथोऽवादीदिदमाख्याहि मे व्रतम् । गुरुरूचे द्विधा ह्येतद् , देशसर्वविभेदतः ॥ ५० ॥ सर्वसामायिकं सर्वसावद्यत्यागतो भवेत् । यावज्जीवं तथा त्रैधं, त्रिविधेनानगारिणाम् ॥५१॥ देशसामायिकं यत्तु, तन्मुहूर्त्तमगारिणाम् । समतायां द्विधा त्रेधा, साध्यं शिक्षाव्रतं मतम् ॥ ५२ ॥ श्रावकोऽपि कृते चास्मिन्, यत्स्याच्छ्रमणवत्ततः । पुनः पुनरिदं कुर्यात्, क्षणिकस्तु यदा तदा ॥ ५३ ॥ मनोदुष्प्रणिधानाद्यास्त्याज्याः पंचातिचारकाः । कुरूपश्वासकासादितीव्रदुःखादिदायिनः ॥ ५४ ॥ ततो मेघरथो नत्वा, गुरुं प्रोवाच भक्तिभाक् । देशसामायिकं तावद्, साम्प्रतं देहि मे प्रभो ! ॥ ५५ ॥ ततस्तस्मै प्रदत्तं तद्, गुरुणापि यथाविधि । नृपादीनां पुनर्देशविरत्यादि विशेषतः ॥ ५६ ॥ राजपुत्रस्ततः सोऽथ, तत्रैत्य गुरुसन्निधौ । मत्वा स्वं क्षणिकं धीरोऽसकृत्सामायिकं व्यधात् ॥ ५७ ॥ जयपालोऽथ भूपालस्तामपभ्राजनां स्मरन् । हन्तुं मेघरथं प्रैषीद्, दुष्टाभिमतपूरुषान् ॥ ५८ ॥ कपटश्रावकीभूय, तेऽप्युद्याने ययुस्ततः । सामायिकव्रतस्थस्य, कुमारस्य वधैषिणः ॥ ५९ ॥ यामिकैः स्खलिता नैते, श्रावका इति ते ततः। कुमारं प्रत्यधावन्त, द्रुतं कृष्ट्वाऽसिपुत्रिकाम् ॥ ६० ॥ वीक्ष्य मेघरथोऽप्येतान्, घोराकारान् कृतान्तवत् । न चुकोप न चुक्षोभ,

धर्मध्यानैकनिश्चलः ॥ ६१ ॥ तत्सत्त्वतुष्टयोद्यानदेव्या ते स्तंभितास्ततः । सामायिकेऽथ संपूर्णे, कुमारस्तानवोचत ॥ ६२ ॥ किमेतदथ तेऽप्यूचुस्तं वृत्तान्तमशेषतः । कुमारोऽप्यभयं दत्त्वा, व्यसाक्षीत्तान्महामनाः ॥ ६३ ॥ विजहुर्गुरवोऽन्यत्र, कुमारोऽपि क्रमादसौ । संप्राप्य पैतृकं राज्यं, सद्धर्मं च चिरं व्यधात् ॥ ६४ ॥ विधायाराधनां सम्यग्, राजा मेघरथस्ततः । मृत्वा स्वर्गादिसौख्यानां, सद्भाजनमजायत ॥ ६५ ॥ एवं मेघरथस्य च वृत्तं, भो भो भव्यजना ! विनिशम्य । तत्सामायिकमादरवन्तो, भूयो भूय इह प्रकुरुध्वम् ॥ ६६ ॥ (उद्धृतम्) सामायिकव्रते मेघरथकथा ॥ २७ ॥

अधुना देशावकाशिकं, तत्र योजनशतादिना यावज्जीवं गृहीतादिग्व्रतस्य गृहशय्यास्थानादेः परतो गमनानिषेधरूपं पूर्वव्रतसंक्षेपकरणरूपं वा, यथा केनचिद्वरमांत्रिकेण पूर्वं द्वादशयोजनप्रमाणविषयव्यापकमाशीविषविषभृद्विषमदृग्विषप्रसरमपसारयता पश्चादीषत्क्षेत्रविषयेऽवस्थापितं यथा वा सर्वांगगतगरलमंगुल्येकदेशे तथैतदपि मुहूर्त्तादिकालावधिना आरम्भैकदेशेऽवकाशः- अवस्थानं तेन निर्वृत्तं देशावकाशिकं, यदुक्तं "एगमुहुत्तं दिवसं, रायं पंचाहमेव पक्खं वा । वयमिह धारेह दढं, जावइअं उच्छहे कालं ॥ १ ॥" अस्यातिचारप्रतिक्रमणायाह—

**आणवणे पेसवणे, सद्दे रूवे अ पुग्गलक्खेवे । देसावगासिअंमी, बीए सिक्खावए निंदे ॥ २८ ॥**

गृहादौ कृतदेशावकाशिकस्य गृहादेर्बहिस्तात्केनचित्किंचिद्वस्त्वानयत आनयनप्रयोगः१ एवं प्रस्थापयतः प्रेष्यप्रयोगः२ गृहादेर्बहिःस्थितस्य कस्यचित् कासितादिना कार्यकरणार्थमात्मानं ज्ञापयतः शब्दानुपातः ३ एवं स्वरूपं दर्शयतो मालादावारुह्य पररूपाणि वा प्रेक्षमाणस्य रूपानुपातः४ नियन्त्रितक्षेत्राद् बहिर्लेष्ट्वादिक्षेपणेन स्वकार्यं स्मारयतः पुद्गलक्षेपः५ देसावगासिअंमी

इत्यादि प्राग्वत् ॥ अत्र पवनंजयकथेयम्—

समृद्धं भरतेऽत्रास्ति, पुरं नन्दिपुराभिधं । जयवर्म्मनृपस्तत्र, बभूव विजयास्पदम् ॥ १ ॥ देवी जयावली तस्य, जयलक्ष्मीरिवांगिनी । चतुर्विधधिया युक्तो, मंत्री च जयसुन्दरः ॥ २ ॥ तत्रैव च पुरे जज्ञे, श्रेष्ठी नाम्ना धनंजयः । धर्मेण धर्मिणां धुर्यो, धनेन धनदोपमः ॥ ३ ॥ सज्जनीति प्रिया तस्य, सज्जनानन्ददायिनी । रूपलावण्यसंपन्नस्तत्पुत्रः पवनंजयः ॥ ४ ॥ गृहकृत्यकरस्तस्य, वयोरूपादिभिः सदृक् । विनीतः सर्वकर्मीणो, वयस्यः शेखराभिधः ॥ ५ ॥ नैमित्तिको नृपं प्रोचे, ज्ञानगर्भाभिधोऽन्यदा । कियन्त्यप्यद्य कल्येऽत्र, दुर्निमित्तानि जज्ञिरे ॥ ६ ॥ तत्प्रभावाद्भविष्यन्ति, जनानां भूयसामिह । भूयांसः श्वासकासाद्या, विविधा व्याधयोऽधिकम् ॥ ७ ॥ भूपतिस्तत्र चावादीद्भावि चैतत्कियत् किल? । मुहूर्त्ती प्राह यावद्धि, नाथानंगत्रयोदशी ॥ ८ ॥ राजा प्रोवाच सा मंत्रिन् !, दूरे तावत् त्रयोदशी । तन्मे कथय लोकानां, न स्यात्कथमियं व्यथा ? ॥ ९ ॥ मंत्र्यूचे कार्यतां यात्रा, ततः स्मरनिकेतने । पक्षस्यास्य त्रयोदश्यां, मौहूर्त्तोऽपीत्यमन्यत ॥ १० ॥ राजा पौरांस्ततो यात्राप्रवृत्त्यर्थमथादिशत् । ततो लोकोऽपि सर्वर्द्ध्या, गंतुं तत्र प्रचक्रमे ॥ ११॥ प्रतस्थे रथमारुह्य, श्रेष्ठिसूः पवनंजयः । यात्रां निरीक्षितुं मित्रपुत्रादिपरिवारितः ॥ १२ ॥ स ययौ गोपुरं यावत् , पुरस्तस्य रथस्य तु । दिन्नश्रेष्ठिसुतस्तावत्सागरोऽस्थाद्रथस्थितः ॥ १३ ॥ स्वसारथिमथोवाच, साक्षेपं पवनंजयः । हंहो कोऽयं ? न यः स्वीयं, परावर्त्तयते रथम् ॥ १४ ॥ श्रुत्वेति सागरः प्रोचे, मद्रथोऽपास्यते कथं ? । मत्तोऽधिकोऽसि किं ? न त्वं, मत्तोऽसि ? पवनंजय ! ॥ १५ ॥ एवं चाखर्वगर्वेण, तयोर्विवदमानयोः । लोकस्तत्रामिलत् भूयान् , बभाषे च तयोः प्रति ॥ १६ ॥ युवयोर्नोचितं ह्येतत् , समानकुलजातयोः । एकत्राधीतयोस्तुल्यवयसोः सुहृदोरिव ॥ १७ ॥ न

नमेद्यदि नामैको, नन्तव्यमपरेण तत् । पौरानुशिष्टिमित्येतौ, नामन्येतां मनागपि ॥ १८ ॥ ततस्तत्रेयतुर्ज्ञात्वा, वृत्तान्तं पितरौ तयोः । धृत्वा स्वस्वसुतं बाहावूचतुश्चतुरोक्तिभिः ॥ १९ ॥ विरोधो भवतोः कोऽयं, वणिक्कुलजयोरपि । ईदृक्षाः क्षत्त्रिया हि स्युरविमृश्यविधायिनः ॥ २० ॥ भवतोर्नमतोर्नूनं, कुलं शीलं बलं यशः । किं नाम हीयते ? हन्त !, यद्येवं युवयोर्ग्रहः ॥ २१ ॥ किंचान्यदकुलीनत्वं, कलयिष्यन्ति पूर्जनाः । भवन्तौ पूरयिष्येते, दुर्जनानां मनोरथान् ॥ २२ ॥ अनिष्टमपि मन्येथामस्मद्वाक्यं सकृद्युवाम् । आवामलंघ्यवाक्यौ हि, युवयोस्तु विशेषतः ॥ २३ ॥ इत्युक्तावपि तौ मातापितृभ्यां पीतमद्यवत् । न किंचिच्चेतयेते स्म, गृहेऽथ पितरौ गतौ ॥ २४ ॥ राजा ज्ञात्वेति वृत्तान्तं, वेत्रिणाऽबीभणच्च तौ । भो भोः श्रेष्ठिसुतौ ! कोऽयं, युवयोर्विग्रहाग्रहः ? ॥ २५ ॥ पितृलक्ष्मीमदोन्मत्तौ, बुध्येथां किं न बालिशौ ? । यदेवमवमन्येथां, पौरान्मातापितॄनपि ॥ २६ ॥ आत्मनीनौ तदद्यापि, परावर्त्त्य रथौ स्वकौ । स्वस्मिन् स्वस्मिन् न किं यातो, द्राग्गेहेनर्दिनौ गृहे ? ॥ २७ ॥ अथेत्थं वां न चेदिष्टं, सपद्युत्तीर्य तद्रथात् । गत्वा देशान्तरेऽर्जित्वा, भूरि द्रव्यमिहैत्य च ॥ २८ ॥ वर्षान्तेऽस्यां त्रयोदश्यां, स्वभुजोपार्जितैर्धनैः । पूरयिष्यति योऽत्यर्थमर्थिसार्थमनोरथान् ॥ २९ ॥ सर्वत्रास्खलितस्तस्य, भ्रमिष्यति रथस्ततः । अपाकरिष्यते नूनमितरस्य पुना रथः ॥ ३० ॥ युग्मं । श्रुत्वेति मुदितस्तूर्णं, स्वरथात्पवनंजयः । उत्तीर्य प्रचचालोच्चैर्दक्षिणापथसम्मुखम् ॥३१॥ सागरोऽपि तदोत्तीर्य, स्वरथादुत्तरापथम् । शकुनैर्वार्यमाणोऽपि, प्रतस्थे पवनेर्ष्यया ॥ ३२ ॥ शकुनैः प्रेर्यमाणस्तु, सोत्साहः पवनंजयः । नानाद्भुतयुतां पृथ्वीमाचक्राम शनैः शनैः ॥ ३३ ॥ कांचीपुर्यामितश्चाभूदिभ्यो लक्ष्मीधराभिधः । पुत्री मनोरमा तस्य, जगत्यपि मनोरमा ॥ ३४ ॥ सोऽन्यदाऽपृच्छदाहूय, मौहूर्त्तं ब्रह्मनामकम् । कियन्मे जीवितं ? भावी, श्रियाः पुत्र्याश्च कः पतिः? ॥ ३५ ॥ सोऽप्यु-

वाच दिनादस्मात्षण्मासाम् जीवितं तव । सप्ताहानि शिरोऽर्त्तिश्च, तीव्रा त्वन्ते भविष्यति ॥ ३६ ॥ अस्याः पुत्र्याश्च लक्ष्म्याश्च, भावी वैदेशिकः पतिः । श्रेष्ठ्यूचे स कथं ज्ञेयस्ततो नैमित्तिकोऽवदत् ॥ ३७ ॥ पुण्डरीकाभिधं तीर्थं, पंचाभिर्योजनैरितः । तत्रास्ति पुण्डरीकाख्यो, यक्षस्तत्र गतो भवान् ॥ ३८ ॥ यात्रां वीक्ष्य निवृत्तः सन्, प्रस्खलन् येन रक्ष्यसे । श्रेष्ठिपुत्रः स विज्ञेयो, वरोऽस्याः पवनंजयः ॥३९॥युग्मं। श्रेष्ठी सत्कृत्य मौहूर्त्तं, विसृज्य च ततः स्वयम् । जगाम तत्र वासाय, तीर्थे सर्वश्रियान्वितः ॥४०॥ यात्रां दृष्ट्वाथ निर्यान्तं, पतन्तं पवनंजयः । तत्रागतस्तदा वीक्ष्य, दक्षमुख्यो ररक्ष तम् ॥ ४१ ॥ श्रेष्ठ्यथोचे तवायुष्मन् !, स्वागतं पवनंजय ! । इत्युक्त्वा तं गृहे नीत्वा, भोजयित्वा च भक्तितः ॥ ४२ ॥ नैमित्तिकं वचः प्रोच्य, पुत्रीं तेनोदवाहयत् । अन्यदा श्रेष्ठिनस्तस्य, शिरोऽर्तिरभवद् भृशम् ॥४३॥ ततोऽन्तसमयं ज्ञात्वा, श्रेष्ठ्यूचे पवनंजय ! । वत्साष्टादशकोटीस्त्वं, सुवर्णस्य गृहाण मे ॥ ४४ ॥ अस्या मनोरमायाश्च, वर्त्तितव्यं त्वया तथा । यथा मां न स्मरत्येषा, पराभवविषेदुषी ॥ ४५ ॥ प्रतिपद्येति सोऽप्यूचे, मा भैष्टाऽस्याः शिरोऽर्त्तितः । तातपादांस्तथाऽऽधास्ये, यथा सज्जीभविष्यथ ॥ ४६ ॥ श्रेष्ठ्युवाच कृतं वैद्यैर्देहि धर्मौषधं मम । ततो निर्यामयामास, श्वशुरं पवनंजयः ॥ ४७ ॥ तत्र स्थित्वा कियत्कालमासन्नां तां त्रयोदशीम् । ज्ञात्वा पत्न्यै स्ववृत्तान्तं, निवेद्य तदनुज्ञया ॥ ४८ ॥ प्रभूतं पण्यमादाय, प्राचालीत् स्वपुरं प्रति । आर्जयत्स्वर्णकोट्यौ द्वे, कुर्वाणः क्रयविक्रयम् ॥ ४९ ॥ विंशति-स्वर्णकोटीशं, जयवर्मनृपोऽथ तम् । पुरे प्रवेशयामास, महोत्सवपुरस्सरम् ॥ ५० ॥ तास्मिन्महोत्सवे वांछातिक्रान्तं पवनंजयः । अर्थिभ्यः स्वजनेभ्यश्च, दानमष्ट दिनान्यदात् ॥ ५१ ॥ प्राभृतं भूरि ढौकित्वा, प्रणनाम महीपतिम् । तेनापि स्थापितः श्रेष्ठिपदे सप्रणयं तु सः ॥ ५२ ॥ गीयते स्तूयते चासौ, सकलेऽपि पुरे ततः । पूर्लोकैस्तद्गुणग्रामरामणीयकरंजितैः ॥ ५३ ॥ तदा च

सागरो गत्वा, विदेशे सोऽपि तत्र च । सहस्रान् पंच कृच्छ्रेण, दीनानाराणामुपार्जयत् ॥ ५४ ॥ दध्यौ धिग् धिक् चिरेणापि, धनमत्यल्पमर्जितम् । तथापि तत्र गन्तव्यमासन्ना यत् त्रयोदशी ॥५५॥ ततः सहायानादाय,क्रमेणाक्रम्य मेदिनीम् । सुष्वाप स्वपुरासन्नग्रामे श्रान्तो दिनात्यये ॥ ५६ ॥ सहायास्तेऽथ दीनारान्, लात्वा नेशुस्ततो द्रुतम् । प्रबुद्धः सागरोऽथैवं, विषण्णात्मा व्यचिन्तयत् ॥ ५७ ॥ यथा गतस्तथाऽऽयातो, यथाजातोऽधुना ध्रुवम् । दर्शयिष्यामि लोकानां, कथमास्यं स्वकं हहा ! ॥ ५८ ॥ कदाचिन्मे प्रतिस्पर्द्धी, मन्ये सोऽप्येवमागतः । आत्मानं स्थापयित्वेति, तदैवागाद् गृहं निजम् ॥ ५९ ॥ सर्वं वृत्तान्तमापृच्छत्, पितृभ्यामभ्यधायि सः । इत्थमित्थमिहायातः, पुण्यात्मा पवनंजयः ॥ ६० ॥ तदा कदाग्रहग्रस्तो, वचः कस्यापि न व्यधात् । ततोऽभूस्त्वं प्रयासायोपहासायैव केवलम् ॥ ६१ ॥ इत्युक्तोऽतिशुचाक्रान्तः, पुनस्ताभ्यामभाणि सः । इदानीमपि मा कार्षीर्विषादमुदितं ह्यदः ॥ ६२ ॥ मानभ्रंशोऽपि तस्य स्याद्यस्य मानोन्नतिः क्षितौ । पादयोर्निगडानि स्युर्नूपुराणि तयोस्तथा ॥ ६३ ॥ इन्दोः क्षयो न ताराणां, तत्र श्रीस्त्वितरेषु न । महतां वृद्धिहानी हि, दीना एव सदेतरे ॥ ६४ ॥ एवं सन्धीरितस्ताभ्यां, स्वगेहेऽनाययत्ततः । तस्यामेव तमस्विन्यां, सागरोऽथ निजं रथम् ॥ ६५ ॥ यात्रादिनेऽपि सर्वत्रास्खलितः पवनंजयः । रथस्थः श्लाघ्यमानोऽसौ, ददद्दानमबंभ्रमीत् ॥ ६६ ॥ सागरोऽपीर्ष्यया दध्यौ, कदाऽमुं पवनंजयम् । हनिष्यामि स्वहस्तेन, ममापभ्राजनाकरम् ॥ ६७ ॥ अन्यदा तु चतुर्मासे, धन्यः श्रेष्ठी धनंजयः । गृहान्तः पौषधं चक्रे, प्रमादैधोधनंजयः ॥ ६८ ॥ दिनं स्थित्वा बहिर्व्यग्रः, सन्ध्यायां पवनंजयः । पितुः पार्श्वमगात्तेनानुशिष्टः शिष्टभाषया ॥ ६९ ॥ वत्स ! पर्वदिनेऽपि त्वं, कुरुषे पोषधादि न । तथाप्यनर्थरक्षाकृत्, कुरु देशावकाशिकम् ॥ ७० ॥ सोऽवादीत्कीदृशं ह्येतत्, श्रेष्ठ्यूचे दिग्व्रतं हि यत् । तस्य

संक्षेपणं सर्वव्रतानां वाप्यदो व्रतम् ॥ ७१ ॥ प्रमादानुगतो जीवो, यावत्स्यादनियन्त्रितः । कर्मानुसमयं तावद्, आदत्ते दारुणोदयम् ॥ ७७ ॥ मान्त्रिकोऽगगतं यद्वद्धत्ते दंशे विषं क्षणात् । अस्मिन्नंगीकृते तद्वज्जीवः कर्माणि संक्षिपेत् ॥ ७३ ॥ आनयनप्रयोगाद्यास्त्याज्याः पंचात्र दोषकाः । व्रतम्लानिकृतोऽत्रापि, मानम्लान्यादिहेतवः ॥७४॥ इत्याकर्ण्य गृहान्तस्तत्, प्रपेदे पवनंजयः । अथैत्य शेखरस्तत्रोत्सुकोऽवादीदिदं वचः ॥ ७५ ॥ नर्त्तिष्यति सहस्राक्षः, श्रेष्ठिन्नद्येन्द्रजालिकः । समाह्वयति राजा त्वां, तदेहि पवनंजय ! ॥ ७६ ॥ यावन्न किंचिदूचाते, पितापुत्रौ व्रतस्थितौ । श्रेष्ठिनी सज्जनी तावत्समयज्ञा जगाद तम् ॥७७॥ पवनंजयवेषेण, वत्स ! गच्छ त्वमेव भोः । माऽनयोर्व्रतभंगोऽभूत्, शेखरोऽपि तथा व्यधात् ॥७८॥ वरासने निषण्णं तं, श्रेष्ठिभ्रान्त्याऽथ सागरः । आहत्य शक्त्या निस्त्रिंशो, निर्ययावारक्षकैर्धृतः ॥७९॥ केनाप्युक्तं हतः श्रेष्ठिन् !, सागरेण तवात्मजः । श्रेष्ठ्यूचे वत्स! हुं ज्ञातं, वराकः शेखरो हतः ॥ ८० ॥ व्रतात् त्वं जीवितः किन्तु, सागरः श्वो हनिष्यते । सोऽवादीत्तात ! तं प्रातर्मोचयिष्यामि निश्चितम् ॥ ८१ ॥ प्रातर्वध्यभुवं तस्मिन्नीयमानेऽथ पार्थिवम् । विज्ञपय्य कथंचित्तं, साज्जनेयो व्यमोचयत् ॥ ८२ ॥ ततस्तत्स्वजनैस्तुष्टैः, स्तूयमानः पदे पदे । सज्जनैः पूज्यमानश्च, गृहेऽगात्पवनंजयः ॥ ८३ ॥ पित्रोपबृंहितः सुष्ठु, त्वया वत्स ! कृतं ह्यदः । उपकारहते शत्रौ, यशः स्वैरं विजृम्भते ॥ ८४ ॥ दीर्घनिद्राकृते त्वस्मिन्, मुद्रितं ताद्धि सर्वथा । ततः स्वान्याहितं कुर्याद्देहार्थव्ययतोऽपि हि ॥ ८५ ॥ ततःप्रभृति सद्धर्मं, विधाय पवनंजयः । स्वर्गमोक्षसुखाभागी, बभूव क्रमयोगतः ॥ ८६ ॥ इत्यवेत्य दशमव्रतसम्यक्पालने हि सुखमुज्ज्वलमुच्चैः । तत्समस्तगुणसेवधितुल्ये, नित्यमत्र भविकाः ! प्रयतध्वम् ॥८७॥ (स्वागता) देशावकाशिके पवनंजयकथा ॥

अधुना पौषधोपवासः, तत्र पोषं-पुष्टिं प्रक्रमाद्धर्मस्य धत्त इति पौषधः-अवश्यमष्टम्यादिपर्वदिनानुष्ठेयो व्रतविशेषः तत्रोपवसनं पौषधोपवासः, स चाहारादिभेदाच्चतुर्द्धा, पुनरेकैकोऽपि द्विधा, देशसर्वभेदात् , तत्र देशतः- एकासनादिप्रत्याख्यानं देशत आहारपौषधः, सर्वतस्तु चतुर्विधाहारवर्जनरूपः, एवं शरीरसत्कारब्रह्मचर्याव्यापारपौषधा अपि वाच्याः ॥ ४ ॥ पौषधग्रहणविधिस्तु पौषधप्रकरणादवसेयः, अत्र चातिचारप्रतिक्रमणायाह–

**संथारुच्चारविहीपमाय तह चेव भोयणाभोए । पोसहविहिविवरीए, तइए सिक्खावए निंदे ॥ २९ ॥**

'संथारुच्चारविहीपमाय'त्ति संस्तारकः- कम्बलादिमयः, उपलक्षणत्वाच्छय्या च, उच्चारप्रश्रवणभूमेर्द्वादश द्वादश विण्मूत्रस्थण्डिलानि एषां विधेः प्रमादः, कोऽर्थः ?-शय्यायां संस्तारके च चक्षुषा अप्रत्युपेक्षितदुष्प्रत्युपेक्षिते उपवेशनादि कुर्वतः प्रथमोऽतिचारः १ एवं रजोहरणादिना अप्रमार्जितदुष्प्रमार्जिते द्वितीयः २ एवमुच्चारादिभूमीनामपि द्वावतिचारौ ३-४, अतः प्रोच्यते-तथैव भवत्यनाभोगे-अनुपयुक्ततायां सत्यामित्यतिचारचतुष्टयं ४ तथा 'पोषधविधिविपरीतः' पौषधविधेश्चतुर्विधस्यापि विपरीतः असम्यक्पालनरूपः, यथा कृतपौषधस्य क्षुधाद्यार्त्तस्य पौषधे पूर्णे श्वः स्वार्थमाहारादि इत्थमित्थं कारयिष्ये इत्यादि ध्यायतः पंचमोऽतिचारः ५ अनुष्ठेयतया पौषधविधिवैपरीत्ये, पाठान्तरं वा 'भोयणाभोय'त्ति भोजने-आहारे, उपलक्षणत्वाद्देहसत्कारादौ, आभोगः- उपयोगः, कदा पौषधं पूर्णं भविष्यति येनाहं भोक्ष्ये इत्यादितत्परतेति पंचमः । एवं च पंचभिरतिचारैः पौषधविधिविपरीते वैपरीत्ये (वा) सति 'तइए' इत्यादि प्राग्वत् ॥ अत्र ब्रह्मसेनज्ञातमिदम्—

वाराणस्यामभूत्पुर्यां, ब्रह्मसेनाभिधो वणिक् । यशोमती च तत्पत्नी, सोऽन्यदाऽगाद्बहिः पुरात् ॥ १ ॥ भव्यानां धर्म्ममा-

ख्यातं, दृष्ट्वोद्यानगतं मुनिम् । प्रणम्य मुदितः श्रेष्ठी, निषसाद तदन्तिके ॥२॥ मुनिराख्यदहो भव्या !, यावज्जीवोऽयमेजति । तावदाहारमादत्ते, तावत्कर्माणि चार्जयेत् ॥ ३ ॥ ततोऽप्यनन्तदुःखानि, सहते दुःसहान्यसौ । तस्मात्सुखैषिणाहारगृद्धिस्त्याज्या मनीषिणा ॥ ४ ॥ श्रेष्ठ्यथाख्यादशक्योऽयमुपदेशः प्रभो ! ननु । मुनिः प्रोचे गृहस्थानामस्ति भोः ! पौषधव्रतम् ॥ ५ ॥ तत्राहारांगसत्काराब्रह्मव्यापारवर्जनम् । देशतः सर्वतो वाऽपि, कर्त्तव्यं द्विविधंत्रिधा ॥ ६ ॥ यावत्कालमिदं धन्यो, बिभर्त्ति श्रावको व्रतम् । तावत्कालं स विज्ञेयो, यत्याचारानुपालकः ॥ ७ ॥ दोषाः पंच पुनस्त्याज्या, अप्रत्युपेक्षणादिकाः । शय्यादेर्वैपरीत्यं च, पौषधस्य विधेरिह ॥ ८ ॥ श्रुत्वेत्यत्रान्तरे कश्चित्, श्राद्धः क्षेमंकराभिधः । बभाषे पौषधाख्येन, व्रतेनानेन मे कृतम् ॥ ९ ॥ श्रेष्ठ्यूचेऽथ मुनिं नत्वा, किं विद्वेषोऽस्य पौषधे । प्रकृत्या भद्रकस्यापि, जातस्य श्रावके कुले ? ॥ १० ॥ मुनिः स्माह भवादस्मात्तृतीयेऽयं भवेऽभवत् । नगर्यां किल कौशाम्ब्यां, क्षेमदेवाभिधो वणिक् ॥ ११ ॥ भ्रातरौ तत्र चाभूतां, महेभ्यौ श्रावकोत्तमौ । जिनदेवाभिधो ज्येष्ठो, धनदेवः कनिष्ठकः ॥ १२ ॥ कुटुम्बभारमारोप्य, जिनदेवोऽन्यदाऽनुजे । पौषधं पौषधागारे, प्रत्यहं विधिवद् व्यधात् ॥ १३ ॥ अन्यदा पौषधस्थस्य, तस्योत्पेदेऽवधिस्ततः । ज्ञात्वा ज्ञानोपयोगेन, सोऽवादीदनुजं यथा ॥ १४ ॥ वत्सावशिष्टमायुस्ते, नूनं ज्ञातं दिनान् दश । विधेहि बान्धव ! स्वार्थं, सावधानमनास्ततः ॥ १५ ॥ धनदेवस्ततः कृत्वा, चैत्ये पूजां गरीयसीम् । दत्त्वा दानं च दीनानामदीनां निर्निदानकम् ॥ १६ ॥ संघं च क्षमयित्वाऽसौ, कृत्वा चानशनं सुधीः । तृणसंस्तारके तस्थौ, स्वाध्यायध्यानतत्परः ॥ १७ ॥ क्षेमदेवोऽथ तत्रैत्य, तमूचे भोः ! कथं भवेत् । गृहस्थस्य ससंगत्वादवधिज्ञानमीदृशम् ? ॥ १८ ॥ अथैतदपि चेत्सत्यं, भवेद्भद्र ! ततो भृशम् । गृहीष्ये पौषधं ज्ञानभानुपूर्वाचलोपमम् ॥ १९ ॥ धनदेवोऽथ तत्राह्नि,

स्मरन् पंचनमास्क्रियाम् । विपद्य द्वादशे कल्पे, इन्द्रसामानिकोऽभवत् ॥ २० ॥ कलेवरस्य तस्याथ, यथासन्निहितामरैः । गन्धाम्बुपुष्पवृष्ट्याद्यैश्चक्रे तुष्टैर्महामहः ॥ २१ ॥ क्षेमदेवोऽपि वीक्ष्यैतदीषत् श्रद्धालुतां दधत् । पौषधं प्रायशश्चक्रे, धर्मकामो यदा तदा ॥ २२ ॥ कृत्वाऽऽषाढचतुर्मासे, सोऽन्यदा पौषधव्रतम् । तमस्विन्यां तपस्तापक्षुत्तृडार्त्तो व्यचिन्तयत् ॥ २३ ॥ अहो दुःखमहो दुःखं, क्षुत्तृड्घर्मादिसंभवम् । एवमत्यार्ऽतिचर्यासौ, पौषधं तु ततो मृतः ॥ २४ ॥ व्यन्तरेषु सुरो भूत्वा, सोऽभूत् क्षेमंकरो ह्ययम् । यत्पौषधान्मृतः प्राक् तत्, त्रस्तोऽद्यापि तदाख्यया ॥२५॥ ब्रह्मसेन इति श्रुत्वा, प्रणिपत्य पुनर्मुनिम् । पौषधव्रतमादाय, धन्यंमन्यो ययौ गृहम् ॥ २६ ॥ ततःप्रभृति स श्रेष्ठी, सुखेन प्राप्तजीविकः । कियत्कालमतीयाय, बिभ्राणः पौषधव्रतम् ॥ २७ ॥ अन्यदा तत्पुराधीशे, मृतेऽकस्मादपुत्रिणि । पुरेऽरिभिर्भज्यमाने, श्रेष्ठ्यनेशत् समानुषः ॥ २८ ॥ गत्वा मगधदेशेषु, ग्रामे गोर्बरनामके । तत्र चाजीविकाहेतोरध्युवास विधेर्वशात् ॥ २९ ॥ साधर्मिकाद्यभावेऽपि, तत्र श्रेष्ठी वसन्नसौ । तथैव पौषधं चक्रे, कर्म्मव्याधिमहौषधम् ॥ ३० ॥ इतश्च तद्गृहे नित्यं, क्रयविक्रयणच्छलात् । चत्वारः पुरुषाः केचिन्निषेदुर्दुष्टबुद्धयः ॥ ३१ ॥ ततश्च तैर्नरैर्ज्ञातः, श्रेष्ठिनः पौषधक्षणः । संपूर्णं पौषधं चक्रे, श्रेष्ठिना त्वपरेऽहनि ॥ ३२ ॥ निशाद्यप्रहरादूर्ध्वं, तस्मिन् सुप्तेऽथ ते नराः । प्रविश्य तत्र खात्रेणारेभिरे मोषितुं गृहम् ॥ ३३ ॥ प्रबुद्धः श्रेष्ठ्यथो गेहं, मुष्यमाणं विदन्नपि । मनागपि शुभध्यानान्नाचालीदचलाऽचलः ॥ ३४ ॥ संवेगातिशयात्सोऽनुशिष्टिमित्यात्मनो ददौ । रे जीव ! धनधान्यादौ, मा मुहः सर्वथा यतः ॥ ३५ ॥ एतद् बाह्यमनित्यं च, तुच्छं विविधदुःखदम् । एतस्माद्विपरीते तु, धर्मे चित्तं दृढं कुरु ॥ ३६ ॥ श्रुत्वेत्यात्मानुशिष्टिं ते, तस्कराः श्रेष्ठिनो मुखात् । एवं विभावयामासुर्भावमां भवनाशिनीम् ॥ ३७ ॥ धन्योऽयमेव येनासौ, स्वस्यापि स्वस्य निःस्पृहः । अधन्या वयमेवैके,

ये परार्थं जिहीर्षवः ॥ ३८ ॥ ततश्च लघुकर्म्मत्वाज्जातिस्मृतिमवाप्य च । देवतादत्तलिंगास्ते, सर्वेऽप्याददिरे व्रतम् ॥ ३९ ॥ अथोदयमिते सूर्ये, श्रेष्ठ्यकस्माद् विलोक्य तान् । नत्वाऽप्राक्षीत् किमेतद्वः, पूर्वापरविरोधकृत् ॥ ४० ॥ तेऽप्यूचुरभवामांग!, तुरमिण्यां पुरा पुरि । वयं केसरिविप्रस्य, चत्वारोऽपि तनूरुहाः ॥ ४१ ॥ पितर्युपरतेऽत्यन्तं, वियोगविधुरीकृताः । निरीयुस्तीर्थयात्रायै, परलोककृतादराः ॥ ४२ ॥ अद्राक्ष्म पथि गच्छन्तो, मुनिमेकं क्षुधादिभिः । मूर्च्छागतं ततोऽस्माभिः, सोऽथ सज्जीकृतः क्षणात् ॥ ४३ ॥ धर्म्ममाकर्ण्य तत्पार्श्वे, दीक्षामादाय तत्समम् । विहरन्तस्तपस्यन्तोऽधीत्य पूर्वगताद्यपि ॥ ४ ॥ कृत्वा कुलमदं किन्तु, मृत्वोत्पद्याऽऽद्यताविषे । ततश्च्युत्वाऽभवामाऽत्र, तन्मदात्तस्करे कुले ॥ ४५ ॥ मुष्णतश्चाद्य ते सद्म, त्वानुशिष्टिश्रुतेस्तव । संजातजातिस्मरणा, अगृह्णीम व्रतं वयम् ॥ ४६ ॥ धर्म्मलाभोऽस्तु ते नित्यं, धर्मे निश्चलचेतसः । इत्युक्त्वा ते ततोऽन्यत्र, विहर्तुं मुनयो ययुः ॥ ४७ ॥ ब्रह्मसेनोऽथ स श्रेष्ठी, धर्मं कृत्वा दृढं चिरम् । आराधनाविधेर्मृत्वा, स्वर्मोक्षसुखभागभूत् ॥ ४८ ॥ इति भविकजनौघा ! मोक्षसौख्यैकहेतुं, भवजलनिधिमज्जज्जन्तुनिस्तारसेतुम् । व्रतविसरवरिष्ठं पौषधं भो ! विबुध्यानवरतमतियत्नं तत्र दद्ध्वं सुबुद्ध्या ॥ ४९ ॥ (मालिनीवृत्तम्) पौषधे ब्रह्मसेनज्ञातम् ॥ २९ ॥

साम्प्रतमतिथिसंविभागाख्यं तुर्यं शिक्षाव्रतं, तत्र तिथिपर्व्वादिलौकिकव्यवहारत्यागाद्भोजनकालोपस्थायी श्रावकस्यातिथिः साधुरुच्यते, यदुक्तं—"तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना । अतिथिं तं विजानीयात्, शेषमभ्यागतं विदुः ॥ १ ॥" तस्यातिथेः संगतो-निर्दोषाणां न्यायागतानां कल्पनीयान्नपानादीनां देशकालश्रद्धासत्कारक्रमयुक्तः पश्चात्कर्मादिदोषपरिहारेण विशिष्टो भागः- आत्मानुग्रहबुद्ध्या दानमतिथिसंविभागः, अत्र चायं विधिः--कृतपौषधेन श्राद्धेन पारणकदिने साधुसद्भावेऽवश्यमतिथिसं-

विभागव्रतमासेव्य पारयितव्यं, अन्यदा त्वनियमः, यदाह-- 'पढमं जईण दाऊण०' इत्यादि ॥ अत्र चातिचारप्रतिक्रमणायाह-

**सच्चित्ते निक्खिवणे, पिहिणे ववएस मच्छरे चेव। कालाइक्कमदाणे, चउथे सिक्खावए निंदे ॥ ३० ॥**

देयस्यान्नादेरदानबुद्ध्याऽतिक्रमादिभिरनाभोगेन वा **सच्चित्ते**-पृथ्व्यादौ निक्षिपतः सच्चित्तनिक्षेपणतेति प्रथमोऽतिचारः १ एवं सच्चित्तेन पिदधतः **सच्चित्तपिधानता**२ स्वकीयमपि परकीयमिदमित्यभिदधतः **परव्यपदेशः**३ किमस्मादप्यहं न्यून इति मात्सर्याद्ददतो **मत्सरिता** ४ साधुं भिक्षावेलामतिक्रम्य निमंत्रयमाणस्य कालातिक्रमः ५, शेषं प्राग्वत् ॥ अत्र **नरदेवकथेयं**-

क्षेमपुर्यां सुराष्ट्रासु, ताराचन्द्रस्य भूभुजः। पद्मेव पद्मनाभस्य, प्रिया पद्मावतीत्यभूत् ॥ १ ॥ प्रजायेतां तयोः पुत्रौ, रूपलावण्यसंयुतौ। तत्राद्यो नरदेवाख्यो, देवचन्द्रो द्वितीयकः ॥ २ ॥ ज्येष्ठः श्रेष्ठो बलिप्रष्ठस्त्यागी भोगी कलानिधिः। विपरीतः कनिष्ठस्तु, ततो राजेत्यचिन्तयत् ॥ ३ ॥ धिग्धिग्जन्मास्य पुत्रस्य, भोगत्यागादिवर्जितम्। ऐहिकामुष्मिकार्थानां, सर्वथा करणाक्षमम् ॥ ४ ॥ तदनेन पुरा नूनं, दुरन्तं दुष्कृतं कृतम्। तत्तु न ज्ञायते सम्यग्, विशिष्टज्ञानिनं विना ॥ ५ ॥ नत्वोचे श्रीगृहाध्यक्षः, श्रीदत्तो नृपमन्यदा। स्तोकैरेव दिनैर्देव !, कोशो रिक्तीभविष्यति ॥ ६ ॥ राजाऽप्याख्यत् कुतो हेतोस्ततः सोऽप्यब्रवीदिदम्। त्यागेन नरदेवस्य, रुष्टो राजाऽभ्यधादथ ॥ ७ ॥ अहो पुत्रमिषादेष, द्वेषी नूनं ममाजनि। इत्थं त्यागग्रहग्रस्तो, यः कोशं छेत्तुमिच्छति ॥ ८ ॥ श्रुत्वैतन्नरदेवोऽथ, दध्यौ धिग्वार्द्धकं खलु। यदेवं स्वल्पदानेऽपि, तातस्ताम्यति मानसे ॥ ९ ॥ कृतं तदत्र वासेन, वनवासनिभेन मे। ध्यात्वेति निर्ययौ तस्मात् , पुरात् खड्गसखो निशि ॥ १० ॥ पृथ्वीं पर्यटतस्तस्य, तपस्व्येकोऽन्यदाऽमिलत्। ज्ञात्वा तमुत्तमं तस्मै, निधिकल्पमदर्शयत् ॥ ११ ॥ राजपुत्रेण स प्रोक्तः, कल्पोऽयं केन तेऽर्पितः? । सोऽप्युवाच पुरा जज्ञे, सिन्धु-

सेनोऽत्र भूपतिः ॥ १२ ॥ धीमान् शंकरधर्माख्यस्तस्य चासीन्महत्तमः । स राजोग्रकरैर्लोकाद्, भूरि द्रव्यममीलयत् ॥ १३ ॥ निधानेऽस्य गिरेः पार्श्वे, विंशतिः स्वर्णकोटयः । क्षितौ क्षिप्ताः क्षितीशेन, तेन तन्मंत्रिणा समम् ॥ १४ ॥ अपुत्रोऽसौ मृतो राज्य-ध्वंसे च समुपस्थिते । अस्मद्गुरुगुरोः पार्श्वे, स मंत्री तापसोऽभवत् ॥ १५ ॥ तेनापि गुरवे तस्मै, कल्पोऽयं दर्शितस्ततः । गुरुणोक्तमिदानीं त्वं, सुरक्षितमिमं कुरु ॥ १६ ॥ एवं परम्परेणायं, मम हस्तगतोऽभवत् । मया खनितुमारेभे, तस्मिन् विघ्नास्ततोऽभवन् ॥ १७ ॥ तदत्र कुरु साहाय्यं, नरदेव ! नरोत्तम । दाक्षिण्येन कुमारोऽपि, प्रत्यपद्यत तद्वचः ॥ १८ ॥ बलिपूजादिकं कृत्वा, खन्यमानेऽथ तत्र च । यक्षेण तापसोऽघानि, निधिश्च प्रकटीकृतः ॥ १९ ॥ कुमारोऽचिन्तयच्चास्य, प्रयासो धिग्वृथाऽभवत् । निधिश्चायं मया ह्यर्प्यः, पित्रे भोग्यः स्वयं नतु ॥ २० ॥ ध्यात्वेत्यवन्तिसेनस्य, तद्देशाधिपतेस्ततः । स्वमातुलस्य पार्श्वेऽगात्, तेनाप्येषोऽथ सत्कृतः ॥ २१ ॥ पृष्ट्वैकाकित्वहेतुं च, प्रोक्तोऽसौ तेन भूभुजा । वत्सेदं राज्यमादत्स्व, वनवासाय याम्यहम् ॥ २२ ॥ नरदेवोऽवदद्देव !, राज्येनालं परं भवान् । निधिं प्रस्थापयत्वेनं, समीपे मत्पितुर्द्रुतम् ॥२३॥ तेनापि च तथा चक्रे, कुमारोऽसौ ततः पुरात् । जगाम गन्धिलावत्यां, पुर्यां तत्र च वीक्ष्य सः ॥ २४ ॥ शक्रावतारचैत्यान्तः, प्रतिमां प्रथमाऽर्हतः । पंचांगस्पृष्टभूपृष्ठः, प्रणिपत्याब्रवीदिति ॥ २५ ॥ धर्मकर्मोपदेशित्वाद्विश्वस्याप्यभिनन्दनः । श्रीयुगादिजिनाधीश !, जय त्वं नाभिनन्दन ! ॥ २६ ॥ हे देव ! मरुदेवांगसरोहंससमान ! ते । नमस्कुर्वंति ये नूनं, भवाम्भोधिभ्रमा न ते ॥ २७ ॥ नाथ ! यैराश्रिता दुःखदावानलघनोपमा । त्वदाज्ञाऽऽराधना ते स्युर्न भवे दुःखिनोऽपमाः ॥ २८ ॥ यः क्षणं तन्वते भक्तिं, त्वयि निर्वाणसंभवे । संभ्रमी सोऽपि नो भीमे, बंभ्रमीत्यनिशं भवे ॥ २९ ॥ यो धाराधरगम्भीरनिर्घोष ! तव शासनम् । श्रयते तस्य लंघन्ते,

न देवा अपि शासनम् ॥ ३० ॥ त्वदंघ्रिपंकजे देव !, ये नमन्त्यत्र सादराः । ते निश्चितं भवन्त्यस्तजन्मरुग्विश्वसादराः ॥ ३१ ॥ सदानन्तकुकर्मांशद्रुमभंजनवारण ! । जीयास्त्वं जगतीनाथ !, दुःखलक्षनिवारण ! ॥ ३२ ॥ अज्ञानतिमिरध्वंसहंस ! ध्वस्तझषध्वजः । भवे दीनं पतन्तं मां, रक्ष रक्ष वृषध्वजः ॥ ३३ ॥ स्तुत्वेति सुष्ठुचित्तोऽसौ, निर्गच्छन् जिनमंदिरात् । नरेन्द्रपुरुषैर्नत्वा, विज्ञप्तो भक्तिपूर्वकम् ॥ ३४ ॥ रथो नगर्या एतस्याः, स्वामिना सिन्धुविष्णुना । प्रैष्ययं त्वां समानेतुं, तदत्राऽऽरुह्यतां द्रुतम् ॥३५॥ कुमारोऽपि तमारुह्य, ययौ राजान्तिके ततः । तेनापि कृतसन्मानः, सस्नेहं भणितोऽथ सः ॥ ३६ ॥ पुरुषद्वेषिणी पुत्री, ममेयं कमलावती । ततश्चाराधिताऽवादीन्मदग्रे कुलदेवता ॥ ३७ ॥ शक्रावतारचैत्येऽद्य, जिनं स्तुत्वा नृपात्मजः । निर्गमिष्यति यः प्रातः, सोऽस्या भावी वरो ध्रुवम् ॥ ३८ ॥ किंच सख्यश्चतस्रोऽस्याः, सन्त्येताः स्वर्वधूपमाः । तत्रैका मिथिलेशस्य, दुहिता जयसुन्दरी ॥ ३९ ॥ वंगाधिपसुता चान्या, लीलावत्यभिधानतः । नाम्ना वसन्तसेनेति, कलिंगनृपतेः सुता ॥४०॥ कुरुराजसुतानंगलेखेति च चतुर्थिका । एता अप्येकभर्तृत्वं, प्रपन्नास्त्वं विवाहय ॥ ४१ ॥ अनुज्ञाते कुमारेण, ततोऽसौ तैर्नृपैर्मुदा । विवाहितः समं ताभिर्महर्ध्या परमेऽहनि ॥ ४२ ॥ हस्त्यश्वादिप्रदानात् तैः, सत्कृतस्तत्र तस्थिवान् । कियत्कालं ततः पित्राऽऽह्वायितः स्वपुरं ययौ ॥ ४३ ॥ स्वान्तःपुरपरीवारः, प्रणतः पितरौ मुदा । पितापि तच्चरित्रेण, रंजितः प्रोचिवानिदम् ॥ ४४ ॥ गरीयसापि त्यागेन, न याति निधनं धनम् । ग्रामेणोदंच्यमानेऽपि, महाकूपे जलं यथा ॥ ४५ ॥ किंचास्य नरदेवस्य, कोऽपि पुण्योदयोऽद्भुतः । श्रीरीदृग्निधिलाभश्च, यस्याकस्मादजायत ॥ ४६ ॥ श्रियः पुण्यानुगास्तस्मात्कार्प्पण्यं सर्वथा वृथा । श्रेयोऽर्थिना श्रियां सत्यां, त्यागः कर्त्तव्य एव तत् ॥ ४७ ॥ राजा चोद्यानपालेन, विज्ञप्तोऽ-

स्मात् पुराद्बहिः । जयघोषाभिधः सूरिश्चिज्ञानी समवासरत् ॥ ४८ ॥ तुष्टिदानं ततस्तस्मै, दत्त्वा राजा सुतान्वितः । तत्र गत्वा गुरून् नत्वा, निषसाद तदन्तिके ॥ ४९ ॥ तत्रैत्य स्वातिदत्तोऽथ, श्रेष्ठी पुत्रयुतो गुरुम् । नत्वाऽपृच्छदयं पुत्रः, सत्यामप्युरुसम्पदि ॥ ५० ॥ परिधत्ते सुवासांसि, चेद्गात्रं भज्यते ततः । सकृदप्युत्तमे भोज्ये, भुक्तेऽसौ बाध्यते चिरम् ॥ ५१ ॥ मूर्ध्नि बध्नाति माल्यं चेच्छिरोऽर्तिर्जायते ततः । विलेपने कृते त्वस्य, दाहः स्यात्सर्वदेहजः ॥ ५२ ॥ तदनेन पुरा कर्म्म, किं कृतं दुष्कृतं ? प्रभो ! । ततः सूरिरुवाचैवं, राजाद्येषु प्रदत्तदृक् ॥ ५३ ॥ वत्सदेशे पुराऽभूवन् , सुस्निग्धाः सुहृदस्त्रयः । अन्यदा तत्पुरोद्याने, कुरुराजसुतोऽथ तैः ॥ ५४ ॥ महाबलमुनिर्दृष्टो, वन्दित्वा स तु भक्तितः । यतिधर्मासमर्थैस्तैर्गृहिधर्म्ममपृच्छ्यत ॥ ५५ ॥ ॥युग्मम्॥ उक्त्वा सम्यक्त्वमूलानि, व्रतान्येकादशापि सः । आचचक्षेऽतिथिसंविभागाख्यं द्वादशं व्रतम् ॥ ५६ ॥ तिथिपर्वोज्झिता येन, सोऽतिथिस्तस्य संगतः । आधाकर्मादिभिर्दोषैरदुष्टान्नादिवस्तुनः ॥ ५७ ॥ विभागो भक्तितो दानमित्येतत् द्वादशं व्रतम् । समग्रभोगसामग्रीसंपत्त्येकनिबन्धनम् ॥ ५८ ॥ युग्मम् ॥ वर्ज्याः पंचात्र दोषास्तु, सचित्तक्षेपणादिकाः । दानलाभादिलब्धीनां, पंचानामपि घातकाः ॥ ५९ ॥ इत्याकर्ण्य सकर्णास्ते, गृहिधर्ममशिश्रियन् । धन्यंमन्या ययुर्गेहे, व्यहार्षीत् स मुनिस्ततः ॥ ६० ॥ ज्येष्ठः सुहृत् सुराष्ट्रासु, वाणिज्यार्थं गतोऽन्यदा । तत्र रैवतकासन्ने, कस्मिन्नपि पुरे स्थितः ॥ ६१ ॥ कार्तिके पौषधं चक्रे, चतुर्मासकपर्वणि । पालयित्वा च तत्सम्यक्, द्वितीयेऽह्नि त्वपारयत् ॥ ६२ ॥ मध्याह्नसमये सोऽथ, भोजने परिवेषिते । दध्यौ दानमदत्त्वाऽद्य, कथं जेमिष्यते मया ? ॥ ६३ ॥ महर्षिर्यदि कोऽप्येति, कुतश्चिन्मम भाग्यतः । संविभागं ततः कृत्वा, भुंजेऽहमिति शुद्धधीः ॥ ६४ ॥ स्मृत्वा पंचनमस्कारं, कृत्वा दिगवलोकनम् । भोक्तुं प्रचक्रमे यावत् , गृहीत्वा कवलं करे ॥ ६५ ॥ तावद् द्र-

विडराजर्षिः, स्थित्वा वर्षासु तद्गिरौ। पारणार्थं समायातश्चतुर्मासीमुपोषितः ॥ ६६ ॥ एषोऽपि सहसाऽनभ्रवृष्टिवद्वीक्ष्य हर्षभाक्। अभ्युत्थाय नमस्कृत्य, भक्त्या तं प्रत्यलम्भयत् ॥ ६७ ॥ सुपात्रदानतस्तत्र, पंच दिव्यानि जज्ञिरे। एषोऽत्रापि भवे जज्ञे, धर्मकामार्थभाजनम् ॥६८॥ कनिष्ठोऽपि सुहृत्तत्र, पारणाहन्यदित्सया। कृत्वा पंचाप्यतीचारान्, सचित्तक्षेपणादिकान् ॥ ६९ ॥ ततो मध्यममित्राय, प्रच्छन्नं तदचीकथत्। सोऽप्यूचे सुष्ठु ते जज्ञे, न दत्तं न व्रतक्षतिः ॥ ७० ॥ कालेन ते त्रयो मृत्वा, देवा भूत्वा ततश्च्युताः। ज्येष्ठस्तेषु सुतोऽयं ते, नरदेवोऽभवन्नृपः ! ॥ ७१ ॥ पात्रदानेन तेनायं, त्यागादिगुणभागभूत्। द्वितीयो मित्रजीवस्तु, जातोऽयं ते लघुः सुतः ॥ ७२ ॥ अयं हि विपरीतस्तु, तस्मात्पापानुमोदनात्। कनिष्ठमित्रजीवोऽभूत्, स्वातिदत्त ! तवांगजः ॥ ७३ ॥ व्रतभंगेन तेनायं, नैकभोगादिवर्जितः। किंचान्यद् व्यन्तरैः क्षुद्रैः, पीड्यते हि दिवानिशम् ॥ ७४ ॥ विश्वेऽपि तदहो नान्यत्, सुखदुःखनिबन्धनम्। आत्मानमेव मुक्त्वैकं, पुण्यापुण्यसमर्जकम् ॥ ७५ ॥ नृपादयस्ततो धर्म्मं, यथायोग्यमशिश्रियन्। विशिष्टं श्रावकं धर्मं, नरदेवोऽपि शुद्धधीः ॥ ७६ ॥ ततः साम्राज्यमासाद्य, पालयित्वा च तच्चिरम्। कृत्वा ते संयमं सम्यक्, स्वर्मोक्षसुखभागभूत् ॥ ७७ ॥ सुरमानवनिर्वृतिसौख्यकरं, नरकादिकदुःखसमूहहरम्। अतिथिव्रतमेवमवेत्य सदा, भवतादरवन्त इहातिमुदा ॥ ७८ ॥ (तोटकवृत्तम्) द्वादशव्रते **नरदेवकथा** ॥ ३० ॥ साम्प्रतमत्र यद्रागादिना दत्तं तत्प्रातिक्रमणायाह—

**सुहिएसु य दुहिएसु य, जा मे अस्संजएसु अणुकंपा। रागेण व दोसेण व, तं निंदे तं च गरिहामि ॥ ३१ ॥**

साधुष्विति विशेष्यं गम्यं, संविभागव्रतप्रस्तावात्, साधुषु कीदृक्षु ?- सुष्ठु हितं- ज्ञानादित्रयं येषां ते सुहितास्तेषु, पुनः कीदृक्षु ?- दुःखितेषु-रुजा तपसा वा क्लान्तेषु प्रान्तोपधिषु वा, पुनः किंविशिष्टेषु ?- न स्वयं-स्वच्छन्देन यता-उद्यता अस्वंय-

वास्तेषु, गुर्वाज्ञया विहरत्सु इत्यर्थः, या मया कृताऽनुकम्पा-कृपा अन्नादिदानरूपा, रागेण पुत्रादिप्रेम्णा, नतु गुणवत्त्वबुद्ध्या, तथा द्वेषेण, द्वेषोऽत्र साधुनिन्दाख्यः, यथाऽदत्तदाना मलाविलसकलदेहा ज्ञातिजनपरित्यक्ताः क्षुधार्त्ताः सर्वथा निर्गतिकाः अमी अत उपष्टम्भार्हा इत्येवं निन्दापूर्वकं याऽनुकम्पा सापि निन्दार्हा, अशुभदीर्घायुष्कहेतुत्वात्, यदागमः—"तहारूवं समणं वा माहणं वा संजयविरयपडिहयपच्चक्खायपावकम्मं हीलित्ता निन्दित्ता खिंसित्ता गरहित्ता अमणुण्णेणं अपीइकारगेणं असणपाणखाइमसाइमेणं पडिलाभित्ता असुहदीहाउयत्ताए कम्मं पकरेइ" यद्वा सुखितेषु दुःखितेषु वा असंयतेषु पार्श्वस्थादिषु, शेषं तथैव, नवरं द्वेषेण 'दगपाणं पुप्फफलं' इत्यादितद्वतदोषदर्शनात् मत्सरेण, अथवा असंयतेषु- षड्विधजीववधकेषु कुलिंगिषु, रागेण एकग्रामोत्पत्त्यादिप्रीत्या, द्वेषेण प्रवचनप्रत्यनीकतादिदर्शनोद्भवेन, तदेवंविधं दानं निन्दामि गर्हे च, यत् पुनरौचित्यदानं तन्न निन्दार्हं, जिनैरपि वार्षिकं दानं ददद्भिस्तस्य दर्शितत्वात् ॥ ३१ ॥ सम्प्रति साधुषु यन्न दत्तं तत्प्रतिक्रमितुमाह—

**साहूसु संविभागो, न कओ तवचरणकरणजुत्तेसुं । संते फासुयदाणे, तं निंदे तं च गरिहामि ॥ ३२ ॥**

कण्ठ्या, नवरं तपश्चरणकरणयुक्तेष्वित्यत्र तपसः पृथगुपादानमनेन निकाचितान्यपि कर्माणि क्षीयन्ते इति प्राधान्यख्यापनार्थम् ॥ ३२ ॥ सम्प्रति संलेखनातिचारान् परिजिहीर्षुराह—

**इहलोए परलोए, जीवियमरणे य आससपओगे । पंचविहो अइयारो, मा मज्झं हुज्ज मरणंते ॥ ३३ ॥**

अत्राशंसाप्रयोग इति सर्वत्र योज्यं, तत्र प्रातिक्रामकं प्रतीत्येहलोको-नरलोकस्तत्राशंसा-राजा स्यामित्याद्यभिलाषस्तस्याः प्रयोगो व्यापार इहलोकाशंसाप्रयोगः१ एवं देवः स्यामित्यादि परलोकाशंसाप्रयोगः२ तथा कश्चित्कृतानशनः प्रभूतपौरजनव्रातवि-

हितमहामहोत्सवावलोकनात् प्रचुरवन्दारुवृन्दवन्दनसंमर्द्दर्शनात् अस्तोकविवेकिलोकसत्कृतश्लोकसमाकर्णनात् पुरतः संभूय भूयो भूयः सद्धार्गिकजनविधीयमानोपबृंहणश्रवणात् अनघसमस्तसंघजनमध्यसमारब्धपुस्तकवाचनवस्त्रमाल्यादिसत्कारानिरीक्षणाच्चैवं मन्यते- प्रतिपन्नानशनस्यापि जीवितमेव सुचिरं श्रेयः, यत एवंविधा मदुद्देशेन विभूतिर्वर्त्तत इति **जीविताशंसाप्रयोगः** २ तथा कश्चित् कर्कशक्षेत्रे कृतानशनः प्रागुक्तपूजाद्यभावे क्षुधाद्यार्त्तो वा चिन्तयति-'किमिति शीघ्रं न म्रियेऽह' मिति **मरणाशंसाप्रयोगः**४ तथा **कामभोगाशंसाप्रयोगः**, तत्र कामौ-शब्दरूपौ भोगा-गन्धरसस्पर्शाः,यथा ममास्य तपसः प्रभावात्प्रेत्य सौभाग्यादि भूयादिति, एष **पंचविधोऽतिचारो मा मम भूयान्मरणान्ते** यावच्चरमोच्छ्वास इति ॥ अत्र **धर्मघोषधर्मयशसोर्ज्ञातम्**

इहैव भरतक्षेत्रे, कौशाम्ब्यामभवत् पुरि । भूपालोऽजितसेनाख्यो, धारिणीति च तत्प्रिया ॥ १ ॥ अन्यदा बृद्धवासेन, तस्यां पुर्यां बहुश्रुताः । सूरयो धर्मवस्वाख्यास्तस्थुः संयमसुस्थिताः ॥ २ ॥ तदन्तेवासिनौ धर्मघोषधर्मयशोऽभिधौ । साधू संलेखनां ज्येष्ठामारेभाते समाहितौ ॥ ३ ॥ तत्रासीद्विनयवती, यथार्था च प्रवर्त्तिनी । विनीता तद्विनेया त्वभूद्विगतभयाभिधा ॥ ४ ॥ साऽन्यदा संघमापृच्छ्य, प्रपेदेऽनशनं ततः । चमत्कारकरी चक्रे, चिरं पौरैः प्रभावना ॥ ५ ॥ देवभूयं गतायां हि, तस्यां सर्वात्मना पुनः । सज्जनानन्दजननी, पूजाऽजन्यत पूर्जनैः ॥ ६ ॥ दृष्ट्वैतद्धर्मघोषर्षिर्दध्यौ धन्येयमार्यिका । जीवत्याश्च मृतायाश्चेदृशी यस्याः प्रभावना ॥ ७ ॥ पुरेऽत्रानशनं कुर्वे, ततोऽहमपि साम्प्रतम् । पूजा ममापि येनेदृक्, प्रेत्यात्रापि प्रवर्त्तते ॥८॥ ततः सोऽनशनं तत्र, चक्रे धर्मयशाः पुनः । चिन्तयामास धर्मेण, जनज्ञातेन किं मम?॥ ९ ॥ ध्यात्वेति गुरुमापृच्छ्य, गत्वा च गिरिकन्दरे । तीरस्थे वच्छगानद्या, उज्जयिन्या अवान्तरे ॥ १० ॥ प्रपद्यानशनं तत्र, पादपोपगमाभिधम् । निर्भीकः सिंहवत्तस्थावेकाकी

सुस्थिराशयः ॥ ११ ॥ इतश्चोज्जयिनीपुर्यां, चन्द्रप्रद्योतनन्दनः । शिवांगजोऽभवन्नाम्ना, पालकोऽवनिपालकः ॥ १२ ॥ युवराजो लघुस्तस्य, भ्राता गोपालकः स तु । निष्क्रान्तो लघुकर्म्मत्वात्त्यक्त्वा तृणमिव श्रियम् ॥ १३ ॥ पालकस्य तु जज्ञाते, तनयौ नयशालिनौ । अवन्तिवर्द्धनो ज्येष्ठः, कनिष्ठो राष्ट्रवर्द्धनः ॥ १४ ॥ राज्ये च यौवराज्ये च, पालकोऽपि निवेश्य तौ । रजोवद्राज्यमुत्सृज्य, संयमश्रियमग्रहीत् ॥ १५ ॥ धारिणीनामिका राष्ट्रवर्द्धनस्य प्रियाऽभवत् । रूपेणाप्रतिरूपांगी, सुतश्चावन्तिसेनकः ॥ १६ ॥ धारिणीमन्यदोद्याने, नरेन्द्रोऽवन्तिवर्द्धनः । विलोक्य लोचनाम्भोजप्रभाकरविभानिभाम् ॥ १७ ॥ स्मरार्त्तः प्रार्थयांचक्रेऽत्यर्थं दूतीमुखेन ताम् । धारिण्युवाच राजन् ! किं, न भ्रातुरपि लज्जसे ? ॥ १८ ॥ कथंचिन्निहतो राज्ञा, ततोऽसौ राष्ट्रवर्द्धनः । धारिण्यापन्नसत्त्वाऽथ, शीलालंकारधारिणी ॥ १९ ॥ नाममुद्रान्विता वृद्धवणिक्सार्थयुता ततः । जगाम रक्षितुं शीलं, कौशाम्ब्यामविलम्बितम् ॥ २० ॥ नृपस्य यानशालायां, स्थितानां तत्र संयमम् । साध्वीनामन्तिकेऽगृह्णात्तं गर्भमनिवेद्य सा ॥ २१ ॥ पश्चाद् ज्ञाते प्रवर्त्तिन्या, प्रच्छन्नं स्थापिताऽथ सा । तनयं समयेऽसूत, कल्पद्रुमिव मेरुभूः ॥ २२ ॥ संयतीनामनर्थोऽयमिति राजगृहांगणे । नाममुद्रान्वितं सा तं, मुमोचान्यैरलक्षिता ॥ २३ ॥ नरेन्द्रोऽजितसेनोऽथ, दृष्ट्वा तं मणिपुंजवत् । प्रभावन्तमपुत्रायै, महादेव्यै ददौ मुदा ॥ २४ ॥ प्रकाश्य गूढगर्भेयमिति कृत्वा महोत्सवम् । पिता पुत्रस्य तस्याख्यां, मणिप्रभ इति व्यधात् ॥ २५ ॥ प्रवर्तिन्याऽथ सा पृष्टा, धारिण्यूचे मृतार्भकम् । सम्प्रत्येव जनित्वा तमत्याक्षं भगवत्यहम् ॥ २६ ॥ व्यधाद्देव्या समं मैत्री, पुत्रप्रेम्णाऽथ धारिणी । कालेनासौ नृपो जज्ञे, मृते राज्ञि मणिप्रभः ॥ २७ ॥ हत्वाऽनुजमवन्तीशस्तदा सोऽवन्तिवर्धनः । धारिण्यनुजयोर्भ्रष्टः, परं वैराग्यमागतः ॥ २८ ॥ स्वराज्येऽवन्तिसेनं तं, निवेश्य भ्रातुरात्मजम् । गुरुपादान्तिकेऽगृह्णाद्भवभीरुस्ततो व्रतम्

॥ २९ ॥ दूतादवन्तिसेनेनान्यदाऽभाणि मणिप्रभः । भुंक्ष्व राज्यश्रियं दत्त्वा, मम दण्डं क्रमागतम् ॥ ३० ॥ प्रत्यूचे सोऽपि लास्यामि, सव्याजं मूलतोऽप्यमुम् । ज्ञात्वेत्यवन्तिसेनस्तं, सर्वौघेणाभ्यषेणयत् ॥ ३१ ॥ क्षिप्रं संप्राप्य कौशाम्ब्यां, सर्वतस्तां निरुध्य सः । तस्थावप्रतिमस्थामा, तद्ध्वंसनकृतादरः ॥ ३२ ॥ मणिप्रभोऽपि पुर्यन्तः, स्थितोऽप्यतिमदोद्धुरः । वीरंमन्योऽन्यवीरौघमपि मेने तृणाय सः ॥ ३३ ॥ रणैकरसिकः किन्तु, सर्वसन्नहनोद्यतः । चतुरंगचमूचक्रं, चक्रे संग्रामकोविदम् ॥ ३४ ॥ तदा च पौरलोकोऽपि, परचक्रभयद्रुतः । निखातोत्खाताचिन्ताढ्यो, व्यग्रचित्तोऽभवद् भृशम् ॥ ३५ ॥ विहारोच्चारभूम्यादेः, संकीर्णत्वाद्यातिव्रजः । वैमनस्यमगात्पश्यन् , संयमात्मविराधनाम् ॥ ३६ ॥ विहिताऽनशनस्यापि, धर्म्मघोषमुनेस्ततः । सुखसंयमयात्रादिवार्त्तां पप्रच्छ कोऽपि न ॥ ३७ ॥ पूजार्थी जीविताशंसाप्रयोगी तद्विपर्ययात् । मृतोऽप्युपरि वप्रस्य, क्षिप्तोऽसौ लेष्टुवद्बहिः ॥ ३८ ॥ वृत्तान्तं मूलतोऽप्युक्त्वा, धारिण्यूचे प्रवर्तिनीम् । सोदरौ वारयाम्येतावमुष्माद्भीष्मतो रणात् ॥ ३९ ॥ ओमित्युक्ते तया साऽथ, मणिप्रभनृपाग्रतः । सर्वं स्वरूपमावेद्य, प्रोचे युक्तो न ते रणः ॥४०॥ इत्युक्तोऽप्यभिमानेन, स यावन्न निवर्त्तते । तावत्साऽवन्तिसेनस्य, राज्ञः पार्श्वे ययौ द्रुतम् ॥ ४१ ॥ गत्वा तेन प्रबन्धं तं, पृष्टा सा सर्वमाख्यत । ऊचे च योत्स्यसे वत्स !, सार्द्धं स्वेनानुजेन किम् ? ॥ ४२ ॥ मुक्त्वा संग्रामसंरम्भं, प्राचालीन्मिलनाय सः । मणिप्रभोऽपि तज्ज्ञात्वा, भक्त्या संमुखमभ्यगात् ॥ ४३ ॥ उत्तीर्य वाहनात्तूर्णं, मुदा चक्षुःपथागतौ । प्रविविक्षू इवांगान्तर्गाढमालिंगतां मिथः ॥ ४४ ॥ प्रविष्टौ नगरीमध्ये, तौ महोत्सवपूर्वकम् । स्थित्वा कियद्दिनांस्तत्र, प्रत्यवन्तीं प्रचेलतुः ॥ ४५ ॥ ताभ्यामाकारिताः सार्द्धं, व्रतिन्योऽपि प्रतस्थिरे । अवसन् पथि गच्छन्त्यो, वच्छगासरितस्तटे ॥ ४६ ॥ आरोहन्तं गिरौ तत्रावरोहन्तं च वीक्ष्य ताः । जनं पृष्ट्वाऽविदुस्तत्र , स्थितं

धर्मयशोमुनिम् ॥ ४७ ॥ ततस्ताभिस्तयो राज्ञोर्गदितं गन्तुमिच्छतोः । नैष्यामः साम्प्रतं भूपौ, मुक्त्वाऽनशनिनं मुनिम् ॥ ४८ ॥ श्रुत्वेति सपरीवारौ, तस्थतुस्तत्र तावपि । नित्यमानर्चतुर्भक्त्या, तं मुनिं सर्वसंपदा ॥४९॥ महिमानं महीयांसमनिच्छन्नप्यवाप सः । मृत्वा जज्ञे महाभागो, महास्वर्गसुखास्पदम् ॥ ५० ॥ इत्येवं किल धर्मघोषयतिनोऽपभ्राजनां सर्वथा, ज्ञात्वा धर्मयशोमुनेश्च विपुलं धर्मं यशः सत्सुखम् । तद्भव्याः ! अतिचारलेशरहितां संलेखनां सादराः, कुर्वीध्वं समये विशुद्धसमयप्रोक्तप्रकारेण भोः ! ॥ ५१ ॥ ( शार्दूलविक्रीडितम् ) ॥ संलेखनायां धर्मघोषधर्मयशोज्ञातम् ॥३३॥ सर्वोऽप्यतिचारो योगत्रयसंभवोऽतस्तानुद्दिश्य तैरेव प्रतिक्रामन्नाह—

काएण काइयस्सा, पडिक्कमे वाइयस्स वायाए । मणसा माणसियस्सा, सव्वस्स वयाइयारस्स ॥ ३४ ॥

कायेन-वधादिकारिणा शरीरेण कृतः कायिकस्तस्य,कायेन-तपःकायोत्सर्गाद्यनुष्ठानपरेण देहेन, एवं वाचा-सहसाऽभ्याख्यानदानादिरूपया वाचिकस्य वाचैव मिथ्यादुष्कृतकरणादिलक्षणया,तथा मनसा देवतत्त्वादिषु शङ्कादिकलुषितेन मनसैव हा दुष्ठु कृतमित्याद्यात्मनिन्दापरेण सर्वस्य व्रतातिचारस्य प्रतिक्रमामीति सामान्येन योगत्रयप्रतिक्रमणमुक्तम् ॥ ३४ ॥ सम्प्रति विशेषतस्तदेवाह—

वंदणवयसिक्खागारवेसु सण्णाकसायदंडेसुं । गुत्तीसु य समिईसु य, जो अइयारो अ तं निंदे ॥ ३५ ॥

वन्दनं-चैत्यवन्दनं गुरुवन्दनं च व्रतानि-स्थूलप्राणातिपातादीनि शिक्षा-ग्रहणासेवनरूपा, तत्र ग्रहणशिक्षा सामायिकादिसूत्रार्थग्रहणरूपा, यदाहुः—" सावगस्स जहन्नेणं अट्ठप्पवयणमायाओ, उक्कोसेणं छज्जीवणिया सुत्तओ अत्थओत्ति, पिंडेसणज्झयणं

न सुत्तओ, अत्थओ पुण उल्लावेणं सुणइत्ति " आसेवनशिक्षा पुनः 'नमस्कारेण विबोध' इत्यादिदिनकृत्यलक्षणा, गौरवाणि-जात्यादिमदस्थानानि तानि प्रतीतानि ऋद्ध्यादीनि वा, तत्र प्रभूतधनस्वजनादिभिर्गर्वकरणमृद्धिगौरवमिहैव लाघवाय दशार्णभद्रादेरिव १ रसेषु-मधुरान्नपानादिषु गार्ध्यं रसगौरवं महादोषाय मथुरामंग्वादेरिव २ मृदुशय्यासनाद्यभिष्वङ्गः सातागौरवं दुर्गतिपाताय शशिराजादेरिव ३ । वन्दनं च व्रतानि चेत्यादिद्वन्द्वस्तेषु, तथा संज्ञाश्चतस्रो दश पञ्चदश वा ताश्च प्रतीताः, तथा कषः संसारः तस्यायो-लाभो येभ्यस्ते कषायाः-क्रोधादयः, तथा दण्ड्यते धर्मधनापहारेण प्राणी यैस्तेऽशुभमनोवाक्कायरूपाः दण्डाः मिथ्यादर्शनमायानिदानशल्यरूपा वा तेषु, तथा गुप्तिषु-अशुभयोगनिरोधरूपासु, तथा ईर्यादिषु पञ्चसु समितिषु, चशब्दाद्दर्शनप्रतिमाद्यशेषधर्म्मकृत्येषु च निषिद्धकरणादिना योऽतिचारस्तं निन्दामीति ॥ ३५ ॥ साम्प्रतं सम्यग्दर्शनमाहात्म्योपदर्शनायाह—

**सम्मद्दिट्ठी जीवो, जइवि हु पावं समायरइ किंची । अप्पो सि होइ बन्धो, जेण न निद्धंधसं कुणइ ॥ ३६ ॥**

सम्यग्-अविपरीता दृष्टिः-बोधो यस्य स तथा, ततश्च जीवो यद्यपि कथंचिदनिर्वहन् पापं-कृष्याद्यारम्भं समाचरति किंचित्-स्तोकं, हुरत्र तथापीत्यर्थे, ततस्तथाप्यल्पः-पूर्वगुणस्थानापेक्षया स्तोकः, 'सि' त्ति तस्य श्रावकस्य भवति बन्धो ज्ञानावरणादिकर्मणां, कुतः इत्याह-येनेति यस्मात् न निद्धंधसंति न निर्दयं कुरुते, पशुवधनिबन्धनवाणिज्योद्यतचारुदत्तवदिति ॥ ३६ ॥ ननु 'स्तोकस्यापि विषस्य विषमा गति' रित्यल्पस्यापि बन्धकस्य का गतिरित्यत आह—

**तंपि हु सपडिक्कमणं, सप्परियावं सउत्तरगुणं च । खिप्पं उवसामेई, वाहिव्व सुसिक्खिओ विज्जो ॥३७॥** ॥१५४॥

तदपि यत् सम्यग्दृष्टिना कृतमल्पं पापं सह प्रतिक्रमणेन-षड्विधावश्यकेन वर्त्तत इति सप्रतिक्रमणं सपरितापं पश्चात्तापानुगतं

सोत्तरगुणं च-गुरूपदिष्टप्रायश्चित्तचरणान्वितं क्षिप्रमुपशमयति श्रावकः, हुरत्रैवार्थत्वात् निष्प्रतापं-करोत्येवेत्यर्थः, कमिवेत्याह-व्याधिमिव-साध्यरोगमिव सुशिक्षितो वैद्य इति ॥ ३७ ॥ दृष्टान्तान्तरमाह—

जहा विसं कुट्ठगयं, मंतमूलविसारया । विज्जा हणंति मंतेहिं, तो तं हवइ निव्विसं ॥ ३८ ॥

कण्ठ्या । नवरं 'तं' ति तत्पापं, यद्यप्यसौ विषार्त्तस्तेषां मन्त्राक्षराणां न तथाविधमर्थमवबुध्यते तथाप्यचिन्त्यो हि मणि-मन्त्रौषधीनां प्रभाव इति तदक्षरश्रवणेऽपि गुणः संपनीपद्यते, अत्रार्थे स्थविरादृष्टान्तः—

एकस्मिन् संनिवेशेऽभूत्, स्थविरैका सुदुर्गता । हंसो नाम सुतस्तस्य, वत्सरूपाण्यचारयत् ॥ १ ॥ सोऽन्यदा बहिरुद्यानात्, सायमायन् गृहं प्रति । दष्टो रुष्टेन दुष्टेन, दंदशूकेन निष्ठुरम् ॥ २ ॥ तत्क्षणाद्विषवेगेन, सर्वाङ्गमपि भावितः । पपात मूर्च्छितो भूम्यां, काष्ठवन्नष्टचेतनः ॥ ३ ॥ केनापि तज्जनन्यास्तत्कथितं साऽपि सत्वरम् । मान्त्रिकान्मिलयित्वाऽगात्, पूत्कुर्वन्ती सुतान्तिके ॥ ४ ॥ मृतोऽयमिति मन्वानास्ते सर्वेऽगुर्यथागतम् । एकाकिन्यपि सा रात्रौ, तत्रास्थाच्छोकसंकुला ५ ॥ कर्णमूले स्थिता तत्र, रुदत्युच्चैःस्वरेण सा । हा पुत्र ! हंस ! हंसेति, वृद्धाऽश्रान्तमवोचत ॥ ६ ॥ तस्या एवं रुदत्याः सा, कथञ्चन निशाऽगमत् । सुप्तवत्सहसोत्तस्थौ, हंसो हंसोदये ततः ॥ ७ ॥ सज्जीभूतं च तं ज्ञात्वा, मान्त्रिकाः पुनरागताः । अपृच्छन्नस्य किं चक्रे, त्वया वृद्धे ! चिकित्सितम् ? ॥ ८ ॥ साऽप्यूचे हंस हंसेति, वदन्ती स्थितवत्यहम् । तेऽप्यूचुर्गारुडे मन्त्रेऽमूनि बीजाक्षराणि भोः ! ॥ ९ ॥ तदर्थमविदन्त्याऽपि, जरत्या कर्णजापतः । स्वपुत्रो निर्विषीचक्रे, प्रभावो ह्यक्षरेष्वहो ॥ १० ॥ दार्ष्टान्तिकमाह—

एवं अट्ठविहं कम्मं, रागदोससमज्जियं । आलोयंतो य निंदंतो, खिप्पं हणइ सुसावओ ॥ ३९ ॥

कण्ठ्या । नवरं सुशब्दः पूजार्थः, स च षट्स्थानयुक्तस्य भावश्रावकत्वस्य सूचकः, यथा–" कयवयकम्मो१ तह सीलवं च २ गुणवं च ३ उज्जुववहारी ४ । गुरुसुस्सूसो ५ पवयणकुसलो ६ खलु भावओ सड्ढो ॥१॥' त्ति ॥ ३९ ॥ एनमेवार्थं सविशेषमाह—

**कयपावोऽवि मणूसो, आलोइय निंदिओ गुरुसगासे । होइ अइरेगलहुओ, ओहरियभरुव्व भारवहो ॥४०॥**

सुबोधा । नवरं मनुष्यग्रहणमिह तेषामेव प्रतिक्रमणार्हत्वख्यापनार्थम् ॥४०॥ सम्प्रति श्रावकस्य बह्वारम्भरतस्याप्यावश्यकेन दुःखान्तो भवतीति दर्शयितुमाह—

**आवस्सएण एएण, सावओ जइवि बहुरओ होई । दुक्खाणमन्तकिरियं, काही अचिरेण कालेणं ॥ ४१ ॥**

आवश्यकेनैतेनेति-षड्विधभावावश्यकरूपेण, न तु दन्तधावनादिद्रव्यावश्यकेन, श्रावको यद्यपि बहुरजा-बहुबध्यमानकर्मा भवति,तथापीत्यध्याहारात्, दुःखानां शारीरमानसानां, 'अन्तकिरिअ'न्ति अन्तक्रियां- विनाशं करिष्यत्यचिरेण-स्तोकेनैव कालेन॥ अत्र चान्तक्रियाया अनन्तरहेतुर्यथाख्यातचारित्रं तथापि परम्पराहेतुरिदमपि जायते सुदर्शनादेरिवेति ॥ ४१ ॥ सम्प्रति विस्मृतातिचारं प्रतिक्रमितुमाह—

**आलोयणा बहुविहा, न य संभरिया पडिक्कमणकाले । मूलगुणउत्तरगुणे, तं निंदे तं च गारिहामि ॥४२॥**

कण्ठ्या । नवरं आलोचना-गुरुभ्यो निजदोषकथनं,उपचारात्तत्कारणभूताऽप्रमादक्रियाऽप्यालोचना ' पडिक्कमणकाले' त्ति आलोचनानिन्दागर्हाऽवसरे ॥ ४२ ॥ एवं प्रतिक्रामको निन्दादीन्विधाय धर्माराधनाय कायेनाभ्युत्थितस्तस्य धर्मस्य केवलिप्रज्ञप्तस्येति वचसा ब्रुवन्मङ्गलगर्भमिदमाह—

तस्स धम्मस्स केवलिपण्णत्तस्स अब्भुट्ठिओमि आराहणाए, विरओमि विराहणाए, तिविहेण पडिक्कंतो, वंदामि जिणे चउवीसं ॥ ४३ ॥

अभ्युत्थितोऽस्म्याराधनाय--उद्यतोऽहं संपूर्णलाभार्थं, विरतो विराधनायाश्च--निवृत्तः खण्डनायाः, त्रिविधेनेत्यादि सुगमम् ॥ ४३ ॥ एवं भावजिनान्नत्वा त्रिलोकगतस्थापनाऽर्हद्वन्दनार्थमाह—

जावंति चेइआइं, उड्ढे अ अहे अ तिरिअलोए अ। सव्वाइं ताइं वंदे, इह संतो तत्थ संताइं ॥ ४४ ॥

कण्ठ्या ॥ नवरं 'इह संतो' त्ति इह स्थितः ॥ साम्प्रतं सर्वसाधुवन्दनायाह—

जावन्त केवि साहू, भरहेरवयमहाविदेहे अ। सव्वेसिं तेसिं पणओ, तिविहेण तिदंडविरयाणं ॥ ४५ ॥

यावन्तः केचित्साधवो-जिनस्थविरकल्पिकादिभेदभिन्नाः उत्कर्षतो नवकोटिसहस्रसंख्याः जघन्यतस्तु द्विकोटिसहस्रप्रमिताः, भरतैरवतमहाविदेहेषु, चशब्दात्संहरणादिनाऽकर्मभूम्यादिषु च, सर्वेभ्यस्तेभ्यः प्रणतस्त्रिविधेनेत्यादि सुगमम् ॥४५॥ एवमसौ प्रतिक्रामकः कृतसमस्तचैत्ययतिप्रणतिर्भविष्यत्कालेऽपि शुभभावमाशंसयन्नाह—

चिरसंचियपावपणासणीइ भवसयसहस्समहणीए। चउवीसजिणविणिग्गयकहाइ वोलंतु मे दियहा ॥४६॥

कण्ठ्या। नवरं कथया- तन्नामोच्चारणतद्गुणोत्कीर्तनतच्चरितवर्णनादिकया वचनपद्धत्या 'वोलंतु' त्ति व्रजन्तु ॥ ४६ ॥ ॥१५७॥
सम्प्रति मंगलपूर्वकं जन्मान्तरेऽपि समाधिबोध्याशंसामाह—

मम मंगलमरहंता, सिद्धा साहू सुयं च धम्मो य। सम्मद्दिट्ठी देवा, दिंतु समाहिं च बोहिं च ॥ ४७ ॥

**मम मंगलमर्हन्तः सिद्धाः साधवः श्रुतं च**-अंगोपांगाद्यागमः,**धर्मः**-चारित्रात्मकः,चशब्दाल्लोकोत्तमाश्च **शरणं चैते** इति द्रष्टव्यं, अत्र च धर्म्मान्तर्गतत्वेऽपि श्रुतस्य पृथग्ग्रहणं ज्ञानक्रियाभ्यां समुदिताभ्यामेव मोक्ष इति ज्ञापनार्थं, तथा सम्यग्दृष्टयः:-अर्हत्पाक्षिका **देवा**-भवनवास्याद्याः **ददतु**-प्रयच्छन्तु **समाधिं**-चित्तस्वास्थ्यं **बोधिं च**-प्रेत्यजिनधर्मप्राप्तिरूपाम् ॥ आह-ते देवाः समाधिदाने किं समर्था न वा ?, यद्यसमर्थास्तर्हि तत्प्रार्थनस्य वैयर्थ्यप्रसंगः, यदि समर्थास्तर्हि सर्वभव्येभ्यः किं न प्रयच्छन्ति ?; अथैवं मन्यते योग्यानामेव ते समर्था नायोग्यानां तर्हि योग्यतैव प्रमाणं, किं तैरजागलस्तनकल्पैः ?, अत्रोच्यते, सर्वत्र योग्यतैव प्रमाणं, परं न वयं विचाराक्षमनियतिवादादिवदेकान्तवादिनः, किंतु जिनमतानुयायिनः, तच्च सर्वनयसमूहात्मकस्याद्वादमुद्रानतिभेदि, 'सामग्री वै जनिकेति' वचनात्, यथा घटनिष्पत्तौ मृदो योग्यतायामपि कुलालचक्रचीवरदवरकदण्डादयोऽपि तत्र सहकारिकारणं एवमिहापि जीवयोग्यतायां सत्यामपि तथाप्रत्यूहव्यूहनिराकरणेन देवा अपि **यक्षाम्बाप्रभृतयः** समाधिबोधिदाने समर्था भवन्ति **मेतार्यादे**रिवेत्यतो न निरर्थिका तत्प्रार्थनेति ॥ ४७ ॥ अधुना येषु स्थानेषु प्रातिक्रमणं भवति तदुपदर्शनायाह-

**पडिसिद्धाणं करणे, किच्चाणमकरणे अ पडिक्कमणं । असद्दहणे य तहा, विवरीयपरूवणाए य ॥ ४८ ॥**

**प्रतिषिद्धानां**-सम्यक्त्वाणुव्रतादिमालिन्यहेतुशंकावधादीनां **करणे, कृत्यानां च** अंगीकृतपूजादिनियमानाम**करणे,अश्रद्धाने च**-निगोदादिविचारविप्रत्यये, तथा **विपरीतप्ररूपणे**-उन्मार्गदेशनायां, इयं हि चतुरन्तादभ्रभवभ्रमणे हेतुर्मरीच्यादेरिव, तस्यां चानाभोगादिना कृतायां प्रातिक्रमणं भवतीति ॥ ननु श्रावकस्य धर्म्मकथनेऽधिकारोऽस्ति ?, अस्तीति ब्रूमः, गीतार्थादधिगतसूत्रार्थस्य गुरुपरतंत्रवचनस्य तस्यैव सूत्रार्थस्य कथने को नाम नाधिकारः ?, 'पढइ सुणइ गुणेइ अ, जणस्स धम्मं परिकहेइ' इत्या-

देवानां बोधिदानशक्तिः अकृत्यकरणादिप्रति.

दिवचनात्, तथा च चूर्णिः— 'सो जिणदाससावओ अट्ठमिचउद्दसीसुं उववासं करेइ, पुत्थयं च वाएइ' इत्यादि ॥ ४८ ॥ साम्प्रतमनादिसंसारसागरावर्तान्तर्गतानां सत्त्वानामन्योऽन्यं वैरसम्भवात् तत्क्षमणायाह—

**खामेमि सव्वजीवे, सव्वे जीवा खमंतु मे । मित्ती मे सव्वभूएसु, वेरं मज्झ न केणई ॥ ४९ ॥**

**क्षमयामि सर्वजीवानपि,** अज्ञानमोहावृतेन या तेषां कृता पीडा तां तयोरपगमान्मर्षयामि, **सर्वे जीवाः क्षाम्यन्तु मे** दुश्चेष्टितम्, अत्र हेतुमाह-**मैत्री मे सर्वभूतेषु वैरं मम केनचित्**, कोऽर्थः?-मोक्षलाभहेतुभिस्तान् सर्वान् स्वशक्त्या लम्भयामि, नैव तद्विघ्नकृतामपि विघाते वर्तेऽहमिति, वैरं हि भूरिभवपरम्परानुयायि, केषामिव ?, **कमठमरुभूत्यादीनामिवेति** ॥ ४९ ॥ साम्प्रतं प्रतिक्रमणाध्ययनमुपसंहरन्नवसानमंगलप्रदर्शनार्थमाह-

**एवमहं आलोइय, निंदिय गरहिय दुगुंछियं सम्मं । तिविहेण पडिक्कंतो, वंदामि जिणे चउवीसं ॥ ५० ॥**

कण्ठ्या । नवरं '**दुगुंछियं सम्मं**'ति जुगुप्सितं सम्यगिति ॥ ५० ॥

इत्येवमल्परुचिसत्त्वविबोधनाय, श्राद्धप्रतिक्रमणसूत्रविवृत्तिरेषा ।
किंचिन्मया प्रकटिताऽत्र च विस्तरार्थो, ज्ञेयो बृहद्विवृतितो वरचूर्णितश्च ॥ १ ॥

**इति श्रावकानुष्ठानविधिः ॥ (ग्रन्थाग्रम् २७२०) ॥**

इत्याचार्यप्रवरश्रीमत्तपागणत्रिपथगाप्रवाहहिमवत्सानुप्रभश्रीजगच्चन्द्रचरणसरोरुहचंचरीकश्रीमद्देवेन्द्रसूरिप्रवरप्रविरचिता श्रावकानुष्ठानविधिमयी वन्दारुवृत्तिसंज्ञिका प्रतिक्रमणवृत्तिः समाप्ता । ॥ समाप्तेयं श्रीवन्दारुवृत्तिः ॥

| दे० ला० फंड के ग्रंथ | मूल्य |
| --- | --- |
| श्राद्धप्रतिक्रमणसूत्रवृत्तिः | २-०-० |
| आवश्यकटीप्पनं | १-१२-० |
| श्रीपालचरित्रं संस्कृते | ०-१४-० |
| सूक्तमुक्तावली | २-०-० |
| तंदुलवेयालीपयन्नो सटीक | १-८-० |
| विंशतिस्थानकचरित्रं | १-०-० |
| सुबोधा समाचारी | ०-८-० |
| श्रीपालचरित्रं प्राकृते | १-४-० |
| प्रवचनसारोद्धारः (पूर्वार्धं) | ३-०-० |
| ,, ,,(उत्तरार्धम्) | ४-०-० |
| लोकप्रकाशः भाग पहिला | २-०-० |
| पंचवस्तुकग्रंथः सटीकः | ३-०-० |
| आचारप्रदीपः | १-८-० |
| नवपदप्रकरणबृहद्वृत्तिः | ४-०-० |
| सेनप्रश्नः(प्रश्नोत्तररत्नाकरः) | १-०-० |
| कल्पसूत्रबोधिका | २-०-० |
| विचाररत्नाकरः | ३-०-० |
| (क्षत्र)लोकप्रकाशःभाग दूसरा | २-८-० |

—*—

| समिति के ग्रंथ | मूल्य |
| --- | --- |
| विशेषा०गाथावविषयानुक्रम | ०-५-० |
| विचारसारप्रकरणं | ०-८-० |
| प्रवज्याविधानकुलकादि | ०-६-० |
| अनुयोगद्वारसूत्रं सटीकं | २-८-० |
| नंदीसूत्रं सटीकं | २-४-० |
| दशपयन्ना छायायुक्त | २-०-० |
| आवश्यकं मलयगिरिवृत्तियुतं पूर्वार्धम् | ४-०-० |
| नन्द्यादिसातना अकारादि व विषयानुक्रम. | २-०-० |

**हमारे तर्फ से.**

| | |
| --- | --- |
| पंचाशकादि अष्टशास्त्रीमूल | ४-०-० |
| अनुयोगद्वार चूर्णि व हारि० वृत्ति | २-०-० |
| अमुद्रित विशेषावश्यक गाथा | |
| नंदीचूर्णि व हारि० वृत्ति. | १-८-० |
| ऐन्द्रस्तुत्यादि. | ०-८-० |
| आवश्यकचूर्णि (पूर्वभागः) | ४-०-० |
| ऋषिभाषितसूत्रं | ०-३-० |
| ज्योतिष्करंडकटीका | ३-८-० |
| प्रत्याख्यानस्वरूपं कातंत्रविभ्रमः, दानछत्रीसी विशेषणवती वीशवीशी | १-४-० |
| युक्तिप्रबोधः ( दिगंबरखंडनं ) | १-१२-० |
| प्रकरणसमुच्चयः | १-४-० |
| उपदेशमालामूलं | ०-३-० |
| बन्धवर्णसिद्धिः | ०-८-० |

पत्ता-श्रीऋषभदेवजी केशरीमलजी
पेढी बजाजखाना, रतलाम.